शास्त्रसंदेश-२७

# स्तोत्रसंदेशमाला

## अर्हदादिसहस्रनामसमुच्चयः

१

मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-२७

# स्तोत्र संदेशमाला-१

## अर्हदादिसहस्त्रनामसमुच्चयः

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

**સ્તોત્ર સંદેશમાલા-૧**

**अर्हदादिसहस्त्रनामसमुच्चयः**

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૦ + ૨૦૯ + ૫

સ્તોત્ર : ૧૬ શ્લોક : ૧૯૩૮

**પ્રમાર્જના :**

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　અનુમોદનીય...!　　અનુકરણીય...!

# સ્તોત્ર સંદેશમાલાના
# ભાગ ૧-૨-3 ના દ્રવ્ય લાભાર્થી

*શ્રી સિદ્ધગિરિરાજની છત્રછાયામાં*

*વિ.સં. ૨૦૬૭ની સાલે જૈનશાસનશિરતાજ,*

*દીક્ષાયુગપ્રવર્તક, તપાગચ્છાધિરાજ, પૂજ્ય આચાર્યદેવ*

***શ્રીમદ્ વિજય રામચંદ્રસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન***

*ગુરુગચ્છવિશ્વાસધામ, વર્ધમાનતપોનિધિ,*

***પૂ. આ. શ્રી વિજય ગુણયશસૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન*

*પ્રવચનપ્રભાવક*

***પૂ. આ. શ્રી વિજય કીર્તિયશસૂરીશ્વરજી મહારાજાની નિશ્રામાં***

*કુળદીપિકા **પૂ. સા. શ્રી રાજનંદિતાશ્રીજી મ. સા.** ના સદુપદેશથી*

*ધાનેરા નિવાસી*

## *માતુશ્રી ચંપાબેન જયંતિલાલ દાનસુંગભાઈ અજબાણી*
## *ધાનેરા ડાયમંડ પરિવારે*

*૬૦ શ્રમણો, ૩૦૦ શ્રમણીઓ, ૧૭૦૦ જેટલા ચાતુર્માસ આરાધકો, ૧૦૬૦ જેટલા ઉપધાન તપના આરાધકો અને તેમાં ૫૮૫ જેટલા માળ આરાધકો આદિથી સભર ઐતિહાસિક ચાતુર્માસ તથા ઉપાધનતપનું આયોજન કર્યું હતું. એ દરમ્યાન થયેલી જ્ઞાનખાતાની વિશિષ્ટ ઉપજમાંથી સ્તોત્ર સંદેશમાલાના ભાગ-૧થી ૩ ના પ્રકાશનનો લાભ લેવામાં આવ્યો છે.*

***અમો એ સુકૃતની ભાવપૂર્વક અનુમોદના કરીએ છીએ.***

***શાસ્ત્રસંદેશ, સુરત***

*સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન-સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | नमस्त्रिलोकनाथाय, सर्वज्ञाय | पू.आ.श्री भद्रबाहुस्वामी | १ |
| २ | पार्श्वनाथो जिनः श्रीमान् स्या- | पू.आ. श्रीकल्याणसागरसूरि | ५ |
| ३ | पार्श्वः पातु नताङ्गिनो भव- | | २० |
| ४ | अर्हन्नामापि कर्णाभ्यां, शृण्वन् | पू.आ. श्रीहेमचन्द्रसूरि | ३५ |
| ५ | स्तोष्ये त्वां परमं ज्योतिर्गुण- | पू. आ. श्री जिनसेनसूरि | ४७ |
| ६ | नमस्ते समस्तेप्सितार्थप्रदाय, | महामहो.श्री विनयविजयगणी | ६९ |
| ७ | ऐन्द्री श्रीः प्रणिधानस्य फलं | पू.उपा.श्री यशोविजयजी | ९१ |
| ८ | प्रणम्य मगसीपार्श्वं, श्रीमन्तं | पू.मु.श्री देवविजयजी | १०४ |
| ९ | प्रभो ! भवाङ्गभोगेषु, निर्वि- | पण्डित आशाधर | ११८ |
| १० | चिदानन्द चिद्रूप ए मोहवारी। | पू. मु. श्री जीवहर्षगणी | १३३ |
| ११ | ॐ नमोऽर्हते भगवते परमा- | पू.आ. श्री सिद्धसेनदिवाकरसूरि | १५० |
| १२ | नमो चउदसमहासुमिणसंसूइय | | १५८ |
| १३ | नमो जिणवरिंदपयमणुह- | | १६४ |
| १४ | प्रणम्य परया भक्त्या देव्याः | | १७० |
| १५ | प्रसिद्धष्टसहस्रे ङ्गे | पू.आ.श्री जिनसेनसूरि | १८४ |
| १५ | सिद्धार्थजातो भगवान्, जग- | पू. मु. श्री हेमविजयगणि | १९६ |

पू.आ.श्री भद्रबाहुस्वामिविरचितम्

# १. ॥ लघुजिनसहस्रनामस्तोत्रम् ॥

(अनुष्टुप्)

नमस्त्रिलोकनाथाय, सर्वज्ञाय महात्मने ।
वक्ष्ये तस्यैव नामानि मोक्षसौख्याभिलाषया ॥ १

निर्मलः शाश्वतः शुद्धो निर्विकल्पो निरामयः ।
निःशरीरो निरातङ्को सिद्धः सूक्ष्मो निरञ्जनः ॥ २

निष्कलङ्को निरालम्बो निर्मोहो निर्मलोत्तमः ।
निर्भयो निरहङ्कारो निर्विकारोऽथ निष्क्रियः ॥ ३

निर्दोषो निरुजःशान्तो निर्भेद्यो निर्ममःशिवः ।
निस्तरङ्गो निराकारो निष्कर्मो निष्कलप्रभुः ॥ ४

निर्वादो निरुपज्ञानोः निरागो निरघो जिनः ।
संशुद्धः प्रतिमः श्रेष्ठः उत्कृष्टो ज्ञानगोचरः ॥ ५

निःसङ्गात्ः प्राप्तकैवल्यो नैष्ठिकः शब्दवर्जितः ।
अनिन्द्यो महापूतात्मा जगत्शिखर शेखरः ॥ ६

निःशब्दो गुणसम्पन्नः पापताप-प्रणाशनः ।
सोपयोगः शुभम्प्राप्तः परज्योतिर्जगत्प्रभुः ॥ ७

अजरो अमरः सिद्धः, अर्चितःअक्षयो विभुः ।
अमूर्त्तः अच्युतो ब्रह्म, विष्णुरीशः प्रजापतिः ॥ ८

अनिन्द्यो विश्वनाथश्च अजो अनुपमोऽभवः ।
अप्रमेयो जगन्नाथो बोधरूपो जिनात्मकः ॥ ९

अव्ययः सकलाराध्यो निष्पन्नो ज्ञानलोचनः ।
अच्छेद्यो निर्मलो नित्यः सर्वशल्यविवर्जितः ॥ १०

अजेयः सर्वतोभद्रो निष्कषायो भवान्तकः ।
विश्वनाथः स्वयम्बुद्धः वीतरागो जिनेश्वरः ॥ ११

अन्तको सहजानन्दः अवाङ्मानसगोचरः ।
असाध्यःशुद्धश्चैतन्यः कर्म नोकर्मवर्जितः ॥ १२

अनन्तो विमलज्ञानी स्पृहीश्च निष्प्रकाशकः ।
कर्म्माजितो महात्मा च लोकत्रयशिरोमणिः ॥ १३

अव्याबाधो वरःशम्भुः विश्ववेदी पितामहः ।
सर्वभूतहितोदयः सर्वलोकशरण्यकः ॥ १४

आनन्दरूपचैतन्यो भगवांस्त्रिजगद्गुरुः ।
अनन्तानन्तधीशक्तिः सत्यव्यक्तव्ययात्मकः ॥ १५

अष्टकर्म्मविनिर्मुक्तः सप्तधातुविवर्जित ।
गौरवादित्रयाद्दूरः सर्वज्ञानादिसंयुतः ॥ १६

अभयः प्राप्तकैवल्यः निर्माणो निरपेक्षकः ।
निष्कलः केवलज्ञानी मुक्तिसौख्यप्रदायकः ॥ १७

अनामयो महाराध्यो वरदो ज्ञानपावकः ।
सर्वेशः सत्सुखावासः जिनेन्द्रो मुनिसंस्तुतः ॥ १८

अन्यूनपरमज्ञानी विश्वतत्त्वप्रकाशकः ।
प्रबुद्धो भगवान्नाथः प्रस्तुतः पुण्यकारकः ॥ १९

शङ्करः सुगतो रौद्रः सर्वज्ञो मदनान्तकः ।
ईश्वरो भुवनाधीशः सचित्तः पुरुषोत्तमः ॥ २०

सद्योजातः महात्मानं विमुक्तो मुक्तिवल्लभः ।
योगीन्द्रोऽनादिसंसिद्धः निरीहो ज्ञानगोचरः ॥ २१

सदाशिवः चतुर्वक्त्रः सत्सौख्यः त्रिपुरान्तकः ।
त्रिनेत्रःत्रिजगत्पूज्यः कल्याणकोष्टमूर्त्तिकः ॥ २२

सर्वसाधुजनैर्वन्द्यः सर्वपापविवर्जितः ।
सर्वदेवाधिको देवः सर्वभूतहितकरः ॥ २३

स्वयंविद्यो महाभावः प्रसिद्धःपापनाशनः ।
तनुमात्रश्चिदानन्दः चैतन्यश्चैत्यवैभवः ॥ २४

सकलातिशयो देवो मुक्तिस्थो महताम्महः ।
मुक्तिकार्याय सन्तुष्टो निरागःपरमेश्वरः ॥ २५

महादेवो महावीरो महामोहविनाशकः ।
महाभावो महादर्शोः महामुक्तिप्रदायकः ॥ २६

महाज्ञानी महायोगी महातपो महात्मकः ।
महर्द्धिको महावीर्यो महान्तिकपदस्थितः ॥ २७

महापूज्यो महावन्द्यो महाविघ्नविनाशकः ।
महासौख्यो महापुंसो महामहिमअच्युतः ॥ २८

मुक्तामुक्तिजसम्बोधः एकानेकविनिश्चलः ।
सर्वबन्धविनिर्मुक्तो सर्वलोकप्रधानकः ॥ २९

महाशूरो महाधीरो महादुःखविनाशकः ।
महामुक्तिप्रदो धीरो महाहृद्यो महागुरुः ॥ ३०

निर्मारो मारविध्वंसी निष्कामो विषयाच्च्युतः ।
भगवन्तो महाशान्तो शान्तिकल्याणकारकः ॥ ३१

परमात्मा परञ्ज्योतिः परमेष्ठी परमेश्वरः ।
परमात्मा परानन्दः ज्ञानज्योतिर्जिनात्मकः ॥ ३२

प्रस्तुतानन्तविज्ञानी सौख्यानिर्वाणसंयुतः ।
नाकृति र्नाक्षरोवर्णी व्योमरूपोऽजितात्मकः ॥ ३३

व्यक्ताव्यक्तजसम्बोधः संसारच्छेदकारणः ।
निरवद्यो महाराध्यः कर्मजिद्धर्मनायकः ॥ ३४

बोधिसत्त्वो जगद्वन्द्यो विश्वात्मानरकान्तकः ।
स्वयम्भूः पापहृत्पूज्यः पुनीतोविभवःस्तुतः ॥ ३५

वर्णातीतो कलातीतो रूपातीतो निरञ्जनः ।
अनन्तज्ञानसम्पूर्णो देवदेवेशनायकः ॥ ३६

वरेण्यो भवविध्वंसी योगिनाञ्ज्ञानगोचरः ।
जन्ममृत्युजरातीतः सर्वविघ्नहरोहरः ॥ ३७

विश्वदृक् भव्यसंवन्द्यः पवित्रो गुणसागरः ।
प्रसन्नः परमाराध्यः लोकालोकप्रकाशकः ॥ ३८

रत्नगर्भो जगत्स्वामी इन्द्रवन्द्यःसुरार्चितः ।
निष्प्रपञ्चो निरातङ्को निःशेष-क्लेशनाशकः ॥ ३९

लोकेशो लोकसंसेव्यो लोकालोकविलोकनः ।
लोकोत्तमो त्रिलोकेशो लोकाग्रशिखरस्थितः ॥ ४०

नामाष्टकसहस्राणि ये पठन्ति पुनः पुनः ।
ते निर्वाणपदं यान्ति मुच्यते नात्र संशयः ॥ ४१

पू.आ. श्री कल्याणसागरसूरिकृतम्

## २. ॥ श्रीपार्श्वनाथसहस्त्रनामस्तोत्रम् ॥

(अनुष्टुप्)

पार्श्वनाथो जिनः श्रीमान् स्याद्वादी पार्श्वनायकः ।
शिवतातिर्जनत्राता, दद्यान्मे सौख्यमन्वहम् ॥ १

नमस्यन्ति नराः सर्वे, शीर्षेण भक्तिभासुराः ।
पापस्तोममपाकर्तुं, तं पार्श्वं नौमि सर्वदा ॥ २

यथार्थवादिना येनोन्मूलिताः क्लेशपादपाः ।
तेनानुभूयते ऋद्धि-र्धीमता सूक्ष्मदर्शिना ॥ ३

शम्भवे पार्श्वनाथाय श्रीमते परमात्मने ।
नमः श्रीवर्द्धमानाय विश्वव्याधिहराय वै ॥ ४

दर्वीकरः शुभध्याना-द्धरणेन्द्रमवाप(न्द्रत्वमाप?) सः ।
यस्मात् परमतत्त्वज्ञात्, सुपार्श्वाल्लोकलोचनात् ॥ ५

प्रतिपूर्णं ध्रुवं ज्ञानं, निरावरणमुत्तमम् ।
विद्यते यस्य पार्श्वस्य, निखिलार्थावभासकम् ॥ ६

यस्मिन्नतीन्द्रिये सौख्य-मनन्तं वर्तते खलु ।
स श्रद्धेयः स चाराध्यो, ध्येयः सैव निरन्तरम् ॥ ७

(सप्तविभक्तीनां श्लोकाः) ।

तव स्तोत्रेण कुर्वे स्वां, जिह्वां दोषशताकुलाम् ।
पूतामिदं भवारण्ये जन्तूनां जन्मनः फलम् ॥ ८

वरदाय नमस्तुभ्यं, नमः क्षीणाष्टकर्मणे ।
सारदाय नमस्तुभ्यं, नमोऽभीष्टार्थदायिने ॥ ९

शङ्कराय नमस्तुभ्यं, नमो यथार्थदर्शिने ।
विपद्धर्त्रे नमस्तुभ्यं, नमो विश्वार्त्तिहारिणे ॥ १०

धर्ममूर्त्ते नमस्तुभ्यं जगदानन्ददायिने ।
जगद्‌भर्त्रे नमस्तेऽपि नमः सकलदर्शिने ॥ ११

सर्वज्ञाय नमस्तुभ्यं, नमो बन्धुरतेजसे ।
श्रीकराय नमस्तुभ्य-मनन्तज्ञानिने नमः ॥ १२

नाथ ! त्वच्चरणाम्भोजसेवारसिकतत्पराः ।
विलसन्ति श्रियं भव्याः, सदोदया महीतले ॥ १३

इन्द्रा अपि गुणान् वक्तुं पारं यस्य ययुर्नहि ।
असङ्ख्येयाननल्पांश्च, क्षमस्तर्हि कथं नरः ? ॥ १४

तथापि ज्ञानमुग्धोऽहं, भक्तिप्रेरितमानसः ।
नाम्नामष्टसहस्रेण त्वां स्तुवे सौख्यदायकम् ॥ १५

इति श्रीपार्श्वनाथनामावल्यां स्तुतिप्रस्तावना ॥

अर्हन् क्षमाधरः स्वामी क्षान्तिमान् क्षान्तिरक्षकः ।
अरिञ्जयः क्षमाधारः शुभंयुरचलस्थितिः ॥ १

लाभकर्ता भयत्राता छद्मापेतो जिनोत्तमः ।
लक्ष्मणो निश्चलोऽजन्मा देवेन्द्रो देवसेवितः ॥ २

धर्मनाथो मनोज्ञाङ्गो धर्मिष्ठो धर्मदेशकः ।
धर्मराजः परातज्ञो धर्मज्ञो धर्मतीर्थकृत् ॥ ३

सद्धैर्यालिप्तहंसाद्रि-स्तत्रभवान् नरोत्तमः ।
धार्मिको धर्मधौरेयो धृतिमान् धर्मनायकः ॥ ४

धर्मपालः क्षमासद्म धर्मसारथिरीश्वरः ।
धर्माध्यक्षो नराधीशो धर्मात्मा धर्मदायकः ॥ ५

धर्मवान् धर्मसेनानी-रचिन्त्यो धीरधीरजः ।
धर्मघोषः प्रकाशात्मा धर्मी धर्मप्ररूपकः ॥ ६

बहुश्रुतो बहुबुद्धि-र्धर्मार्थी धर्मविज्जिनः ।
देवः सनातनोऽसङ्गो-ऽनल्पकान्तिर्मनोहरः ॥ ७

श्रीमान् पापहरो नाथोऽनीश्वरोऽबन्धनोऽरजाः ।
अचिन्त्यात्माऽनघो वीरोऽपुनर्भवो भवोज्झितः ॥ ८

स्वयम्भूः शङ्करो भूष्णु-रनुत्तरो जिनोत्तमः ।
वृषभः सौख्यदोऽस्वप्नोऽनन्तज्ञानी नरार्चितः ॥ ९

आत्मज्ञो विश्वविद् भव्यो-ऽनन्तदर्शी जिनाधिपः ।
विश्वव्यापी जगत्पालो विक्रमी वीर्यवान् परः ॥ १०

विश्वबन्धुरमेयात्मा विश्वेश्वरो जगत्पतिः ।
विश्वेनो विश्वपो विद्वान् विश्वनाथो विभुः प्रभुः ॥ ११

अर्हत् शतम् ॥

वीतरागः प्रशान्तारि-रजरो विश्वनायकः ।
विश्वाद्भुतो निःसपत्नो विकाशी विश्वविश्रुतः ॥ १

विरक्तो विबुधैः सेव्यो वैरङ्गिको विरागवान् ।
प्रतीक्ष्यो विमलो धीरो विश्वेशो वीतमत्सरः ॥ २

विकस्वरो जनश्रेष्ठो-ऽरिष्टतातिः शिवङ्करः ।
विश्वदृश्वा सदाभावी विश्वगो विशदाशयः ॥ ३

विशिष्टो विश्वविख्यातो विचक्षणो विशारदः ।
विपक्षवर्जितोऽकामो विश्वेड् विश्वैकवत्सलः ॥ ४

विजयी जनताबन्धु-र्विद्यादाता सदोदयः ।
शान्तिदः शास्त्रविच्छम्भुः शान्तो दान्तो जितेन्द्रियः ॥ ५

वद्र्धमानो गतातङ्को विनायकोज्झितोऽक्षरः ।
अलक्ष्योऽभीष्टदोऽकोपो-ऽनन्तजित् वदतां वरः ॥ ६

विमुक्तो विशदोऽमूर्तो विज्ञो विशाल अक्षयः ।
अमूर्तात्माऽव्ययो धीमान् तत्त्वज्ञो गतकल्मुषः ॥ ७

शान्तात्मा शाश्वतो नित्यस्त्रिकालज्ञस्त्रिकालवित् ।
त्रैलोक्यपूजितोऽव्यक्तो व्यक्तवाक्यो विदां वरः ॥ ८

सर्वज्ञः सत्यवाक् सिद्धः सोममूर्तिः प्रकाशकृत् ।
सिद्धात्मा सर्वदेवेशो-ऽजय्योऽमेयर्द्धिरस्मरः ॥ ९

क्षमायुक्तः क्षमाचक्षुः क्षमी साक्षी पुरातनः ।
परमात्मा परत्राता पुराणः परमद्युतिः ॥ १०

पवित्रः परमानन्दः पूतवाक् परमेश्वरः ।
पूतोऽजेयः परंज्योति-रनीहो वरदोऽरहाः ॥ ११

वीतरागशतम् ॥ २०० ॥

तीर्थङ्करस्ततश्लोक-स्तीर्थेशस्तीर्थमण्डनः ।
तत्त्वमूर्तिसङ्ख्येय-स्तीर्थकृत् तीर्थनायकः ॥ १

वीतदम्भः प्रसन्नात्मा तारकस्तीर्थलोचनः ।
तीर्थेन्द्रस्त्यागवान् त्यागी तत्त्ववित् त्यक्तसंसृतिः ॥ २

तमोहर्ता जितद्वेष-स्तीर्थाधीशो जगत्प्रियः ।
तीर्थपस्तीर्णसंसार-स्तापहृत् तारलोचनः ॥ ३

तत्त्वात्मा ज्ञानवित् श्रेष्ठो जगन्नाथो जगद्विभुः ।
जगज्जैत्रो जगत्कर्ता जगज्ज्येष्ठो जगद्गुरुः ॥ ४

जगद्ध्येयो जगद्वन्द्यो, जेता सर्वशिरोमणिः ।
जगत्त्राता जितालस्यो, ज्योतिष्मान् जगतः पतिः ॥ ५

जितमोहो जितानङ्गो जितनिद्रो जितक्षयः ।
जितवैरो जितक्लेशो जगद्ग्रैवेयकः शिवः ॥ ६

जनपालो जितक्रोधो जनस्वामी जनेशिता ।
जगत्त्रयमनोहारी जगदानन्ददायकः ॥ ७

जितमानो जिताऽऽकल्पो जनेशो जगदग्रगः ।
जगद्बन्धुर्जगत्स्वामी जनेड् जगत्पितामहः ॥ ८

जिष्णुर्जयी जगद्रक्षो विश्वदर्शी जितामयः ।
जितलोभो जितस्नेहो जगच्चन्द्रो जगद्रविः ॥ ९

नृमनोजवसः शक्तो जिनेन्द्रो जनतारकः ।
अलङ्करिष्णुरद्वेष्यो जगत्त्रयविशेषकः ॥ १०

जनरक्षाकरः कर्ता जगच्चूडामणिर्वरः ।
ज्यायान् जि(गं)तयथाजातो जाड्यापहो जगत्प्रभुः ॥ ११

जन्तुसौख्यकरो जन्म-जरामरणवर्जितः ।
जन्तुसेव्यो जगद्व्याप्तो ज्वलत्तेजा अकल्कनः ॥ १२

जितसर्वो जनाधार-स्तीर्थराट् तीर्थदेशकः ।
नरपूज्यो नरमान्यो जडानलघनाघनः ॥ १३

तीर्थशतम् ॥३००॥

देवदेवः स्थिरः स्थास्नुः स्थेष्ठः स्थेयो दयापरः ।
स्थावरो दानवान् दाता दयायुक्तो दयानिधिः ॥ १

दमितारिर्दयाधामा दयालुर्दानतत्परः ।
स्थविष्ठो जनताधारः स्थवीयान् देवतल्लजः ॥ २

स्थेयान् सूक्ष्मविचारज्ञो दुःस्थहर्ता दयाचणः ।
दयागर्भो दयापूतो देवाच्यो देवसत्तमः ॥ ३

दीप्तो दानप्रदो दिव्यो दुन्दुभिध्वनिरुत्तमः ।
दिव्यभाषापतिश्चारु-र्दमी देवमतल्लिकः ॥ ४

दान्तात्मा देवसेव्योऽपि दिव्यमूर्तिर्दयाध्वजः ।
दक्षो दयाकरः कम्रो दानाल्पितसुरद्रुमः ॥ ५

दुःखहरो दयाचञ्चु-र्दलितोत्कटकल्मुषः ।
दृढधर्मा दृढाचारो दृढव्रतो दमेश्वरः ॥ ६

दृढशीलो दृढपुण्यो दृ(द्र)ढीयान् दमितेन्द्रियः ।
दृढक्रियो दृढधैर्यो दाक्षिण्यो दृढसंयमः ॥ ७

देवप्रष्ठो दयाश्रेष्ठो व्यतीताशेषबन्धनः ।
शरण्यो दानशौण्डीरो दारिद्रोच्छेदकः सुधीः ॥ ८

दयाध्यक्षो दुराधर्षो धर्मदायकतत्परः ।
धन्यः पुण्यमयः कान्तो धर्माधिकरणी सहः ॥ ९

निःकलङ्को निराधारो निर्मलो निर्मलाशयः ।
निरामयो निरातङ्को निर्जरो निर्जरार्चितः ॥ १०

निराशंसो निराकाङ्क्षो निर्विघ्नो भीतिवर्जितः ।
निरामो निर्ममः सौम्यो निरञ्जनो निरुत्तरः ॥ ११

निर्ग्रन्थो निःक्रियः सत्यो निस्सङ्गो निर्भयोऽचलः ।
निर्विकल्पो निरस्तांहो निराबाधो निराश्रवः ॥ १२

देवशतम् ॥४००॥

आत्मभूः शम्भवो विष्णुः, केशवः स्थविरोऽच्युतः ।
परमेष्ठी विधिर्धाता श्रीपतिर्नागल(ला)ञ्छनः ॥ १

शतधृतिः शतानन्दः श्रीवत्सोऽधोक्षजो हरिः ।
विश्वम्भरो हरिस्वामी सर्पेशो विष्टरश्रवाः ॥ २

सुरज्येष्ठश्चतुर्वक्त्रो गोविन्दः पुरुषोत्तमः ।
अष्टकर्णश्चतुरास्य-श्चतुर्भुजः स्वभूः कविः ॥ ३

सात्त्विकः कमनो वेधा-स्त्रिक्रमो ऽऽल्हादकारकः ।
लक्ष्मीवान् श्रीधरः स्रष्टा लब्धवर्णः प्रजापतिः ॥ ४

ध्रुवः सूरिरविज्ञेयः कारुण्योऽमितशासनः ।
दोषज्ञः कुशलोऽभिज्ञः सुकृती मित्रवत्सलः ॥ ५

प्रवीणो निपुणो बुद्धो विदग्धः प्रतिभान्वितः ।
जनानन्दकरः श्रान्तः प्राज्ञो वैज्ञानिकः पटुः ॥ ६

धर्मचक्री कृती व्यक्तो हृदयालुर्वदावदः ।
वचोयुक्तिःपटुर्वक्ता वागीशः पूतशासनः ॥ ७

वेदिता परमः पूज्यः परब्रह्मप्रदेशकः ।
प्रशमात्मा परादित्यः प्रशान्तः प्रशमाकरः ॥ ८

धनीश्वरो यथाकामी स्फारधीर्निरवग्रहः ।
स्वतन्त्रः स्फारशृङ्गारः पद्मेशः स्फारभूषणः ॥ ९

स्फारनेत्रः सदातृप्तः स्फारमूर्तिः प्रियंवदः ।
आत्मदर्शी सदावन्द्यो बलिष्ठो बोधिदायकः ॥ १०

बुद्धात्मा भाग्यसंयुक्तो भयोज्झितो भवान्तकः ।
भूतनाथो भयातीतो बोधिदो भवपारगः ॥ ११

आत्मशतम् ॥५००॥

महादेवो महासाधु-र्महान् मुनीन्द्रसेवितः ।
महाकीर्तिर्महाशक्ति-र्महावीर्यो महायतिः ॥ १

महाव्रतो महाराजो महामित्रो महामतिः ।
महेश्वरो महाभिक्षु-र्मुनीन्द्रो भाग्यभाक् शमी ॥ २

महाधृतिर्महाकान्ति-र्महातपा महाप्रभुः ।
महागुणो महाश्लीलो महाजिनो महापतिः ॥ ३

महामहा महाश्लोको महाबुद्धिर्महोदयः ।
महानन्दो महाधीरो महानाथो महाबलः ॥ ४

महावीरो महाधर्मा महानेता महायशाः ।
महासूनुर्महास्वामी महेशः परमोदयः ॥ ५

महाक्षमो महाभाग्यो महोदर्को महायशः ।
महाप्राज्ञो महाचेता महाप्रभो महेशिता ॥ ६

महासत्त्वो महाशूरो महाशास्त्रो महर्द्धिकः ।
महाबोधिर्महाधीशो महामिश्रो महाक्रियः ॥ ७

महाबन्धुर्महायोगी महात्मा महसाम्पतिः ।
महालब्धिर्महापुण्यो महावाक्यो महाद्युतिः ॥ ८

महालक्ष्मीर्महाचारो महाज्योतिर्महाश्रुतः ।
महामना महामूर्त्ति-र्महेभ्यः सुन्दरो वशी ॥ ९

महाशीलो महाविद्यो महाप्तो हि महाविभुः ।
महाज्ञानो महाध्यानो महोद्यमो महोत्तमः ॥ १०

महासौख्यो महाध्येयो महागतिर्महानरः ।
महातोषो महाधैर्यो महेन्द्रो महिमालयः ॥ ११

महासुहृन्महासख्यो महातनुर्महाधिभूः ।
योगात्मा योगवित् योगी शास्ता यमी यमान्तकृत् ॥ १२

महाशतम् ॥६००॥

हर्षदः पुण्यदस्तुष्टः सन्तोषी सुमतिः पतिः ।
सहिष्णुः पुष्टिदः पुष्टः सर्वंसहः सदाभवः ॥ १

सर्वकारणिकः शिष्टो लग्नकः शारदोऽमलः ।
हतकर्मा हतव्याधि-र्हतार्त्तिर्हतदुर्गतिः ॥ २

पुण्यवान् मित्रयुर्मेध्यः प्रतिभूर्धर्ममन्दिरः ।
यशस्वी सुभगः शुभ्रस्त्रिगुप्तो हतदुर्भगः ॥ ३

हृषीकेशोऽप्रतर्क्यात्माऽनन्तदृष्टिरतीन्द्रियः ।
शिवतातिरचिन्त्यर्द्धि-रलेपो मोक्षदायकः ॥ ४

हतदुःखो हतानङ्गो हतक्लेशकदम्बकः ।
संयमी सुस्वरोऽद्विष्टः पराद्ध्र्यो हतपातकः ॥ ५

शेमुखीशः सुप्रसन्नः क्षेमङ्करो दयालयः ।
स्तवनार्हो विरागार्ह-स्तपस्वी हर्षसंयुतः ॥ ६

अचलात्माऽखिलज्योतिः-शान्तिमानरिमर्दनः ।
अरिघ्नोऽपुनरावृत्ति-ररिहर्ताऽरिभञ्जकः ॥ ७

अरोषणोऽप्रमेयात्मा-ऽध्यात्मगम्यो यतीश्वरः ।
अनाधारो यमोपेतः प्रभासूरः स्वयंप्रभः ॥ ८

अर्चितो रतिमानाप्तो रमाकरो रमाप्रदः ।
अनीर्ष्यालुरशोकोऽग्र्योऽवद्यभिन्नविनश्वरः ॥ ९

अनिघ्नोऽकिञ्चनः स्तुत्यः सज्जनोपासितक्रमः ।
अव्याबाधः प्रभूतात्मा पारगतः स्तुतीश्वरः ॥ १०

योगिनाथः सदामोदः सदाध्येयोऽभिवादकः ।
सदामिश्रः सदाहर्षः सदासौख्यः सदाशिवः ॥ ११

हर्षशतम् ॥७००॥

ज्ञानगर्भो गुणश्रेष्ठो ज्ञानयुक्तो गुणाकरः ।
ज्ञानचक्षुर्गतक्लेशो गुणवान् गुणसागरः ॥ १

ज्ञानदो ज्ञानविख्यातो ज्ञानात्मा गूढगोचरः ।
ज्ञानसिद्धिकरो ज्ञानी ज्ञानज्ञो ज्ञाननायकः ॥ २

ज्ञानाऽमित्रहरो गोप्ता गूढात्मा ज्ञानभूषितः ।
ज्ञानतत्त्वो गुणग्रामो गतशत्रुर्गतातुरः ॥ ३

ज्ञानोत्तमो गताशङ्को गम्भीरो गुणमन्दिरः ।
ज्ञातज्ञेयो गदापेतो ज्ञानत्रितयसाधकः ॥ ४

ज्ञानाब्धिः गीर्पतिः स्वस्थो ज्ञानभाक् ज्ञानसर्वगः ।
ज्ञातगोत्रो गतशोच्यः सद्‌गुणरत्नरोहणः ॥ ५

ज्ञानोत्कृष्टो गतद्वेषो गरिष्ठगीः गिरांपतिः ।
गणाग्रणीर्गुणज्येष्ठो गरीयान् गुणमनोहरः ॥ ६

गुणज्ञो ज्ञातवृत्तान्तो गुरुर्ज्ञानप्रकाशकः ।
विश्वचक्षुर्गताकल्पो गरिष्ठो गुणपेटकः ॥ ७

गम्भीरधीर्गुणाधारो गुणखानिर्गुणालयः ।
ज्ञाताभिधो गताकाङ्क्षो ज्ञानपतिर्गतस्पृहः ॥ ८

गुणी ज्ञातरहःकर्मा क्षेमी ज्ञानविचक्षणः ।
गणेशो ज्ञातसिद्धान्तो गतकष्टो गभीरवाक् ॥ ९

गतगत्यागतिर्गुण्यो गीर्वाणवाक् पुरोगमः ।
गीर्वाणेन्द्रो गतग्लास्नु-र्गतमोहो दरोज्झितः ॥ १०

गीर्वाणपूजितो वन्द्योऽन(नि?)न्द्यो गीर्वाणसेवितः ।
स्वेदज्ञो गतसंसारो गीर्वाणराट् पुरःसरः ॥ ११

घातिकर्मविनिर्मुक्तो खेदहर्ता घनध्वनिः ।
घनयोगो घनज्ञानो घनदो घनरागहृत् ॥ १२

उत्तमात्मा गताबाधो घनबोधसमन्वितः ।
घनधर्मा घनश्रेयो गीर्वाणेन्द्रशिरोमणिः ॥ १३

ज्ञानशतम् ॥८००॥

ऐश्वर्यमण्डितः कृष्णो मुमुक्षुर्लोकनायकः ।
लोकेशः पुण्डरीकाक्षो लोकेड् लोकपुरन्दरः ॥ १

लोकार्को लोकराट् सार्वो लोकेशो लोकवल्लभः ।
लोकज्ञो लोकमन्दारो लोकेन्द्रो लोककुञ्जरः ॥ २

लोकार्च्यो लोकशौण्डीरो लोकविल्लोकसंस्तुतः ।
लोकेनो लोकधौरेयो लोकाग्रयो लोकरक्षकः ॥ ३

लोकानन्दप्रदः स्थाणुः श्रमणो लोकपालकः ।
ऐश्वर्यशोभितो बभ्रुः श्रीकण्ठो लोकपूजितः ॥ ४

अमृतात्मोत्तमध्यान ईशानो लोकसेवितः ।
ऐश्वर्यकारको लोक-विख्यातो लोकधारकः ॥ ५

मृत्युञ्जयो नरध्येयो लोकबन्धुर्नरेशिता ।
लोकचन्द्रो नराधारो लोकचक्षुर्नरेश्वरः ॥ ६

लोकप्रेष्ठो नरव्याप्तो लोकसिंहो नराधिभूः ।
लोकनागो नरख्यातो लोभभिल्लोकवत्सलः ॥ ७

वामदेवो नरज्यायान् लोकभर्ता नराग्रगः ।
लोकविभुर्नरदृश्वा लोकपो लोकभास्करः ॥ ८

लोकदर्शी नरज्येष्ठो लोकवन्द्यो नराधिपः ।
लोकशास्ता नरव्याधि-हर्ता लोकविभावकः ॥ ९

सुमेधा लोकबर्हिष्ठः सत्याशीर्लोकवन्दितः ।
ऋद्धिकर्ता नरस्वामी ऋद्धिमान् लोकदेशकः ॥ १०

प्रमाणं प्रणवः काम्य ईशितोत्तमसंवरः ।
इभ्य उत्तमसंवेग इन उत्तमपूरुषः ॥ ११

स्तुत्या(त्य)र्ह उत्तमासेव्योऽदभ्रतेजा अहीश्वरः ।
उत्तमाख्यः सुगुप्तात्मा मन्ता तज्ज्ञः परिवृढः ॥ १२

लोलुपघ्नो निरस्तैनाः सुव्रतो व्रतपालकः ।
अश्वसेनकुलाधारो नीलवर्णविराजितः ॥ १३

ऐश्वर्यशतम् ॥९००॥

कल्याणभाग् मुनिश्रेष्ठ–श्चतुर्धा मर्त्यसेवितः ।
काम्यदः कर्मशत्रुघ्नः कल्याणात्मा कलाधरः ॥ १

कर्मठः केवली कर्म–काष्ठाग्निः करुणापरः ।
चक्षुष्यश्चतुरः कर्ममुक्तः कल्याणमन्दिरः ॥ २

क्रियादक्षः क्रियानिष्ठः क्रियावान् कामितप्रदः ।
कृपाचणः कृपाचञ्चुः कीर्तिदः कपटोज्झितः ॥ ३

चन्द्रप्रभः छलोच्छेदी चन्द्रोपासितपत्कजः ।
क्रियापरः कृपागारः कृपालुः केशदुर्गतः ॥ ४

कारणं भद्रकूपारः, कलावित् कुमतान्तकृत् ।
मद्रपूर्णः कृतान्तज्ञः कृतकृत्यः कृपापरः ॥ ५

कृतज्ञः कमलादाता कृतान्तार्थप्ररूपकः ।
भद्रमूर्तिः कृपासिन्धुः कामघटः कृतक्रियः ॥ ६

कामहा शोचनातीतः कृतार्थः कमलाकरः ।
चारुमूर्तिश्चिदानन्द–श्चिन्तामणिश्चिरन्तनः ॥ ७

चिदानन्दमयश्चिन्ता–वर्जितो लोभतर्जितः ।
कर्महा बन्धमोक्षज्ञः कृपावान् कान्तिकारकः ॥ ८

कजनेत्रो नरत्राता कृतपुण्यः कृतान्तवित् ।
लोकाग्रणीवि(र्वि)रोधघ्नः कीर्तिमान् खगसेवितः ॥ ९

अयाचितो महोत्साह-श्चिद्रूपश्चिन्मयो वृतिः ।
भद्रयुक्तः स्वयंबुद्धो-ऽनल्पबुद्धिर्दमेशिता ॥ १०

विश्वकर्मा कलादक्षः कल्पवृक्षः कलानिधिः ।
लोभतिरस्कृतः सूक्ष्मो लोभहृत् कृतलक्षणः ॥ ११

लोकोत्तमो जनाधीशो लोकध्याता कृपालयः ।
सूक्ष्मदर्श्येन्दुनीलाभो लोकावतंसकः क्षमः ॥ १२

शिष्टेष्टोऽप्रतिभः शान्ति-श्छत्रत्रयविभूषितः ।
चामीकरासनारूढः श्रीशः कल्याणशासनः ॥ १३

कर्मण्योऽत्रभवान् भद्रः शान्तिकरः प्रजाहितः ।
भव्यमानवकोटीरो मुक्तिजानिः श्रियांनिधिः ॥ १४

कल्याणशतम् ॥१०००॥

अमूनि तव नामानि पठन्ति ये नरोत्तमाः ।
भवेयुः सम्पदस्तेषां सिद्धयश्चापि मञ्जुलाः ॥ १

स्वामिन् ! जिह्वासहस्रोऽपि, वक्तुं शक्तो न ते गुणान् ।
सहस्राक्षो न ते रूप-श्रियं निरीक्षितुं क्षमः ॥ २

त्वच्चेतसि प्रवर्तेऽह-मित्युदन्तो हि दुर्लभः ।
मच्चिते विद्यसे त्वं चेत् देवेनान्येन पूर्यताम् ॥ ३

हर्षबाष्पजलैर्भव्यै-र्मन्नेत्रे त्वन्मुखाश्रिते ।
अन्यप्रेक्षणसम्भूतं क्षालय(ये)तां मलं निजम् ॥ ४

त्वद्वक्त्रसङ्गिनी नेत्रे त्वत्परीष्टिकरौ करौ ।
त्वद्गुणग्राहके श्रोत्रे भूयास्तां मे मुदा सदा ॥ ५

ऋद्धित्वं हि प्रभुत्वं वा मनोवाञ्छितमन्वहम् ।
सौभाग्यत्वं नृपत्वं वै लभेरन् तव भक्तितः ॥ ६

त्वमसि नाथ ! भवार्णवनाविक-
स्त्वमसि सौख्यकदम्बककारकः ।
त्वमसि सिद्धिवधूस्तननायक-
स्त्वमसि सप्तनयार्थविचक्षणः ॥ ७

त्वमसि दुःखनिवारणतत्पर-स्त्वमसि मुक्तिवशारतिहर्षितः ।
त्वमसि भव्यकुशेशयभास्कर-स्त्वमसि देवनराधिपसेवितः ॥८

त्वमसि मोहमतङ्गजकेशरी त्वमसि नाथ ! जगज्जनवत्सलः ।
त्वमसि दुःकृतमन्मथशङ्कर-स्त्वमसि कोपशिलोच्चयमुद्गरः॥ ९

भृत्योऽस्मि तव दासोऽहं विनयी तेऽस्मि किङ्करः ।
नाथ ! त्वच्चरणाधारो लभे शं भवदाश्रितः ॥ १०

जयन्तु ते श्रीगुरुधर्ममूर्तयो गणाधिराजा मुनिसङ्घपालकाः ।
अनेकवादीश्वरवादसिन्धुरा-
भिमानपञ्चास्यनिभाः क्रियापराः ॥ ११

श्रीधर्ममूर्तिसूरीशाः सूरिश्रेणिवतंसकाः ।
कल्याणवपुषो नूनं चिरं नन्दन्तु सत्तमाः ॥ १२

तदंह्रिकजरोलम्बः शिष्यः कल्याणसागरः ।
चकार पार्श्वनाथस्य नामावलीमभीष्टदाम् ॥ १३

पुण्यरूपमिदं स्तोत्रं नित्यमध्येति भाक्तिकः ।
तस्य धाम्नि महालक्ष्मी-रेधते सौख्यदायका ॥ १४

अज्ञातकर्तृकम्

## ३. ॥ श्रीपार्श्वसहस्रनामस्तोत्रम् ॥

पार्श्वः पातु नताङ्गिनो भवभयात्पार्श्वं नता नाकिनः
पार्श्वेणैव तिरस्कृतः सकमठः पार्श्वाय नित्यं नमः ।
पार्श्वाद् व्याधिकदम्बकं व्यपगतं पार्श्वस्य चिह्नं फणी
पार्श्वे भान्ति नवस्फणा शिवसुखं पार्श्व ! प्रयच्छ प्रभो ॥ १

॥ अथ ध्यानम् ॥

ध्यायेत् तं पार्श्वनाथं रजतगिरिनिभं चारुपद्मासनस्थम्
देवेन्द्रैर्वीज्यमानं विमलसुरसरिच्चामरैश्चारूपम् ।
श्वेतच्छत्रालिमालाकलितकलरवं दुर्गमध्यस्थशालम्
छायाच्छन्नातपत्रं घनजलदनिभं देवदेवीभिराढ्यम् ॥ २

अथ श्री सहस्रनाम

ओङ्काररुप ओमात्मा ओमितिन्यस्तचेतनः ।
ओमाकारासनासीन ओङ्काराङ्गनखप्रभः ॥ ३

ओंमुद्रितमुखाकार ओङ्काराश्रितवाग्घरिः ।
ओङ्कारध्यानसंलीन ओङ्कारशिरसि स्थितः ॥ ४

ओङ्कारपरमानन्द ओङ्कारैकसुखप्रदः ।
ओङ्कारविभवज्ञानी ओङ्कारसुषमाभरः ॥ ५

ओङ्काराद्यस्तवग्राह्य ओङ्कारविभवान्वितः ।
ओङ्कारसुखसंदर्शी ओङ्कारकृतपावनः ॥ ६

ओङ्कारैकजनत्राता ओङ्कारोन्नतिदेशकः ।
ओङ्कारपदसंसक्त ओमोमऽणुन्नमध्यगः ॥ ७

निर्म्मलो नीरजो नाथो निर्विकल्पो निरामयः ।
निश्शरीरो निरातङ्को निमित्तज्ञो निरञ्जनः ॥ ८

निष्कलङ्को निरालम्बो निर्म्मोहो निर्म्मलोत्तमः ।
निर्भयो निरहङ्कारो निर्विकारोऽथ निष्क्रियः ॥ ९

निर्दोषो निर्म्मलो नान्तो निस्तरङ्गो निराश्रयः ।
निर्भेद्यो निर्ममोऽनन्तो निरीहो निरघोऽनघः ॥ १०

निर्वेदो निरुपमज्ञो निस्पृहोऽपि निरन्तकः ।
निस्समो नामभृन्नीरुक् नरकावासहारकः ॥ ११

निस्सङ्गो निष्कलो नीरो निश्शब्दो निरवग्रहः ।
निस्सहायो नीरमणो नीरिरंसो नरेन्द्रजित् ॥ १२

मायाबीजमयो मद्रो महामोहविनाशकः ।
महादर्शी महाभावो महामुक्तिप्रदायकः ॥ १३

महाज्ञानी महायोगी महितो महिमावरः ।
महावृद्धिर्महावीर्यो मगसीपुरमण्डनः ॥ १४

महापूज्यो महावन्द्यो महाविघ्नविनाशकः ।
महासौख्यो महेन्द्राच्यो महासौख्यप्रदायकः ॥ १५

महामुक्तैकसिद्धात्मा महामात्यो महेश्वरः ।
महाराजो महाधीरो महादुष्कृतनाशनः ॥ १६

महामुक्तिपुराधीशो महाहृद्यो महद्गुरुः ।
मारहन्मारविध्वंसी मर्म्माच्छादनतत्परः ॥ १७

मुक्तोऽथ मण्डलाधीशः पूज्यपादो महीश्वरः ।
महीराजो महामोदो मण्डलीभृन्मनोहरः ॥ १८

महत्सुखभरावासो मोक्षस्थानो महीधरः ।
महीवरोऽमराधारो मुनीन्द्रो मुनिसत्तमः ॥ १९

महानन्दो महापूज्यो मनोभवमनोहरः ।
महामान्द्यपरित्राता मदहृन्मदनान्तकः ॥ २०

महाव्याधिपरिग्रस्तमोचको मार्गदेशकः ।
महेन्द्रादिभिरभ्यर्च्यो मुमुक्षुध्यानगोचरः ॥ २१

महारूपो मुदोदायी मनःपर्यायबोधकः ।
ममत्ववर्जितो मेघवर्णो मानसनिर्म्मलः ॥ २२

मेचको मञ्जुवाङ् मौनी मुनीनां मार्गबोधकः ।
महत्सुप्राप्तसंसर्गो मोहत्राणपरायणः ॥ २३

मायया रहितो माद्यन्मानमुद्राविवर्जितः ।
मतिज्ञानधराधरो महेन्द्रो महिमाश्रयः ॥ २४

महाबोधिपरिज्ञाता मुद्रामुद्रितलोचनः ।
मञ्जुनाभिर्मञ्जुलाक्षो महामोहतमोहरः ॥ २५

मद्रमुद्रासनाराध्यो मुक्तिदो मुक्तिवल्लभः ।
मुक्तिध्यानधरो मन्द्रो मर्म्मज्ञो मङ्क्षु कर्महा ॥ २६

मकारो मातृसंसिक्तमरीचिर्महसोज्वलः ।
महाधीरपदोऽमोघो महेच्छो मतिवर्धनः ॥ २७

मतिदो मन्थरो मन्त्रो मन्त्रदो मन्त्रपो मुनिः ।
मणिरम्यो मणिभ्राता मणिकुण्डलमण्डितः ॥ २८

मेधावी मुग्धमोक्षार्थी मोक्षोपरिसमाश्रितः ।
मानदो मकराधीशो मधुरो मणिरञ्जितः ॥ २९

माधवो मल्लिकागन्धी माद्यन्मलयजार्चितः ।
मेलका मल्लिकाश्वासो मालतीकुसुमाशयः ॥ ३०

मालतीपूज्यपादाब्जो मघानाथो मलापहा ।
माणिक्यरोचिर्माङ्गल्योऽमन्दवन्द्यो मनुःप्रभुः ॥ ३१

मनस्थो मरूदाधारो मेरुसिंहासनस्थितः ।
मेनकातनयाभ्यर्च्यो मेघनादतडित्प्रभः ॥ ३२

महावीरो मुनिश्रेष्ठो मनःक्लेशविनाशकः ।
मुनिपो मुनिराट् मञ्जुर्मनोमलविशोधकः ॥ ३३

अजरोप्यमरोऽरूपः अचिन्त्योऽस्यक्षयोऽममः ।
अमूर्तोप्यच्युतोऽनन्तोऽप्यनिन्द्यो ह्यमरार्चितः ॥ ३४

अप्रमेयोऽप्यनिन्द्यात्मा अकाराक्षरसंयुतः ।
अजातोऽप्यभवोऽभीमोऽप्यवाङ्मनसगोचरः ॥ ३५

अव्ययोऽव्ययसंलीनोऽदीनोऽहीनसुसेवितः ।
अनेयोऽनुपमोऽनन्यः (?) अव्याबाधो ह्यनीश्वरः ॥ ३६

अच्छेद्योऽप्यजयोऽनीतः (?) अनन्तानन्तधीश्वरः ।
अजितोऽमन्दभाग्यश्च (?) अष्टकर्मविवर्जितः ॥ ३७

अभावप्राप्तकैवल्यः श्वामेयोऽमितमण्डनः ।
अनूनपरमज्ञानी अनङ्गालयवर्जितः ॥ ३८

अनामयोप्यनाहार्यो (?) अनर्थी चार्थनाहरः ।
अनम्योऽगम्यरूपश्च (?) अव्यक्तोप्यसुरार्चितः ॥ ३९

असाध्योऽनदयोऽदम्भोऽप्यकर्मा चाजडोऽनलः ।
अनिन्द्यरूपोऽप्यध्यात्ममतिप्रसवसंस्कृतः ॥ ४०

अमलोऽप्यद्भूताकारो (?) ह्ययोनिदुरोदुरः ।
अनासाद्योऽप्यजेयोऽपि (?) अश्राव्योऽप्यनिलात्मकः ॥ ४१

अश्वसेनाङ्गसूरश्वसेनायानुदुतोऽपरः ।
अनायासविनिर्मुक्तराज्यलक्ष्मीरभीरुधीः ॥ ४२

आनन्दरूप आचार्य आद्य आत्मावबोधिदः ।
आकाररहितोप्यारनिवर्त्तनपरायणः ॥ ४३

आननाभानिरस्ताब्ज आर्द्रभावधरायतिः ।
आभीरादिजनत्राता आनन्दद्युतिवर्धनः ॥ ४४

आहारविधिनाऽदृश्य आशुशुक्षणिवन्महाः ।
आकारमण्डलाधीश आकाशाकारहृत्पदः ॥ ४५

आसमुद्रधराधार आनन्दाङ्कुरवर्धकः ।
आदित्यबिम्बवत्तेजा आदेयाख्यावधारकः ॥ ४६

इन्दिराधार इन्द्रेश इन्दुमण्डलमध्यगः ।
इन्द्रियाणामधिष्ठाता इन्द्रियविजयक्षमः ॥ ४७

इनराज इलारक्षी इकाराकारपीवरः ।
इलाराध्य इलापूज्य इलामण्डलसौख्यदः ॥ ४८

इलादायी इलावृद्धः इलाभोजी इलापतिः ।
इलावर्धनः संतुष्ट (३००) इलाभोगपराङ्मुखः ॥ ४९

ईश्वरोऽपीतिहा ईदृग् ईशान ईश्वरार्चितः ।
ईहापोहविनिर्मुक्त ईकाराश्रितविग्रहः ॥ ५०

ईरितानेकवीरश्रीईश्वरीपतिपूजितः ।
ईश्वरोऽपीश्वराणां च ईश ईश्वरवर्जितः ॥ ५१

उन्नतेःकारकोऽप्युच्च (?) उच्चैरुद्भव उत्सवः ।
उद्धृताशेषकर्मारी (?) उभयान्वयवर्धनः ॥ ५२

ऊकाररूपरुत्कृष्ट दृरूपः पितृवर्जितः ।
एकारैकाररूपश्च ओकारौकारमध्यगः ॥ ५३

अम्बुजाक्षोऽम्बुजधरोऽञ्जनाद्रिमणिसत्प्रभः ।
आदिदेव आदिरूप आगमार्थावबोधकः ॥ ५४

कमलाकारकः कर्मकमठासुरमर्दनः ।
कालिकारमणः कामधेनुः कामलताश्रयः ॥ ५५

कामः कमलपत्राक्षः कलकण्ठशिशुध्वनिः ।
कलिमुक्तः कलाशाली कलः कलरवध्वनिः ॥ ५६

केकीकण्ठशरीराभः कालहा कालवर्जितः ।
कमनः कामहा कामः कामदः काममर्दनः ॥ ५७

कामीनीकमनः कन्दः कामवल्याः कलावधिः ।
कलबुद्धिः कलाऽलोलः कदलीगर्भकोमलः ॥ ५८

कुलाधारः कुलानन्दी कुलीनः कुलवर्धनः ।
कुलप्रधानः कुलभृत् कुशली कुसुमार्चितः ॥ ५९

कल्याणकर्त्ता कामज्ञः केवलज्ञानभासुरः ।
कर्पूरामोदनिःश्वासः कस्तूरीघर्षविग्रहः ॥ ६०

कलनानिर्गतः कज्जलाभकायः कलानिधिः ।
कर्मवर्मविनिर्मुक्तः कायस्थः कायवर्जितः ॥ ६१

कूर्चलोमाहतश्मश्रु कूटकोटिविनाशनः ।
कूर्मवत्पदसंस्कारः कूर्म्मभारधुरन्धरः ॥ ६२

केतकीगन्धसङ्काशः केसरामोदमोदितः ।
केतकीपुष्पसंतुष्टः केतकीगर्भसम्भवः ॥ ६३

कलिकुण्डकलाधारः कीलितानेकशात्रवः ।
कम्बुकण्ठः कम्बुधरः केशयः केशवर्धितः ॥ ६४

कुन्दस्य कलिकाकाररदनः कमलासनः ।
कमलासनसंपूज्यः कमलानाथनायकः ॥ ६५

कृतकर्मपरित्राता कृष्णः कृष्णावबोधिदः ।
कृच्छ्रहा करुणाशक्तः कर्मठः कीर्तिवल्लभः ॥ ६६

कुण्डलीसेवितपदः कुण्डलाभरणद्युतिः ।
कुण्डलीकृतसूर्याब्जः (४००) कुण्डलारक्तगण्डभः ॥ ६७

कर्त्ता कल्पकरः कल्पवपुः कल्पविनाशनः ।
कलिः कलिप्रियः कुञ्जमतिः कुञ्जरबन्धुरः ॥ ६८

कमनीयः कृतोमूर्तिः कासरोगविमर्दनः ।
कृतकृत्यः कृपानाथः कमली कमलावरः ॥ ६९

केमद्रुमहरोऽकामः काञ्चनासनमाश्रितः ।
काञ्चनाम्बुजपत्पद्मः किञ्चनः काञ्चनाश्रयः ॥ ७०

कौमारवयसिप्राप्तधर्मः कर्मविवर्जितः ।
कीरीटी किरणाशाली कृतज्ञः कल्मषापहः ॥ ७१

कीरीटमध्यमाणिक्यज्योतिद्योतितविग्रहः ।
क्लीँकाररूपः किञ्जल्कस्थायी कमलमध्यगः ॥ ७२

कलत्रदः ककुब्नाथः कीटकुञ्जररक्षकः ।
कलामुहूर्त्तरूपश्च करहेटकमुक्तिदः ॥ ७३

खचरः खचरैरर्च्यः खरूपः खेटनायकः ।
खलतादुर्ग्गतः खेलः खचरीषु रतिप्रदः ॥ ७४

गणेशो गणपो गूढो गूढात्मा गूढविग्रहः ।
गणनाथो गणश्रेष्ठो गणभृद् गणगोऽगगः ॥ ७५

गुणवान् गणपाराध्यो गुणो गुणनिधिर्गुरुः ।
गम्भीरो गोपतिर्गोप्ता गीपतिर्गजसन्निभः ॥ ७६

गीर्वाणपूज्यो गीर्वाणो गुणज्ञो गतिदायकः ।
गदहारी गणेन्द्राढ्यो गोपालो गगनाश्रयः ॥ ७७

गीर्वाणाततसच्छत्रो गीर्वाणमणिधृष्टपत् ।
गहनार्थधरो गौडीनामा गणपरिवृढः ॥ ७८

गलकुष्ठहरो गङ्गापावनो गणणातिगः ।
गजेन्द्रभयसङ्गोप्ता गतिर्निर्जितसद्द्विपः ॥ ७९

गङ्गातीरोषितोऽगम्यो गोचरैरर्जितोऽग्रहः ।
गुरुगम्यो गतारातिर्गणराजो गतागतिः ॥ ८०

गहनो गभस्तिमाली गयागोदावरीमयः ।
गन्धर्वपतिभिर्गेयः गतागतनिवारकः ॥ ८१

गुणस्थापनक्रमारो विलगङ्गिताष्टकृतेर्गणः ।
गर्वहारीगुणग्रामो ग्रहपीडानिवारकः ॥ ८२

गकाररूपो गेयज्ञो गरदो गरिमाश्रयः ।
गिरिशार्चितचरणो गायत्रीगतिरञ्जितः ॥ ८३

गीतिप्रियो गुणाम्भोधिर्गीतागीतयशाः गतीः ।
गुणत्रयमयो गौणो गन्धवान् गौरवादृतः ॥ ८४

गूढशक्तिर्गणाध्यक्षो गणमुख्यो गणेश्वरः ।
गणपूज्यो गुणोपेतो गुणवाद्यो गुणोत्सवः ॥ ८५

गविष्ठो गुणरम्यश्च गोविन्दैकप्रियो गृहम् ।
गाम्भीर्यधारको गर्भाशयहर्त्ता गभीरधीः ॥ ८६

गोपालो गोर्गुणाविष्टो गर्भायुर्गर्भरक्षकः ।
गुणीशो गर्भसंमोक्ता गणत्राणपरायणः ॥ ८७

घनगंभीरनिर्घोषो घृणी घृणिमदाश्रयः ।
घनाभो घनकर्मारिर्हरोऽर्थकरोऽधहा ॥ ८८

घननाथो घनश्यामो घनसारसहोदरः ।
घनमूर्तिर्घराध्यो घनबन्धुर्घृतात्मकः ॥ ८९

घरूपो घोरसङ्ख्यज्ञो घनशब्दो घनावहः ।
घातकाघातसंहर्त्ता घातिकर्म्महरोऽघदः ॥ ९०

चरश्चिन्तामणिश्चारुश्चर्चसाचर्च्चितोऽर्चितः ।
चिन्तामणिसमश्चिन्ताशादश्रेणिसहस्रपात् ॥ ९१

चञ्चुराभश्चिरंजीवी चरित्रं चरतांपतिः ।
चराचरगुरुश्चञ्चुश्चन्दनद्रुमसन्निभः ॥ ९२

चतुर्वेदमयश्चित्रश्चित्रगामी चतुर्मुखः ।
चतुरात्माचमत्कारकृच्चराचररञ्जकः ॥ ९३

चारित्रवाँश्चित्तहारी चरित्रोऽचञ्चलाशयः ।
चित्रवपुश्चित्रपतिश्चित्राङ्गदविभूषितः ॥ ९४

चतुरस्रश्चतुर्मूर्तिश्चतुरश्च चतुराश्रयः ।
चतुर्भुजश्चारुचक्षुश्चलचामरवीजितः ॥ ९५

चक्रवर्तिपतिश्चन्द्रश्चन्द्रमण्डलमण्डनः ।
चार्व्वाकीयमतेऽमान्य चन्द्रश्चन्द्रसमप्रभः ॥ ९६

चिन्त्योऽचिन्त्यगुणोऽचापी चारुवेशोऽचरोऽचलः ।
चिद्रुपश्चिन्मयश्चिद (?) स्वरूपश्चारुदायकः ॥ ९७

चेतनाकारकश्चित्तिश्चन्दनाचलसंस्थितः ।
चम्पकप्रकरासीनः चेतश्चिन्तापहारकः ॥ ९८

छत्रं छत्रपतिश्छत्री छत्राछन्नककुम्मुखः ।
छत्रत्रयतलाविष्टश्छत्रीकृतसरीसृपः ॥ ९९

छन्दसपतिरच्छन्दश्छन्दनश्छन्दविग्रहः ।
छन्दोमयच्छेकपतिश्छेकीकृतजनालिखः ॥ १००

छिद्रहा छिन्नसंतापश्छलहा छलनाहरः ।
छविभृच्छविसंलीनश्छत्रायाछन्नदिगन्तरः ॥ १०१

छिन्नशोकश्छकारात्मा छोछश्छूच्छश्छदस्थितः ।
छन्नाकारश्छंविश्छदश्छेकश्छेदनवर्जितः ॥ १०२

जयश्रीर्जगदाधारो जगदानन्ददायकः ।
जगन्नाथो जगत्पूज्यो जगदीशो जिनेश्वरः ॥ १०३

जनाराध्यो जनानन्दी जीरापल्लिर्जितेन्द्रियः ।
जिताहारो जिनेशार्च्यो जयवाञ्जगतीपतिः ॥ १०४

जगतीतिलको ज्योतिरूपो जगतिवल्लभः ।
ज्योतिर्मयो जरीजृम्भज्ज्ञानो जगतिभास्करः ॥ १०५

जगत्पतिर्जगज्जेता जगज्ज्योतिर्जगन्मणिः ।
जीवनं जीवदो जीवो जगन्मित्रं जगत्प्रभुः ॥ १०६

जगत्स्त्रष्टा जगद्‌बन्धु जगत्शोभो जगद्‌गुरुः ।
जगत्कर्ता जगद्भर्त्ता जगद्रुपो जगन्मयः ॥ १०७

जगत्सृष्टिकरो जम्बूनदसिंहासनाश्रयः ।
जङ्गमो जगतीस्वामी जगज्जीवनजीवनः ॥ १०८

जिनराजो जिनैः पूज्यो जिनहा जिनवर्धनः ।
जगन्मृत्युर्जगदातङ्कहरो जाड्यविनाशकः ॥ १०९

जालन्ध्रस्थो जनाध्यक्षो जनको जनरञ्जकः ।
जेता जिष्णुर्जयाकारो जयहेतुर्जयेश्वरः ॥ ११०

जयदो जित्वरो जह्नो जीवनाथो जलेश्वरः ।
जीवदो जननध्वंसी जयभूमिर्जनाश्रयः ॥ १११

ज्ञानी ज्ञानभृतांश्रेष्ठः ज्ञानिनां ज्ञानगोचरः ।
ज्ञानवान् ज्ञानदोऽज्ञानी ज्ञान्यवनपरायणः ॥ ११२

तारकस्तरणस्त्राता तन्द्राघ्नस्तिमिरापहः ।
तरुणस्त्रैलोक्यदीपः तपस्वी तपनद्युतिः ॥ ११३

तेजस्वी तपतांश्रेष्ठः तपनस्तेजसांपति ।
तीर्थप्रियस्तीर्थकर्ता तीर्थदस्तीर्थवल्लभः ॥ ११४

तातस्तत्त्वगतिस्तन्द्राविहीनस्तरणीस्तरन् ।
तमोरिपुस्तमोरातिस्त्रिविष्टपपतेः पतिः ॥ ११५

तेजोनिधिस्तीर्थपतिस्त्रिकशोभासमुन्नतः ।
त्रयीमयस्त्रिलोकेशस्त्र्यग्निरुपस्त्रपामयः ॥ ११६

तटस्थस्तरुणीकर्णकटाक्षाद्यवनिर्जितः ।
तपस्तीव्रस्तरस्वी च तेजोमयविलोचनः ॥ ११७

तस्करादिभयत्राता त्रिदेवमयविग्रहः ।
तरुणाञ्जनसमाकारस्तिथिरूपः तरिसमः ॥ ११८

तत्त्वज्ञस्तत्त्वभृद् त्राता तर्कज्ञस्तर्कमूलहा ।
त्रिकालज्ञस्त्रिलिङ्गघ्नस्त्रिमूर्त्तिस्त्रीपदीधरः ॥ ११९

तार्क्ष्यपूज्यस्तमीन्नाथस्ताराभूषणभूषितः ।
तारापतिस्तारकेशस्तरूपस्त्यक्तसंसृतिः ॥ १२०

स्थितेः कर्त्ता स्थितिस्थायी स्थिरबुद्धिः स्थिरेन्द्रियः ।
स्थिरज्ञानी स्थिराराध्यः स्थिरनिष्ठः स्थिराश्रयः ॥ १२१

देवपूज्यो दिवानाथो देवदवो दरिद्रहा ।
दमी दिव्यो दिवानाथो दैत्यपूज्यो दिवाकृतिः ॥ १२२

दाडिमबीजदन्तालिर्दीनपो दायवल्लभः ।
दीर्घदर्शी द्युतिभरो देवनाथो दिनेश्वरः ॥ १२३

द्वादशाङ्गीधराधारो दीर्घबाहुर्दरापहः ।
दशावतारो दीप्ताङ्गो (८००) दन्दशूकभयापहः ॥ १२४

दीननाथो दयासिंधुर्दयालुर्दीधितिप्रियः ।
दीपको दानदो दिव्यदेहो दम्भभरापहः ॥ १२५

दिगम्बरो दरीसेवी दीप्तिमान्देववल्लभः ।
देवाराध्यो दयादर्शी दर्प्पकद्युतिर्दर्पहाः ॥ १२६

धर्म्मद्रुमो धरानाथो धराराजो धनेश्वरः ।
धरापूज्यो धर्मशाली धर्मदो धर्मवल्लभः ॥ १२७

धर्मज्ञो धवलच्छत्री धर्मात्मा धृतिमान् धवः ।
धाम धैर्यरतो धीरो धैर्य्यकृद् धैर्यवर्धकः ॥ १२८

ध्रुवो धीमान् धर्मकर्त्ता धरणीधारको धरः ।
धर्माध्यक्षो धराधरो धर्मभारधुरन्धरः ॥ १२९

धर्मराजो धर्मगतिर्धरणेन्द्रप्रभुर्धनम् ।
धकाररूपो धनदो धीप्रदो धृतिदो धृतिः ॥ १३०

नीतिदो नीतिधर्मज्ञो नीतिकृन्नयनाहरः ।
नातिलव्यो नतारातिनीलरत्नसमद्युतिः ॥ १३१

नानाकोडपुराधीशो नरेन्द्रकृतपूजनः ।
नरराजो नरीनृत्यन्नाकिनारीनिधिप्रदः ॥ १३२

पार्श्वनाथः परंब्रह्म परमेष्ठिपितामहः ।
पुराणपुरुषः पूर्णः परमात्मा परात्परः ॥ १३३

पृष्टतश्चैत्यशाखीन्द्रः प्रणतेन्द्रः प्रतापवान् ।
पवित्रात्मा पद्महस्तः पापहा पार्श्वसेवितः ॥ १३४

पद्मावतीपूज्यपादः प्रभुः प्रत्यूहनाशकः ।
पादपीठस्थितः पालः प्राकारत्रयवेष्टितः ॥ १३५

परः प्रभावतीजानि प्रीतिदः प्रीतिवल्लभः ।
पद्मासनसुखासीनः परहा परमेश्वरः ॥ १३६

फणी–फणाभृतांश्रेष्ठः फणीशार्चितपत्कजः ।
फलवर्धीपुराधीशः फलदः फलभृत्फली: ॥ १३७

बली बलवतां श्रेष्ठो बलभद्राच्चर्य यतपरः ।
भगवान् भाग्यदो भव्यो भूतभव्यविभावनः ॥ १३८

भामण्डलधरो भोगी भोगलक्ष्मविभूषितः ।
भव्यप्रियो भूतपतिर्भूतीशो भूतिदायकः ॥ १३९

भडक उलपूराभ्यर्च्यो भवतापनिवर्त्तकः ।
भक्तप्रियो भूरपतिर्भूरिदो भवनेश्वरः ॥ १४०

यशस्वी यतिना पूज्यो योगिनां हृदिसंश्रया ।
यज्ञकर्म–फलयज्ञो योगीशो यमिनाम्पतिः ॥ १४१

यमीयत्नः प्रियोयद्धा यज्वानां फलदायकः ।
रम्भापती रमाधीशो रत्नदायी रणपहः ॥ १४२

राज्यदो राज्यतृण्मुक्तो राजपुत्रो रजोहरः ।
रक्तास्यनेत्रपद्धस्तो रकारात्मा रतिप्रदः ॥ १४३

लक्ष्मीबीजं लकारात्मा लक्ष्मीधवपतिर्ललः ।
लीलाप्रदो लब्धसुखो लब्धिदो लब्धिनां पतिः ॥ १४४

लाभदोऽलालसोऽलोभी ललनाभाववर्जितः ।
वाराणसीशो वाल्मीकार्चर्च्चितो वह्निभीतिहा ॥ १४५

वीतरागो विष्टिहरो वामोदरदरीहरीः ।
शम्भुः शङ्करसंपूज्यः शयदायी सरोरूहः ॥ १४६

शरण्यः शीतलः श्रेष्ठः श्रेयस्कारी शितिद्युतिः ।
सञ्जध्वनिः षडक्षीणः षडूर्म्मिभयभञ्जनः ॥ १४७

षड्कायरक्षकः षष्ठः संसिद्धिः सिद्धिदायकः ।
सिद्धान्तवल्लभः साधुपूजितः सुरसार्थदः ॥ १४८

स्तम्भतीर्थकरः सेव्यः सुरसेव्यः सुरान्वितः ।
सिताष्टदलमध्यस्थः सर्वाराधनसिद्धिदः ॥ १४९

सिद्धिराजः सचीपूज्यः सर्वेशः सर्वसिद्धिदः ।
हारकान्तिर्हराधारो हीरकावयवद्युतिः ॥ १५०

हरीशानो हंसगतिः ह्राँ ह्रीँ ह्राँ रूपधारकः ।
हूहूगीतयशाः हारी हयसिनसमाश्रितः ॥ १५१

क्षेमङ्करः क्षेमकर्त्ता क्षोमभृत् क्षितिवल्लभः ।
क्षौंरूपः (१०००) क्षमया युक्त क्षोणीशः क्षितिपावनः ॥१५२

क्षेंकाररूपः क्षितिपः क्षोमयायी क्षितिप्रदः ।
इत्येतत्कथितं नामसहस्त्राष्टकमादरात् ॥ १५३

श्रीपार्श्वजिनेशस्य स्तोत्रं सद्बुद्धिदायकम् ।
ये पठन्ति सदा भक्त्या त्रिसन्ध्यं श्रद्धयान्वितम् ॥ १५४

ते निर्वाणपदं यान्ति मुच्यते नात्र संशयः ।

कलिकालसर्वज्ञ पू.आ.श्रीहेमचन्द्रसूरिविरचितः

# ४. ॥ श्रीअर्हन्नामसहस्रसमुच्चयः ॥

(अनुष्टुप्)

## प्रथमशतप्रकाशः

अर्हन्नामापि कर्णाभ्यां, शृण्वन् वाचा समुच्चरन् ।
जीवः पीवरपुण्यश्री-र्लभते फलमुत्तमम् ॥ १

अत एव प्रतिप्रातः, समुत्थाय मनीषिभिः ।
भक्त्याऽष्टाग्रसहस्राऽर्ह-न्नामोच्चारो विधीयते ॥ २

श्रीमानर्हन् जिनः स्वामी, स्वयम्भूः शम्भुरात्मभूः ।
स्वयम्प्रभुः प्रभुर्भोक्ता, विश्वभूरपुनर्भवः ॥ ३

विश्वात्मा विश्वलोकेशो, विश्वतश्चक्षुरक्षरः ।
विश्वविद् विश्वविद्येशो, विश्वयोनिरनीश्वरः ॥ ४

विश्वदृश्वा विभुर्धाता, विश्वेशो विश्वलोचनः ।
विश्वव्यापी विधुर्वेधाः, शाश्वतो विश्वतोमुखः ॥ ५

विश्वपो विश्वतः पादो, विश्वशीर्षः शुचिश्रवाः ।
विश्वदृग्विश्वभूतेशो, विश्वज्योतिरनश्वरः ॥ ६

विश्वसृड् विश्वसूर्विश्वेट्, विश्वभुग् विश्वनायकः ।
विश्वाशी विश्वभूतात्मा, विश्वजिद् विश्वपालकः ॥ ७

विश्वकर्मा जगद्विश्वो, विश्वमूर्त्तिर्जिनेश्वरः ।
भूतभाविभवद्भर्त्ता, विश्ववैद्यो यतीश्वरः ॥ ८

सर्वादिः सर्वदृक् सार्वः, सर्वज्ञः सर्वदर्शनः ।
सर्वात्मा सर्वलोकेशः, सर्ववित् सर्वलोकजित् ॥ ९

सर्वगः सुश्रुतः सुश्रूः, सुवाक् सूरिर्बहुश्रुतः ।
सहस्रशीर्षः क्षेत्रज्ञः, सहस्राक्षः सहस्रपात् ॥ १०

युगादिपुरुषो ब्रह्मा, पञ्चब्रह्ममयः शिवः ।
ब्रह्मविद् ब्रह्मतत्त्वज्ञो, ब्रह्मयोनिरयोनिजः ॥ ११

ब्रह्मनिष्ठः परब्रह्मः, ब्रह्मात्मा ब्रह्मसम्भवः ।
ब्रह्मेड् ब्रह्मपतिर्ब्रह्म-चारी ब्रह्मपदेश्वरः ॥ १२

विष्णुर्जिष्णुर्जयी जेता, जिनेन्द्रो जिनपुङ्गवः ।
परः परतरः सूक्ष्मः, परमेष्ठी सनातनः ॥ १३

## द्वितीयशतप्रकाशः

जिननाथो जगन्नाथो, जगत्स्वामी जगत्प्रभुः ।
जगत्पूज्यो जगद्वन्द्यो, जगदीशो जगत्पतिः ॥ १

जगन्नेता जगज्जेता, जगन्मान्यो जगद्विभुः ।
जगज्ज्येष्ठो जगच्छ्रेष्ठो, जगद्ध्येयो जगद्धितः ॥ २

जगदर्च्यो जगद्बन्धु-र्जगच्छास्ता जगत्पिता ।
जगन्नेत्रो जगन्मैत्रो, जगद्दीपो जगद्गुरुः ॥ ३

स्वयञ्ज्योतिरजोऽजन्मा, परं तेजः परं महः ।
परमात्मा शमी शान्तः, परं ज्योतिस्तमोऽपहः ॥ ४

प्रशान्तारिरनन्तात्मा, योगी योगीश्वरो गुरुः ।
अनन्तजिदनन्तात्मा, भव्यबन्धुरबन्धनः ॥ ५

शुद्धबुद्धिः प्रबुद्धात्मा, सिद्धार्थः सिद्धशासनः ।
सिद्धः सिद्धान्तविद् ध्येयः, शुद्धः साध्यः सुधीः सुगीः ॥ ६

सहिष्णुरच्युतोऽनन्तः, प्रभविष्णुर्भवोद्भवः ।
स्वयम्भूष्णुरसम्भूष्णुः, प्रभूष्णुरभयोऽव्ययः ॥ ७

दिव्यभाषापतिर्दिव्यः, पूतवाक् पूतशासनः ।
पूतात्मा परमज्योति-र्धर्माध्यक्षो दमीश्वरः ॥ ८

निर्मोहो निर्मदो निःस्वो, निर्दम्भो निरुपद्रवः ।
निराधारो निराहारो, निर्लोभो निश्चलोऽचलः ॥ ९

निष्कामी निर्ममो निष्वक्, निष्कलङ्को निरञ्जनः ।
निर्गुणो नीरसो निर्भी-र्निर्व्यापारो निरामयः ॥ १०

निर्निमेषो निराबाधो, निर्द्वन्द्वो निष्क्रियोऽनघः ।
निःशङ्कश्च निरातङ्को, निष्कलो निर्मलोऽमलः ॥ ११

## तृतीयशतप्रकाशः

तीर्थकृत्तीर्थसृट् तीर्थ-ङ्करस्तीर्थकरः सुदृग् ।
तीर्थकर्ता तीर्थभर्ता, तीर्थेशस्तीर्थनायकः ॥ १

सुतीर्थोऽधिपतिस्तीर्थ-पतिस्तीर्थप्रवर्तकः ।
धर्मतीर्थकरस्तीर्थ-प्रणेता तीर्थकारकः ॥ २

तीर्थाधीशो महातीर्थ-पतिस्तीर्थप्रवर्तकः ।
सत्यतीर्थकरस्तीर्थ-सेव्यस्तीर्थिकनायकः ॥ ३

तीर्थनाथस्तीर्थराज-स्तीर्थेट् तीर्थप्रकाशकः ।
तीर्थवन्द्यस्तीर्थमुख्य-स्तीर्थाराध्यः सुतीर्थिकः ॥ ४

स्थविष्ठः स्थविरो ज्येष्ठः, प्रेष्ठः प्रष्ठो वरिष्ठधीः ।
स्थेष्ठो गरिष्ठो बंहिष्ठः, श्रेष्ठोऽणिष्ठो गरिष्ठधीः ॥ ५

विभवो विभयो वीरो, विशोको विजरोऽजरन् ।
विरागो विमदोऽव्यक्तो, विविक्तो वीतमत्सरः ॥ ६

वीतरागो गतद्वेषो, वीतमोहो विमन्मथः ।
वियोगो योगविद् विद्वान्, विधाता विनयी नयी ॥ ७

क्षान्तिमान् पृथिवीमूर्त्तिः, शान्तिभाग् सलिलात्मकः ।
वायुमूर्त्तिरसङ्गात्मा, वह्निमूर्त्तिरधर्मधुग् ॥ ८

सुयज्वा यजमानात्मा, सुत्रामस्तोमपूजितः ।
ऋत्विग् यज्ञपतिर्याज्यो, यज्ञाङ्गममृतं हविः ॥ ९

सोममूर्त्तिः सुसौम्यात्मा, सूर्यमूर्त्तिर्महाप्रभः ।
व्योममूर्तिरमूर्तात्मा, नीरजाः विरजाः शुचिः ॥ १०

मन्त्रविन्मन्त्रकृन्मन्त्री, मन्त्रमूर्त्तिरनन्तरः ।
स्वतन्त्रः सूत्रकृत् स्वत्रः, कृतान्तश्च कृतान्तकृत् ॥ ११

## चतुर्थशतप्रकाशः

कृती कृतार्थः संस्कृत्यः, कृतकृत्यः कृतक्रतुः ।
नित्यो मृत्युञ्जयोऽमृत्यु-रमृतात्माऽमृतोद्भवः ॥ १

हिरण्यगर्भः श्रीगर्भः, प्रभूतविभवोऽभवः ।
स्वयम्प्रभः प्रभूतात्मा, भवो भावो भवान्तकः ॥ २

महाऽशोकध्वजोऽशोकः, कः स्त्रष्टा पद्मविष्टरः ।
पद्मेशः पद्मसम्भूतिः, पद्मनाभिरनुत्तरः ॥ ३

पद्मयोनिर्जगद्योनि-रित्यः स्तुत्यः स्तुतीश्वरः ।
स्तवनार्हो हृषीकेशो-ऽजितो जेयः कृतक्रियः ॥ ४

विशालो विपुलोद्योति-रतुलोऽचिन्त्यवैभवः ।
सुसंवृतः सुगुप्तात्मा, शुभंयुः शुभकर्मकृत् ॥ ५

एकविद्यो महावैद्यो, मुनिः परिवृढो दृढः ।
पतिर्विद्यानिधिः साक्षी, विनेता विहतान्तकः ॥ ६

पिता पितामहः पाता, पवित्रः पावनो गतिः ।
त्राता भिषग्वरो वर्यो, वरदः पारदः पुमान् ॥ ७

कविः पुराणपुरुषो, वर्षीयान् ऋषभः पुरः ।
प्रतिष्ठाप्रसवो हेतु-र्भुवनैकपितामहः ॥ ८

श्रीवत्सलक्षणः श्लक्ष्णो, लक्षण्यः शुभलक्षणः ।
निरक्षः पुण्डरीकाक्षः, पुष्कलः पुष्कलेक्षणः ॥ ९

सिद्धिदः सिद्धसङ्कल्पः, सिद्धात्मा सिद्धशासनः ।
बुद्धबोध्यो महाबुद्धि-र्वर्धमानो महर्द्धिकः ॥ १०

वेदाङ्गो वेदविद् वेद्यो, जातरूपो विदांवरः ।
वेदवैद्यः स्वसंवेद्यो, विवेदो वदतांवरः ॥ ११

## पञ्चमशतप्रकाशः

सुधर्मा धर्मधीर्धर्मो, धर्मात्मा धर्मदेशकः ।
धर्मचक्री दयाधर्मः, शुद्धधर्मो वृषध्वजः ॥ १

वृषकेतुर्वृषाधीशो, वृषाङ्कश्च वृषोद्भवः ।
हिरण्यनाभिर्भूतात्मा, भूतभृद् भूतभावनः ॥ २

प्रभवो विभवो भास्वान्, मुक्तः शक्तोऽक्षयोऽक्षतः ।
कूटस्थः स्थाणुरक्षोभ्यः, शास्ता नेताऽचलस्थितिः ॥ ३

अग्रणीर्ग्रामणीर्गण्यो, गणीगुण्यो गणाग्रणीः ।
गणाधिपो गणाधीशो, गणज्येष्ठो गणार्चितः ॥ ४

गुणाकरो गुणाम्भोधि-र्गुणज्ञो गुणवान् गुणी ।
गुणादरो गुणोच्छेदी, सुगुणोऽगुणवर्जितः ॥ ५

शरण्यः पुण्यवाक् पूतो, वरेण्यः पुण्यगीर्गुणः ।
अगण्यपुण्यधीः पुण्यः, पुण्यकृत् पुण्यशासनः ॥ ६

अतीन्द्रोऽतीन्द्रियोऽधीन्द्रो, महेन्द्रोऽतीन्द्रियार्थदृक् ।
अतीन्द्रियो महेन्द्रार्च्यो, महेन्द्रमहितो महान् ॥ ७

उद्भवः कारणं कर्ता, पारगो भवतारकः ।
अग्राह्यो गहनं गुह्यः, परर्द्धिः परमेश्वरः ॥ ८

अनन्तर्द्धिरमेयर्द्धि-रचिन्त्यर्द्धिः समग्रधीः ।
प्राग्र्यः प्राग्र्यहरोऽत्यग्रः, प्रत्यग्रोऽग्रोऽग्रिमोऽग्रजः ॥ ९

प्राणकः प्रणवः प्राणः, प्राणदः प्राणितेश्वरः ।
प्रधानमात्मा प्रकृतिः, परमः परमोदयः ॥ १०

षष्ठशतप्रकाशः

महाजिनो महाबुद्धो, महाब्रह्मा महाशिवः ।
महाविष्णुर्महाजिष्णु-र्महानाथो महेश्वरः ॥ १

महादेवो महास्वामी, महाराजो महाप्रभुः ।
महाचन्द्रो महादित्यो, महाशूरो महागुरुः ॥ २

महातपा महातेजा, महोदर्को महोमयः ।
महायशो महाधाम, महासत्त्वो महाबलः ॥ ३

महाधैर्यो महावीर्यो, महाकान्तिर्महाद्युतिः ।
महाशक्तिर्महाज्योति-र्महाभूतिर्महाधृतिः ॥ ४

महामतिर्महानीति-र्महाक्षान्तिर्महाकृतिः ।
महाकीर्तिर्महास्फूर्ति-र्महाप्रज्ञो महोदयः ॥ ५

महाभागो महाभोगो, महारूपो महावपुः ।
महादानो महाज्ञानो, महाशास्ता महामहाः ॥ ६

महामुनिर्महामौनी, महाध्यानो महादमः ।
महाक्षमो महाशीलो, महायोगो महालयः ॥ ७

महाव्रतो महायज्ञो, महाश्रेष्ठो महाकविः ।
महामन्त्रो महातन्त्रो, महोपायो महानयः ॥ ८

महाकारुणिको मन्ता, महानादो महायतिः ।
महामोदो महाघोषो, महेज्यो महसां पतिः ॥ ९

महावीरो महाधीरो, महाधुर्यो महेष्टवाक् ।
महात्मा महसां धाम, महर्षिर्महितोदयः ॥ १०

महामुक्तिर्महागुप्ति-र्महासत्यो महार्जवः ।
महाबुद्धिर्महासिद्धि-र्महाशौचो महावशी ॥ ११

महाधर्मा महाशर्मा, महात्मज्ञो महाशयः ।
महामोक्षो महासौख्यो, महानन्दो महोदयः ॥ १२

महाभवाब्धिसन्तारी, महामोहारिसूदनः ।
महायोगीश्वराराध्यो, महामुक्तिपदेश्वरः ॥ १३

## सप्तमशतप्रकाशः

आनन्दो नन्दनो नन्दो, वन्द्यो नन्द्योऽभिनन्दनः ।
कामहा कामदः काम्यः, कामधेनुररिञ्जयः ॥ १

मनःक्लेशापहः साधु-रुत्तमोऽघहरो हरः ।
असङ्ख्येयः प्रमेयात्मा, शमात्मा प्रशमाकरः ॥ २

सर्वयोगीश्वरोऽचिन्त्यः, श्रुतात्मा विष्टरश्रवाः ।
दान्तात्मा दमतीर्थेशो, योगात्मा योगसाधकः ॥ ३

प्रमाणपरधिर्दक्षो, दक्षिणोऽध्वर्युरध्वरः ।
प्रक्षीणबन्धः कर्मारिः, क्षेमकृत् क्षेमशासनः ॥ ४

क्षेमी क्षेमङ्करः क्षेम्यः, क्षेमकर्मा क्षमापतिः ।
अग्राह्यो ज्ञानिविज्ञेयो, ज्ञानिगम्यो जिनोत्तमः ॥ ५

जिनेन्दुर्जनितानन्दो, मुनीन्दुर्दुन्दुभिस्वनः ।
मुनीन्द्रवन्द्यो योगीन्द्रो, यतीन्द्रो यतिनायकः ॥ ६

असंस्कृतः सुसंस्कारः प्राकृतो वै कृतान्तवित् ।
अन्तकृत् कान्तगुः कान्त-श्चिन्तामणिरभीष्टदः ॥ ७

अजितो जितकामारि-रमितोऽमितशासनः ।
जितक्रोधो जितामित्रो, जितक्लेशो जितान्तकः ॥ ८

सत्यात्मा सत्यविज्ञानः, सत्यवाक् सत्यशासनः ।
सत्याशीः सत्यसन्धानः, सत्यः सत्यपरायणः ॥ ९

सदायोगः सदाभोगः, सदातृप्तः सदाशिवः ।
सदागतिः सदासौख्यः, सदाविद्यः सदोदयः ॥ १०

सुघोषः सुमुखः सौम्यः,सुखदः सुहितः सुहृद् ।
सुगुप्तो गुप्तिभृद् गोप्ता, गुप्ताक्षो गुप्तमानसः ॥ ११

अष्टमशतप्रकाशः

बृहद् बृहस्पतिर्वाग्मी, वाचस्पतिरुदारधीः ।
मनीषी धिषणो धीमान्, शेमुषीशो गिराम्पतिः ॥ १

नैकरूपो नयोत्तुङ्गो, नैकात्मा नैकधर्मकृत् ।
अविज्ञेयः प्रतर्क्यात्मा, कृतज्ञः कृतलक्षणः ॥ २

ज्ञानगर्भो दयागर्भो, रत्नगर्भः प्रभास्वरः ।
पद्मगर्भो जगद्गर्भो, हेमगर्भः सुदर्शनः ॥ ३

लक्ष्मीशः सदयोऽध्यक्षो, दृढयोनिर्नयीशिता ।
मनोहरो मनोज्ञोऽर्हो, धीरो गम्भीरशासनः ॥ ४

धर्मयूपो दयायोगो, धर्मनेमिर्मुनीश्वरः ।
धर्मचक्रायुधो देवः, कर्महा धर्मघोषणः ॥ ५

स्थेयान् स्थवीयान् नेदीयान्, दवीयान् दूरदर्शनः ।
सुस्थितः स्वास्थ्यभाक् सुस्थो, नीरजस्को गतस्पृहः ॥ ६

वश्येन्द्रियो विमुक्तात्मा, निःसपत्नो जितेन्द्रियः ।
श्रीनिवासश्चतुर्वक्त्र-श्चतुरास्यश्चतुर्मुखः ॥ ७

अध्यात्मगम्योऽगम्यात्मा, योगात्मा योगिवन्दितः ।
सर्वत्रगः सदाभावी, त्रिकालविषयार्थदृक् ॥ ८

शङ्करः सुखदो दान्तो, दमी क्षान्तिपरायणः ।
स्वानन्दः परमानन्दः, सूक्ष्मवर्चाः परापरः ॥ ९

अमोघोऽमोघवाक् स्वाज्ञो, दिव्यदृष्टिरगोचरः ।
सुरूपः सुभगस्त्यागी, मूर्त्तोऽमूर्त्तः समाहितः ॥ १०

एकोऽनेको निरालम्बो-ऽनीदृग् नाथो निरन्तरः ।
प्रार्थ्योऽभ्यर्थ्यः समभ्यर्च्य-स्त्रिजगन्मङ्गलोदयः ॥ ११

## नवमशतप्रकाशः

ईशोऽधीशोऽधिपोऽधीन्द्रो, ध्येयोऽमेयो दयामयः ।
शिवः शूरः शुभः सारः, शिष्टः स्पष्टः स्फुटोऽस्फुटः ॥ १

इष्टः पुष्टः क्षमोऽक्षामो-ऽकायोऽमायोऽस्मयोऽमयः ।
दृश्योऽ दृश्योऽणुरस्थूलो, जीर्णो नव्यो गुरुर्लघुः ॥ २

स्वभूः स्वात्मा स्वयम्बुद्धः, स्वेशः स्वैरीश्वरः स्वरः ।
आद्योऽलक्ष्योऽपरोऽरूपो-ऽस्पर्शोऽशब्दोऽरिहाऽरुहः ॥ ३

दीप्तोऽलेश्योऽरसोऽगन्धो-ऽच्छेद्योऽभेद्योऽजरोऽमरः ।
प्राज्ञो धन्यो यतिः पूज्यो, मह्योऽर्च्यः प्रशमी यमी ॥ ४

श्रीशः श्रीन्द्रः शुभः सुश्री-रुत्तमश्रीः श्रियः पतिः ।
श्रीपतिः श्रीपरः श्रीपः, सच्छ्रीः श्रीयुक् श्रिया श्रितः ॥ ५

ज्ञानी तपस्वी तेजस्वी, यशस्वी बलवान् बली ।
दानी ध्यानी मुनिर्मौनी, लयी लक्ष्यः क्षयी क्षमी ॥ ६

लक्ष्मीवान् भगवान् श्रेयान्, सुगतः सुतनुर्बुधः ।
बुद्धो वृद्धः स्वयंसिद्धः, प्रोच्चः प्रांशुः प्रभामयः ॥ ७

## दशमशतप्रकाशः

आदिदेवो देववेदवः, पुरदेवोऽधिदेवता ।
युगादीशो युगाधीशो, युगमुख्यो युगोत्तमः ॥ १

दीप्तः प्रदीप्तः सूर्याभो-ऽरिघ्नोऽविघ्नोऽघनो घनः ।
शत्रुघ्नः प्रतिघस्तुङ्गो-ऽसङ्गः स्वङ्गोऽग्रगः सुगः ॥ २

स्याद्वादी दिव्यगीर्दिव्य-ध्वनिरुद्दामगीः प्रगीः ।
पुण्यवागर्ह्यवागर्ध-मागधीयोक्तिरिद्धगीः ॥ ३

पुराणपुरुषोऽपूर्वो-ऽपूर्वश्रीः पूर्वदेशकः ।
जिनदेवो जिनाधीशो, जिननाथो जिनाग्रणीः ॥ ४

शान्तिनिष्ठो मुनिज्येष्ठः, शिवतातिः शिवप्रदः ।
शान्तिकृत् शान्तिदः शान्तिः,कान्तिमान् कामितप्रदः ॥ ५

श्रियां निधिरधिष्ठान-मप्रतिष्ठः प्रतिष्ठितः ।
सुस्थिरः स्थावरः स्थाष्णुः, पृथीयान् प्रथितः पृथुः ॥ ६

पुण्यराशिः श्रियोराशि-स्तेजोराशिरसंशयी ।
ज्ञानोदधिरनन्तौजा, ज्योतिर्मूर्त्तिरनन्तधीः ॥ ७

विज्ञानोऽप्रतिमो भिक्षु-र्मुमुक्षुर्मुनिपुङ्गवः ।
अनिद्रालुरतन्द्रालु-र्जागरूकः प्रमामयः ॥ ८

कर्मण्यः कर्मठोऽकुण्ठो, ऽरुद्रो भद्रोऽभयङ्करः ।
लोकोत्तरो लोकपति-र्लोकेशो लोकवत्सलः ॥ ९

त्रिलोकीशस्त्रिकालज्ञ-स्त्रिनेत्रस्त्रिपुरान्तकः ।
त्र्यम्बकः केवलालोकः, केवली केवलेक्षणः ॥ १०

समन्तभद्रः शान्तादि-र्धर्माचार्यो दयानिधिः ।
सूक्ष्मदर्शी सुमार्गज्ञः, कृपालुर्मार्गदर्शकः ॥ ११

प्रातिहार्योज्ज्वलस्फीता-तिशयो विमलाशयः ।
सिद्धानन्तचतुष्कश्री-र्जीयाच्छ्रीजिनपुङ्गवः ॥ १२

उपसंहारः-

एतदष्टोत्तरं नाम-सहस्रं श्रीमदर्हतः ।
भव्याः पठन्तु सानन्दं, महानन्दैककारणम् ॥ १३

इत्येतज्जिनदेवस्य, जिननामसहस्रकम् ।
सर्वापराधशमनं, परं भक्तिविवर्धनम् ॥ १४

अक्षयं त्रिषु लोकेषु, सर्वस्वर्गैकसाधनम् ।
स्वर्गलोकैकसोपानं, सर्वदुःखैकनाशनम् ॥ १५

समस्तदुःखहं सद्यः, परं निर्वाणदायकम् ।
कामक्रोधादिनिःशेष-मनोमलविशोधनम् ॥ १६

शान्तिदं पावनं नृणां, महापातकनाशनम् ।
सर्वेषां प्राणिनामाशु, सर्वाभीष्टफलप्रदम् ॥ १७

जगज्जाड्यप्रशमनं, सर्वविद्याप्रवर्त्तकम् ।
राज्यदं राज्यभ्रष्टानां, रोगिणां सर्वरोगहृत् ॥ १८

वन्ध्यानां सुतदं चाशु, क्षीणानां जीवितप्रदम् ।
भूतग्रहविषध्वंसि, श्रवणात् पठनाज्जपात् ॥ १९

पू.आ.श्री जिनसेनसूरिविरचिता
श्रीआदिपुराणान्तर्गता
श्रीऋषभजिनविभूत्यादिवर्णनासमेता

# ५. ॥ श्रीजिनसहस्त्रनाममहास्तुतिः॥

(अनुष्टुभ्)

स्तोष्ये त्वां परमं ज्योतिर्गुणरत्नमहाकरम् ।
मतिप्रकर्षहीनोऽपि केवलं भक्तिचोदितः ॥ १

त्वामभिष्टुवतां भक्त्या विशिष्टाः फलसम्पदः ।
स्वयमाविर्भवन्तीति निश्चित्य त्वां जिनस्तुवे ॥ २

स्तुतिः पुण्यगुणोत्कीर्तिः स्तोता भव्यः प्रसन्नधीः ।
निष्ठितार्थो भवान् स्तुत्यः फलं नैःश्रेयसं सुखम् ॥ ३

इत्याकलय्य मनसा तुष्टूषुं मां फलार्थिनम् ।
विभो प्रसन्नया दृष्ट्या त्वं पुनीहि सनातन ॥ ४

मामुदाकुरुते भक्तिस्त्वद्गुणैः परिचोदिता ।
ततः स्तुतिपथे तेऽस्मिन् लग्नः संविग्नमानसः ॥ ५

त्वयि भक्तिः कृताल्पापि महतीं फलसम्पदम् ।
पम्फलीति विभो कल्पक्ष्माजसेवेव ऐहिनाम् ॥ ६

तवारिजयमाचष्टे वपुरस्पृष्टकैतवम् ।
दोषावेशविकारा हि रागिणां भूषणादयः ॥ ७

निर्भूषमपि कान्तं ते वपुर्भुवनभूषणम् ।
दीप्रं हि भूषणं नैव भूषणान्तरमीक्षते ॥ ८

न मूर्ध्नि कबरीबन्धो न शेखरपरिग्रहः ।
न किरीटादिभारस्ते तथापि रुचिरं शिरः ॥ ९

न मुखे भ्रुकुटीन्यासो न दष्टो दशनच्छदः ।
नास्त्रे व्यापारितो हस्तस्तथापि त्वमरीनहन् ॥ १०

त्वया नाताम्रिते नेत्रे नीलोत्पलदलायते ।
मोहारिविजये देव प्रभुशक्तिस्तवाद्भुता ॥ ११

अपापाङ्गावलोकं ते जिनेन्द्र ! नयनद्वयम् ।
मदनारिजयं वक्ति व्यक्तं नः सौम्यवीक्षितम् ॥ १२

त्वद्दृशोरमला दीप्तिरास्पृशन्ती शिरस्सु नः ।
पुनाति पुण्यधारेव जगतामेकपावनी ॥ १३

तवेदमाननं धत्ते प्रफुल्लकमलश्रियम् ।
स्वकान्तिज्योत्स्नया विश्वमाक्रामच्छरदिन्दुवत् ॥ १४

अनट्टहासहुङ्कारमदष्टोष्ठपुटं मुखम् ।
जिनाख्याति सुमेधोभ्यस्तावकीं वीतरागताम् ॥ १५

त्वन्मुखादुद्यती दीप्तिः पावनीव सरस्वती ।
विधुन्वती तमो भाति जितबालातपद्युतिः ॥ १६

त्वन्मुखाम्बुरुहालग्ना सुराणां नयनावलिः ।
भातीयमलिमालेव तदामोदानुपातिनी ॥ १७

मकरन्दमिवापीय त्वद्वक्त्राब्जोद्गतं वचः ।
अनाशितं भवं भव्यभ्रमरा यान्त्यमी मुदम् ॥ १८

एकतोऽभिमुखोऽपि त्वं लक्ष्यसे विश्वतोमुखः ।
तेजोगुणस्य माहात्म्यमिदं नूनं तवाद्भुतम् ॥ १९

विश्वदिक्षु विसर्पन्ति तावका वागभीषवः ।
तिरश्चामपि हृद्ध्वान्तमुद्धुन्वन्तो जिनांशुमान् ॥ २०

तव वागमृतं पीत्वा वयमद्यामराः स्फुटम् ।
पीयूषमिदमिष्टं नो देव सर्वरुजाहरम् ॥ २१

जिनेन्द्र तव वक्त्राब्जं प्रक्षरद्वचनामृतम् ।
भव्यानां प्रीणनं भाति धर्मस्येव निधानकम् ॥ २२

मुखेन्दुमण्डलाद्देव तव वाक्किरणा इमे ।
विनिर्यान्तो हतध्वान्ताः सभामाह्लादयन्त्यलम् ॥ २३

चित्रं वाचां विचित्राणामक्रमः प्रभवः प्रभो ।
अथवा तीर्थकृत्त्वस्य देव वैभवमीदृशम् ॥ २४

अस्वेदमलामाभाति सुगन्धि शुभलक्षणम् ।
सुसंस्थानमरक्ता सृग्वपुर्वज्रस्थिरं तव ॥ २५

सौरूप्यं नयनाह्लादि सौभाग्यं चित्तरञ्जनम् ।
सुवाक्त्वं जगदानन्दि तवासाधारणा गुणाः ॥ २६

अमेयमपि ते वीर्यं मितं देहे प्रभान्विते ।
स्वल्पेऽपि दर्पणे बिम्बं माति स्ताम्बेरमं ननु ॥ २७

त्वदास्थानस्थितोद्देशं परितः शतयोजनम् ।
सुलभाशनपानादि त्वन्महिम्नोपजायते ॥ २८

गगनानुगतं यानं तवासीद् भुवमस्पृशत् ।
दैवासुरं भरं सोढुमक्षमा धरणीति नु ॥ २९

क्रूरैरपि मृगैर्हिंस्रैर्हन्यन्ते जातु नाङ्गिनः ।
सद्धर्मदेशनोद्युक्ते त्वयि संजीवनौषधे ॥ ३०

न भुक्तिः क्षीणमोहस्य तवानन्तसुखोदयात् ।
क्षुत्क्लेशबाधितो जन्तुः कवलाहारभुग्भवेत् ॥ ३१

असद्वेद्योदयाद् भुक्तिं त्वयि यो योजयेदधीः ।
मोहानिलप्रतीकारे तस्यान्वेष्यं जरद्घृतम् ॥ ३२

असद्वेद्यविषं घाति विध्वंसध्वस्तशक्तिकम् ।
त्वय्यकिञ्चित्करं मन्त्रशक्त्येवापबलं विषम् ॥ ३३

असद्वेद्योदयो घातिसहकारिव्यपायतः ।
त्वय्यकिञ्चित्करो नाथ सामग्र्या हि फलोदयः ॥ ३४

नेतयो नोपसर्गाश्च प्रभवन्ति त्वयीशिनि ।
जगतां पालके हेलाक्षालितांहः कलङ्कके ॥ ३५

त्वय्यनन्तमुखोत्सर्पत्केवलामललोचने ।
चातुरास्यमिदं युक्तं नष्टघातिचतुष्टये ॥ ३६

सर्वविद्येश्वरो योगी चतुरास्यस्त्वमक्षरः ।
सर्वतोऽक्षिमयं ज्योतिस्तन्वानो भास्यधीशितः ॥ ३७

अच्छायत्वमनुन्मेषनिमेषत्वं च ते वपुः ।
धत्ते तेजोमयं दिव्यं परमौदारिकाह्वयम् ॥ ३८

बिभ्राणोऽप्यध्यधिच्छत्रमच्छायाङ्गस्त्वमीक्ष्यसे ।
महतां चेष्टितं चित्रमथवौजस्तवेदृशम् ॥ ३९

निमेषापायधीराक्षं तव वक्त्राब्जमीक्षितुम् ।
त्वयेव नयनस्पन्दो नूनं देवैश्च संहृतः ॥ ४०

नखकेशमितावस्था तवाविष्कुरुते विभो ।
रसादिविलयं देहे विशुद्धस्फटिकामले ॥ ४१

इत्युदारैर्गुणैरेभिस्त्वमनन्यत्रभाविभिः ।
स्वयमेत्य वृतो नूनमदृष्टशरणान्तरैः ॥ ४२

अप्यमी रूपसौन्दर्यकान्तिदीप्त्यादयो गुणाः ।
स्पृहणीयाः सुरेन्द्राणां तव हेयाः किलाद्भुतम् ॥ ४३

गुणिनं त्वामुपासीना निर्धूतगुणबन्धनाः ।
त्वया सारूप्यमायान्ति स्वामिच्छन्दं नु शिक्षितुः ॥ ४४

अयं मन्दानिलोद्धतचलच्छाखाकरोत्करैः ।
श्रीमानशोकवृक्षस्ते नृत्यतीवात्तसम्मदः ॥ ४५

चलत्क्षीरोदवीथिभिः स्पर्धां कर्तुमिवाभितः ।
चामरौघाः पतन्ति त्वां मरुद्भिर्लीलया धुताः ॥ ४६

मुक्तालम्बनविभ्राजि भ्राजते विधुनिर्मलम् ।
छत्रत्रयं तवोन्मुक्तप्रारोहमिव खाङ्गणे ॥ ४७

सिंहैरूढं विभातीदं तव विष्टरमुच्चकैः ।
रत्नांशुभिर्भवत्स्पर्शान्मुक्तहर्षाङ्कुरैरिव ॥ ४८

ध्वनन्ति मधुरध्वानाः सुरदुन्दुभिकोटयः ।
घोषयन्त्य इवापूर्य रोदसी त्वज्जयोत्सवम् ॥ ४९

तव दिव्यध्वनिं धीरमनुकर्तुमिवोद्यताः ।
ध्वनन्ति सुरतूर्याणां कोटयोऽर्धत्रयोदश ॥ ५०

सुरैरियं नभोरङ्गात् पौष्पी वृष्टिर्वितन्यते ।
तुष्टया स्वर्गलक्ष्म्येव चोदितैः कल्पशाखिभिः ॥ ५१

तव देहप्रभोत्सर्पः समाक्रामन्नभोऽभितः ।
शश्वत्प्रभातमास्थानी जनानां जनयत्यलम् ॥ ५२

नखांशवस्तवाताम्राः प्रसरन्ति दिशास्वमी ।
त्वदङ्घ्रिकल्पवृक्षाग्रात् प्रारोहा इव निःसृता ॥ ५३

शिरस्सु नः स्पृशन्त्येते प्रसादस्येव तेंऽशकाः ।
त्वत्पादनखशीतांशुकराः प्राह्लादिताखिलाः ॥ ५४

त्वत्पादाम्बुरुहच्छायासरसीमवगाहते ।
दिव्यश्री कलहंसीयं नखरोचिर्मृणालिकाम् ॥ ५५

मोहारिर्मदनालग्नशोणितार्द्रच्छटामिव ।
तलच्छायामिदं धत्ते त्वत्पादाम्बुरुहद्वयम् ॥ ५६

त्वत्पादनखभाभारसरसि प्रतिबिम्बिताः ।
सुराङ्गनाननच्छायास्तन्वते पङ्कजश्रियम् ॥ ५७

स्वयम्भुवे नमस्तुभ्यमुत्पाद्यात्मानमात्मनि ।
स्वात्मनैव तथोद्भूतवृत्तयेऽचिन्त्यवृत्तये ॥ ५८

नमस्ते जगतां पत्ये लक्ष्मीभर्त्रे नमोऽस्तु ते ।
विदांवर नमस्तुभ्यं नमस्ते वदतांवर ॥ ५९

कर्मशत्रुहणं देवमामनन्ति मनीषिणः ।
त्वामानमत्सुरेण्मौलिभामालाभ्यर्चितक्रमम् ॥ ६०

ध्यानद्रुघणनिर्भिन्नघनघातिमहातरुः ।
अनन्तभवसन्तानजयादासीदनन्तजित् ॥ ६१

त्रैलोक्यनिर्जयावाप्तदुर्दर्पमतिदुर्जयम् ।
मृत्युराजं विजित्यासीज्जिन ! मृत्युञ्जयो भवान् ॥ ६२

विधुताशेषसंसारबन्धनो भव्यबान्धवः ।
त्रिपुरारिस्त्वमीशासि जन्ममृत्युजरान्तकृत् ॥ ६३

त्रिकालविषयाशेषतत्त्वभेदात् त्रिधोत्थितम् ।
केवलाख्यं दधच्चक्षुस्त्रिनेत्रोऽसि त्वमीशितः ॥ ६४

त्वामन्धकान्तकं प्राहुर्मोहान्धासुरमर्दनात् ।
अर्धं ते नारयो यस्मादर्धनारीश्वरोऽस्यतः ॥ ६५

शिवः शिवपदाध्यासाद् दुरितारिहरो हरः ।
शङ्करः कृतशं लोके शम्भवस्त्वं भवन्सुखे ॥ ६६

वृषभोऽसि जगज्ज्येष्ठः पुरुः पुरुगुणोदयैः ।
नाभेयो नाभिसंभूतेरिक्ष्वाकुकुलनन्दनः ॥ ६७

त्वमेकः पुरुषस्कन्धस्त्वं द्वे लोकस्य लोचने ।
त्वं त्रिधा बुद्धसन्मार्गस्त्रिज्ञस्त्रिज्ञानधारकः ॥ ६८

चतुःशरणमाङ्गल्यमूर्तिस्त्वं चतुरस्रधीः ।
पञ्चब्रह्ममयो देव ! पावनस्त्वं पुनीहि माम् ॥ ६९

स्वर्गावतरणे तुभ्यं सद्योजातात्मने नमः ।
जन्माभिषेक वामाय वामदेव ! नमोऽस्तु ते ॥ ७०

सन्निष्क्रान्तावघोराय परं प्रशममीयुषे ।
केवलज्ञान संसिद्धावीशानाय नमोऽस्तु ते ॥ ७१

पुरस्तत्पुरुषत्वेन विमुक्तिपदभागिने ।
नमस्तत्पुरुषावस्थां भाविनीं तेऽद्य बिभ्रते ॥ ७२

ज्ञानावरणनिर्ह्रासान्नमस्तेऽनन्तचक्षुषे ।
दर्शनावरणोच्छेदान्नमस्ते विश्वदृश्वने ॥ ७३

नमो दर्शनमोहघ्ने क्षायिकामलदृष्टये ।
नमश्चारित्रमोहघ्ने विरागाय महौजसे ॥ ७४

नमस्तेऽनन्तवीर्याय नमोऽनन्तसुखात्मने ।
नमस्तेऽनन्तलोकाय लोकालोकावलोकिने ॥ ७५

नमस्तेऽनन्तदानाय नमस्तेऽनन्तलब्धये ।
नमस्तेऽनन्तभोगाय नमोऽनन्तोपभोगिने ॥ ७६

नमः परमयोगाय ननस्तुभ्यमयोनये ।
नमः परमपूताय नमस्ते परमर्षये ॥ ७७

नमः परमविद्याय नमः परमतच्छिदे ।
नमः परमतत्त्वाय नमस्ते परमात्मने ॥ ७८

नमः परमरूपाय नमः परमतेजसे ।
नमः परममार्गाय नमस्ते परमेष्ठिने ॥ ७९

परमं भेजुषे धाम परमज्योतिषे नमः ।
नमः पारेतमः प्राप्तधाम्ने परतरात्मने ॥ ८०

नमः क्षीणकलङ्काय क्षीणबन्ध ! नमोऽस्तु ते ।
नमस्ते क्षीणमोहाय क्षीणदोषाय ते नमः ॥ ८१

नमः सुगतये तुभ्यं शोभनां गतिमीयुषे ।
नमस्तेऽतीन्द्रियज्ञानसुखायानिन्द्रियात्मने ॥ ८२

कायबन्धननिर्मोक्षादकायाय नमोऽस्तु ते ।
नमस्तुभ्यमयोगाय योगिनामधियोगिने ॥ ८३

अवेदाय नमस्तुभ्यमकषायाय ते नमः ।
नमः परमयोगीन्द्र वन्दिताङ्घ्रिद्वयाय ते ॥ ८४

नमः परमविज्ञान ! नमः परमसंयम ! ।
नमः परमदृग्दृष्टपरमार्थाय तायिने ॥ ८५

नमस्तुभ्यमलेश्याय शुद्धलेश्यांशकस्पृशे ।
नमो भव्येतरावस्थाव्यतीताय विमोक्षिणे ॥ ८६

संज्ञ्यसंज्ञिद्वयावस्थाव्यतिरिक्तामलात्मने ।
नमस्ते वीतसंज्ञाय नमः क्षायिकदृष्टये ॥ ८७

अनाहाराय तृप्ताय नमः परमभाजुषे ।
व्यतीताशेषदोषाय भवाब्धेः पारमायुषे ॥ ८८

अजराय नमस्तुभ्यं नमस्ते स्तादजन्मने ।
अमृत्यवे नमस्तुभ्यमचलायाक्षरात्मने ॥ ८९

अलमास्तां गुणस्तोत्रमनन्तास्तावका गुणाः ।
त्वां नामस्मृतिमात्रेण पर्युपासिसिषामहे ॥ ९०

प्रसिद्धाष्टसहस्रेद्धलक्षणं त्वां गिरांपतिम् ।
नाम्नामष्टसहस्रेण तोष्टुमोऽभीष्टसिद्धये ॥ ९१

श्रीमान् स्वयंभूर्वृषभः शंभवः शंभुरात्मभूः ।
स्वयंप्रभः प्रभुर्भोक्ता विश्वभूरपुनर्भवः ॥ ९२

विश्वात्मा विश्वलोकेशो विश्वतश्चक्षुरक्षरः ।
विश्वविद् विश्वविद्येशो विश्वयोनिरनश्वरः ॥ ९३

विश्वदृश्वा विभुर्धाता विश्वेशो विश्वलोचनः ।
विश्वव्यापी विधिर्वेधाः शाश्वतो विश्वतोमुखः ॥ ९४

विश्वकर्मा जगज्ज्येष्ठो विश्वमूर्तिर्जिनेश्वरः ।
विश्वदृग् विश्वभूतेशो विश्वज्योतिरनीश्वरः ॥ ९५

जिनो जिष्णुरमेयात्मा विश्वरीशो जगत्पतिः ।
अनन्तजिदचिन्त्यात्मा भव्यबन्धुरबन्धनः ॥ ९६

युगादिपुरुषो ब्रह्म पञ्चब्रह्ममयः शिवः ।
परः परतरः सूक्ष्मः परमेष्ठी सनातनः ॥ ९७

स्वयं ज्योतिरजोऽजन्मा ब्रह्मयोनिरयोनिजः ।
मोहारिविजयी जेता धर्मचक्री दयाध्वजः ॥ ९८

प्रशान्तारिरनन्तात्मा योगी योगीश्वरार्चितः ।
ब्रह्मविद् ब्रह्मतत्त्वज्ञो ब्रह्मोद्याविद् यतीश्वरः ॥ ९९

शुद्धो बुद्धः प्रबुद्धात्मा सिद्धार्थः सिद्धशासनः ।
सिद्ध सिद्धान्तविद्ध्येयः सिद्धसाध्यो जगद्धितः ॥ १००

सहिष्णुरच्युतोऽनन्तः प्रभविष्णुर्भवोद्भवः ।
प्रभूष्णुरजरोऽजर्यो भ्राजिष्णुर्धीश्वरोऽव्ययः ॥ १०१

विभावसुरसम्भूष्णुः स्वयम्भूष्णुः पुरातनः ।
परमात्मा परं ज्योतिस्त्रिजगत्परमेश्वरः ॥ १०२

इति श्रीमदादिशतम् ।

दिव्यभाषापतिर्दिव्यः पूतवाक् पूतशासनः ।
पूतात्मा परमज्योतिः धर्माध्यक्षो दमीश्वरः ॥ १०३

श्रीपतिर्भगवानर्हन्नरजा विरजाः शुचिः ।
तीर्थकृत् केवलीशानः पूजार्हः स्नातकोऽमलः ॥ १०४

अनन्तदीप्तिर्ज्ञानात्मा स्वयम्बुद्धः प्रजापतिः ।
मुक्तः शक्तो निराबाधो निष्कलो भुवनेश्वरः ॥ १०५

निरञ्जनो जगज्ज्योतिर्निरुक्तोक्तिरनामयः ।
अचलस्थितिरक्षोभ्यः कूटस्थः स्थाणुरक्षयः ॥ १०६

अग्रणीर्ग्रामणीर्नेता प्रणेता न्यायशास्त्रकृत् ।
शास्ता धर्मपतिर्धर्म्यो धर्मात्मा धर्मतीर्थकृत् ॥ १०७

वृषध्वजो वृषाधीशो वृषकेतुर्वृषायुधः ।
वृषो वृषपतिर्भर्ता वृषभाङ्को वृषोद्भवः ॥ १०८

हिरण्यनाभिर्भूतात्मा भूतभृद् भूतभावनः ।
प्रभवो विभवो भास्वान् भवो भावो भवान्तकः ॥ १०९

हिरण्यगर्भः श्रीगर्भः प्रभूतविभवोऽभवः ।
स्वयम्प्रभुः प्रभूतात्मा भूतनाथो जगत्पतिः ॥ ११०

सर्वादिः सर्वदृंक् सार्वः सर्वज्ञः सर्वदर्शनः ।
सर्वात्मा सर्वलोकेशः सर्ववित् सर्वलोकजित् ॥ १११

सुगतिः सुश्रुतः सुश्रुत् सुवाक् सूरिर्बहुश्रुतः ।
विश्रुतो विश्वतः पादो विश्वशीर्षः शुचिश्रवाः ॥ ११२

सहस्रशीर्षः क्षेत्रज्ञः सहस्राक्षः सहस्रपात् ।
भूतभव्यभवद्भर्ता विश्वविद्यामहेश्वरः ॥ ११३

इति दिव्यादिशतम्

स्थविष्ठः स्थविरो ज्येष्ठः प्रष्ठः प्रेष्ठो वरिष्ठधीः ।
स्थेष्ठो गरिष्ठो बंहिष्ठः श्रेष्ठोऽणिष्ठो गरिष्ठगीः ॥ ११४

विश्वभृद् विश्वसृड् विश्वेट् विश्वभुग् विश्वनायकः ।
विश्वाशीर्विश्वरूपात्मा विश्वजिद् विजितान्तकः ॥ ११५

विभवो विभयो वीरो विशोको विजरो जरन् ।
विरागो विरतोऽसङ्गो विविक्तो वीतमत्सरः ॥ ११६

विनेयजनताबन्धुर्विलीनाशेषकल्मषः ।
वियोगो योगविद् विद्वान् विधाता सुविधिः सुधीः ॥ ११७

क्षान्तिभाक् पृथिवीमूर्तिः शान्तिभाक् सलिलात्मकः ।
वायुमूर्तिरसङ्गात्मा वह्निमूर्तिरधर्मधक् ॥ ११८

सुयज्वा यजमानात्मा सुत्वा सुत्रामपूजितः ।
ऋत्विग् यज्ञपतिर्याज्यो यज्ञाङ्गममृतं हविः ॥ ११९

व्योममूर्तिरमूर्तात्मा निर्लेपो निर्मलोऽचलः ।
सोममूर्तिः सुसौम्यात्मा सूर्यमूर्तिर्महाप्रभः ॥ १२०

मन्त्रविन्मन्त्रकृन्मन्त्री मन्त्रमूर्तिरनन्तगः ।
स्वतन्त्रस्तन्त्रकृत् स्वन्तः कृतान्तान्तः कृतान्तकृत् ॥ १२१

कृती कृतार्थः सत्कृत्यः कृतकृत्यः कृतक्रतुः ।
नित्यो मृत्युञ्जयोऽमृत्युरमृतात्माऽमृतोद्भवः ॥ १२२

ब्रह्मनिष्ठः परंब्रह्म ब्रह्मात्मा ब्रह्मसंभवः ।
महाब्रह्मपतिर्ब्रह्मेड् महाब्रह्मपदेश्वरः ॥ १२३

सुप्रसन्नः प्रसन्नात्मा ज्ञानधर्मदमप्रभुः ।
प्रशमात्मा प्रशान्तात्मा पुराणपुरुषोत्तमः ॥ १२४

इति स्थविष्ठादिशतम् ।

महाशोकध्वजोऽशोकः कः स्रष्टा पद्मविष्टरः ।
पद्मेशः पद्मसंभूतिः पद्मनाभिरनुत्तरः ॥ १२५

पद्मयोनिर्जगद्योनिरित्यः स्तुत्यः स्तुतीश्वरः ।
स्तवनार्हो हृषीकेशो जितजेयः कृतक्रियः ॥ १२६

गणाधिपो गणज्येष्ठो गण्यः पुण्यो गणाग्रणीः ।
गुणाकरो गुणाम्भोधिर्गुणज्ञो गुणनायकः ॥ १२७

गुणादरी गुणोच्छेदी निर्गुणः पुण्यगीर्गुणः ।
शरण्यः पुण्यवाक्पूतो वरेण्यः पुण्यनायकः ॥ १२८

अगण्यः पुण्यधीर्गुण्यः पुण्यकृत् पुण्यशासनः ।
धर्मारामो गुणग्रामः पुण्यापुण्यनिरोधकः ॥ १२९

पापापेतो विपापात्मा विपाप्मा वीतकल्मषः ।
निर्द्वन्द्वो निर्मदः शान्तो निर्मोहो निरुपद्रवः ॥ १३०

निर्निमेषो निराहारो निष्क्रियो निरुपप्लवः ।
निष्कलङ्को निरस्तैना निर्धूतागा निरास्त्रवः ॥ १३१

विशालो विपुलज्योतिरतुलोऽचिन्त्यवैभवः ।
सुसंवृतः सुगुप्तात्मा सुभुत् सुनयतत्त्ववित् ॥ १३२

एकविद्यो महाविद्यो मुनिः परिवृढः पतिः ।
धीशो विद्यानिधिः साक्षी विनेता विहतान्तकः ॥ १३३

पिता पितामहः पाता पवित्रः पावनो गतिः ।
त्राता भिषग्वरो वर्यो वरदः परमः पुमान् ॥ १३४

कविः पुराणपुरुषो वर्षीयान् वृषभः पुरुः ।
प्रतिष्ठाप्रसवो हेतुर्भुवनैकपितामहः ॥ १३५

इति महादिशतम् ।

श्रीवृक्षलक्षणः श्लक्ष्णो लक्षण्यः शुभलक्षणः ।
निरक्षः पुण्डरीकाक्षः पुष्कलः पुष्करेक्षणः ॥ १३६

सिद्धिदः सिद्धसंकल्पः सिद्धात्मा सिद्धसाधनः ।
बुद्धबोध्यो महाबोधिर्वर्धमानो महर्धिकः ॥ १३७

वेदाङ्गो वेदविद् वेद्यो जातरूपो विदांवर: ।
वेदवेद्य: स्वसंवेद्यो विवेदो वदतांवर: ॥ १३८

अनादिनिधनो ऽव्यक्तो व्यक्तवाग् व्यक्तशासन: ।
युगादिकृद् युगाधारो युगादिर्जगदादिज: ॥ १३९

अतीन्द्रोऽतीन्द्रियो धीन्द्रो महेन्द्रोऽतीन्द्रियार्थदृक् ।
अनिन्द्रियोऽहमिन्द्राच्र्यो महेन्द्रमहितो महान् ॥ १४०

उद्भव: कारणं कर्त्ता पारगो भवतारक: ।
अगाह्यो गहनं गुह्यं परार्ध्य: परमेश्वर: ॥ १४१

अनन्तर्द्धिरमेयर्द्धिरचिन्त्यर्द्धि: समग्रधी: ।
प्राग्र्य: प्राग्रहरोऽभ्यग्र: प्रत्यग्रोऽग्र्योऽग्रिमोऽग्रज: ॥ १४२

महातपा महातेजा महोदर्को महोदय: ।
महायशा महाधामा महासत्त्वो महाधृति: ॥ १४३

महाधैर्यो महावीर्यो महासंपन्महाबल: ।
महाशक्तिर्महाज्योतिर्महाभूतिर्महाद्युति: ॥ १४४

महामतिर्महानीतिर्महाक्षान्तिर्महादय: ।
महाप्राज्ञो महाभागो महानन्दो महाकवि: ॥ १४५

महामहा महाकीर्तिर्महाकान्तिर्महावपु: ।
महादानो महाज्ञानो महायोगो महागुण: ॥ १४६

महामहपति: प्राप्तमहाकल्याणपञ्चक: ।
महाप्रभुर्महाप्रातिहार्याधीशो महेश्वर: ॥ १४७

इति श्रीवृक्षादिशतम् ।

महामुनिर्महामौनी महाध्यानी महादमः ।
महाक्षमो महाशीलो महायज्ञो महामखः ॥ १४८

महाव्रतपतिर्मह्यो महाकान्तिधरोऽधिपः ।
महामैत्रीमयोऽमेयो महोपायो महोमयः ॥ १४९

महाकारुणिको मन्ता महामन्त्रो महायतिः ।
महानादो महाघोषो महेज्यो महसांपतिः ॥ १५०

महाध्वरधरो धुर्यो महौदार्यो महिष्ठवाक् ।
महात्मा महसां धाम महर्षिर्महितोदयः ॥ १५१

महाक्लेशाङ्कुशः शूरो महाभूतपतिर्गुरुः ।
महापराक्रमोऽनन्तो महाक्रोधरिपुर्वशी ॥ १५२

महाभवाब्धिसन्तारी महामोहाद्रिसूदनः ।
महागुणाकरः क्षान्तो महायोगीश्वरः समी ॥ १५३

महाध्यानपतिर्ध्याता महाधर्मा महाव्रतः ।
महाकर्मारिहात्मज्ञो महादेवो महेशिता ॥ १५४

सर्वक्लेशापहः साधुः सर्वदोषहरो हरः ।
असङ्ख्येयोऽप्रमेयात्मा शमात्मा प्रशमाकरः ॥ १५५

सर्वयोगीश्वरोऽचिन्त्यः श्रुतात्मा विष्टरश्रवाः ।
दान्तात्मा दमतीर्थेशो योगात्मा ज्ञानसर्वगः ॥ १५६

प्रधानमात्मा प्रकृतिः परमः परमोदयः ।
प्रक्षीणबन्धः कामारिः क्षेमकृत् क्षेमशासनः ॥ १५७

प्रणवः प्रणतः प्राणः प्राणदः प्राणतेश्वरः ।
प्रमाणं प्रणिधिर्दक्षो दक्षिणोऽध्वर्युरध्वरः ॥ १५८

आनन्दो नन्दनो नन्दो वन्द्योऽनिन्द्योऽभिनन्दनः ।
कामहा कामदः काम्यः कामधेनुररिञ्जयः ॥ १५९

इति महामुन्यादिशतम् ।

असंस्कृत सुसंस्कारः प्राकृतो वैकृतान्तकृत् ।
अन्तकृत् कान्तगुः कान्तश्चिन्तामणिरभीष्टदः ॥ १६०

अजितो जितकामारिरमितोऽमितशासनः ।
जितक्रोधो जितामित्रो जितक्लेशो जितान्तकः ॥ १६१

जिनेन्द्रः परमानन्दो मुनीन्द्रो दुन्दुभिस्वनः ।
महेन्द्रवन्द्यो योगीन्द्रो यतीन्द्रो नाभिनन्दनः ॥ १६२

नाभेयो नाभिजोऽजातः सुव्रतो मनुरुत्तमः ।
अभेद्योऽनत्ययोऽनाश्वानधिकोऽधिगुरुः सुधीः ॥ १६३

सुमेधा विक्रमी स्वामी दुराधर्षो निरुत्सुकः ।
विशिष्टः शिष्टभुक् शिष्टः प्रत्ययः कामनोऽनघः ॥ १६४

क्षेमी क्षेमङ्करोऽक्षय्यः क्षेमधर्मपतिः क्षमी ।
अग्राह्यो ज्ञाननिग्राह्यो ध्यानगम्यो निरुत्तरः ॥ १६५

सुकृती धातुरिज्यार्हः सुनयश्चतुराननः ।
श्रीनिवासश्चतुर्वक्त्रश्चतुरास्यश्चतुर्मुखः ॥ १६६

सत्यात्मा सत्यविज्ञानः सत्यवाक् सत्यशासनः ।
सत्याशीः सत्यसन्धानः सत्यः सत्यपरायणः ॥ १६७

स्थेयान् स्थवीयान्नेदीयान् दवीयान् दूरदर्शनः ।
अणोरणीयाननणुर्गुरुराद्यो गरीयसाम् ॥ १६८

सदायोगः सदाभोगः सदातृप्तः सदाशिवः ।
सदागतिः सदासौख्यः सदाविद्यः सदोदयः ॥ १६९

सुघोषः सुमुखः सौम्यः सुखदः सुहितः सुहृत् ।
सुगुप्तो गुप्तिभृद् गोप्ता लोकाध्यक्षो दमीश्वरः ॥ १७०

इति असंस्कृतादिशतम् ।

बृहद् बृहस्पति र्वाग्मीवाचस्पतिरुदारधीः ।
मनीषी धिषणो धीमान् शेमुषीशो गिरां पतिः ॥ १७१

नैकरूपो नयोत्तुङ्गो नैकात्मा नैकधर्मकृत् ।
अविज्ञेयोऽप्रतर्क्यात्मा कृतज्ञः कृतलक्षणः ॥ १७२

ज्ञानगर्भो दयागर्भो रत्नगर्भः प्रभास्वरः ।
पद्मगर्भो जगद्गर्भो हेमगर्भः सुदर्शनः ॥ १७३

लक्ष्मीवांस्त्रिदशाध्यक्षो द्रढीयानिन ईशिता ।
मनोहरो मनोज्ञाङ्गो धीरो गम्भीरशासनः ॥ १७४

धर्मयूपो दयायागो धर्मनेमिर्मुनीश्वरः ।
धर्मचक्रायुधो देवः कर्महा धर्मघोषणः ॥ १७५

अमोघवागमोघाज्ञो निर्मलोऽमोघशासनः ।
सुरूपः सुभगस्त्यागी समयज्ञः समाहितः ॥ १७६

सुस्थितः स्वास्थ्यभाक् स्वस्थो नीरजस्को निरुद्धवः ।
अलेपो निष्कलङ्कात्मा वीतरागो गतस्पृहः ॥ १७७

वश्येन्द्रियो विमुक्तात्मा निःसपत्नो जितेन्द्रियः ।
प्रशान्तोऽनन्तधामर्षिर्मङ्गलं मलहानघः ॥ १७८

अनीदृगुपमाभूतो दिष्टिर्दैवमगोचरः ।
अमूर्तो मूर्तिमानेको नैकी नानैकतत्त्वदृक् ॥ १७९

अध्यात्मगम्यो गम्यात्मा योगविद् योगिवन्दितः ।
सर्वत्रगः सदाभावी त्रिकालविषयार्थदृक् ॥ १८०

शङ्करः शंवदो दान्तो दमी क्षान्तिपरायणः ।
अधिपः परमानन्दः परात्मज्ञः परात्परः ॥ १८१

त्रिजगद्वल्लभोऽभ्यर्च्यस्त्रिजगन्मङ्गलोदयः ।
त्रिजगत्पतिपूज्याङ्घ्रिस्त्रिलोकाग्रशिखामणिः ॥ १८२

इति बृहदादिशतम् ।

त्रिकालदर्शी लोकेशो लोकधाता दृढव्रतः ।
सर्वलोकातिगः पूज्यः सर्वलोकैकसारथिः ॥ १८३

पुराणः पुरुषः पूर्वः कृतपूर्वाङ्गविस्तरः ।
आदिदेवः पुराणाद्यः पुरुदेवोऽधिदेवता ॥ १८४

युगमुख्यो युगज्येष्ठो युगादिस्थितिदेशकः ।
कल्याणवर्णः कल्याणः कल्यः कल्याणलक्षणः ॥ १८५

कल्याणप्रकृतिर्दीप्तकल्याणात्मा विकल्मषः ।
विकलङ्कः कलातीतः कलिलघ्नः कलाधरः ॥ १८६

देवदेवो जगन्नाथो जगद्बन्धुर्जगद्विभुः ।
जगद्धितैषी लोकज्ञः सर्वगो जगदग्रजः ॥ १८७

चराचरगुरुर्गोप्यो गूढात्मा गूढगोचरः ।
सद्योजातः प्रकाशात्मा ज्वलज्ज्वलनसप्रभः ॥ १८८

आदित्यवर्णो भर्माभः सुप्रभः कनकप्रभः ।
सुवर्णवर्णो रुक्माभः सूर्यकोटिसमप्रभः ॥ १८९

तपनीयनिभस्तुङ्गो बालार्काभोऽनलप्रभः ।
सन्ध्याभ्रबभ्रुर्हेमाभस्तप्तचामीकरच्छविः ॥ १९०

निष्टप्तकनकच्छायः कनत्काञ्चनसन्निभः ।
हिरण्यवर्णः स्वर्णाभः शातकुम्भनिभप्रभः ॥ १९१

द्युम्नाभो जातरूपाभस्तप्तजाम्बूनदद्युतिः ।
सुधौत कलधौतश्रीः प्रदीप्तो हाटकद्युतिः ॥ १९२

शिष्टेष्टः पुष्टिदः पुष्टः स्पष्टः स्पष्टाक्षरः क्षमः ।
शत्रुघ्नोऽप्रतिघोऽमोघः प्रशास्ता शासिता स्वभूः ॥ १९३

शान्तिनिष्ठो मुनिज्येष्ठः शिवतातिः शिवप्रदः ।
शान्तिदः शान्तिकृच्छान्ति कान्तिमान् कामितप्रदः ॥ १९४

श्रेयोनिधिरधिष्ठानमप्रतिष्ठः प्रतिष्ठितः ।
सुस्थिरः स्थावरः स्थास्णुः प्रथीयान् प्रथितः पृथुः ॥ १९५

इति त्रिकालदर्श्यादिशतम् ।

दिग्वासा वातरशनो निर्ग्रन्थेशो निरम्बरः ।
निष्किञ्चनो निराशंसो ज्ञानचक्षुरमोमुहः ॥ १९६

तेजोराशिरनन्तौजा ज्ञानाब्धिः शीलसागरः ।
तेजोमयोऽमितज्योतिर्ज्योतिमूर्तिस्तमोपहः ॥ १९७

जगच्चूडामणिर्दीप्तः शंवान् विघ्नविनायकः ।
कलिघ्नः कर्मशत्रुघ्नो लोकालोकप्रकाशकः ॥ १९८

अनिद्रालुरतन्द्रालुर्जागरूकः प्रमामयः ।
लक्ष्मीपतिर्जगज्ज्योतिर्धर्मराजः प्रजाहितः ॥ १९९

मुमुक्षुर्बन्धमोक्षज्ञो जिताक्षो जितमन्मथः ।
प्रशान्तरसशैलूषो भव्यपेटकनायकः ॥ २००

मूलकर्त्ताखिलज्योतिर्मलघ्नो मूलकारणम् ।
आप्तो वागीश्वरः श्रेयान् श्रायसोक्तिर्निरुक्तवाक् ॥ २०१

प्रवक्ता वचसामीशो मारजिद् विश्वभाववित् ।
सुतनुस्तनुनिर्मुक्तः सुगतो हतदुर्नयः ॥ २०२

श्रीशः श्रीश्रितपादाब्जो वीतभीरभयङ्करः ।
उत्सन्नदोषो निर्विघ्नो निश्चलो लोकवत्सलः ॥ २०३

लोकोत्तरो लोकपतिर्लोकचक्षुरपारधीः ।
धीरधीर्बुद्धसन्मार्गः शुद्धः सूनृतपूतवाक् ॥ २०४

प्रज्ञापारमितः प्राज्ञो यतिर्नियमितेन्द्रियः ।
भदन्तो भद्रकृद्भद्रः कल्पवृक्षो वरप्रदः ॥ २०५

समुन्मीलितकर्मारिः कर्मकाष्ठाशुशुक्षणिः ।
कर्मण्यः कर्मठः प्रांशुर्हेयादेयविचक्षणः ॥ २०६

अनन्तशक्तिरच्छेद्यस्त्रिपुरारिस्त्रिलोचनः ।
त्रिनेत्रस्त्र्यम्बकस्त्र्यक्षः केवलज्ञानवीक्षणः ॥ २०७

समन्तभद्रः शान्तारिर्धर्माचार्यो दयानिधिः ।
सूक्ष्मदर्शी जितानङ्गः कृपालुर्धर्मदेशकः ॥ २०८

शुभंयुः सुखसाद्भूतः पुण्यराशिरनामयः ।
धर्मपालो जगत्पालो धर्मसाम्राज्यनायकः ॥ २०९

इति दिग्वासाद्यष्टोत्तरशतम् ।

धाम्नांपते ! तवामूनि नामान्यागमकोविदैः ।
समुच्चितान्यनुध्यायन् पुमान् पूतस्मृतिर्भवेत् ॥ २१०

गोचरोऽपि गिरामासां त्वमवाग्गोचरो मतः ।
स्तोता तथाप्यसन्दिग्धं त्वत्तोऽभीष्टफलं भजेत् ॥ २११

त्वमतोऽसि जगद्बन्धुस्त्वमतोऽसि जगद्भिषक् ।
त्वमतोऽसि जगद्धाता त्वमतोऽसि जगद्धितः ॥ २१२

त्वमेकं जगतां ज्योतिस्त्वं द्विरूपोपयोगभाक् ।
त्वं त्रिरूपैकमुक्त्यङ्गः स्वोत्थानन्तचतुष्टयः ॥ २१३

त्वं पञ्चब्रह्म तत्त्वात्मा पञ्चकल्याणनायकः ।
षड्भेदभावतत्त्वज्ञस्त्वं सप्तनयसंग्रहः ॥ २१४

दिव्याष्टगुणमूर्तिस्त्वं नवकेवललब्धिकः ।
दशावतारनिर्धार्यो मां पाहि परमेश्वर ! ॥ २१५

युष्मन्नामावलीदृब्ध-विलसत्स्तोत्रमालया ।
भवन्तं परिवस्यामः प्रसीदानुगृहाण नः ॥ २१६

इदं स्तोत्रमनुस्मृत्य पूतोभवति भाक्तिकः ।
यः संपाठं पठत्येनं स स्यात् कल्याणभाजनम् ॥ २१७

ततः सदेदं पुण्यार्थी पुमान् पठतु पुण्यधीः ।
पौरुहूतीं श्रियं प्राप्तुं परमामभिलाषुकः ॥ २१८

स्तुत्वेति मघवा देवं चराचरजगद्गुरुम् ।
ततस्तीर्थविहारस्य व्यधात् प्रस्तावनामिमाम् ॥ २१९

भगवन् भव्यसस्यानां पापावग्रहशोषिणाम् ।
धर्मामृतप्रसेकेन त्वमेधि शरणं विभो ॥ २२०

भव्यसार्थाधिपप्रोद्यद्दयाध्वजविराजित ।
धर्मचक्रमिदं सज्जं त्वज्जयोद्योगसाधनम् ॥ २२१

निर्धूय मोहपृतनां मुक्तिमार्गोपरोधिनीम् ।
तवोपदेष्टुं सन्मार्गं कालोऽयं समुपस्थितः ॥ २२२

पू.महामहोपाध्यायश्री विनयविजयगणिविरचितम्

## ६. ॥ श्रीजिनसहस्त्रनामस्तोत्रम् ॥

नमस्ते समस्तेप्सितार्थप्रदाय,
नमस्ते महार्हन्त्यलक्ष्मीप्रदाय ।
नमस्ते चिदानन्दतेजोमयाय,
नमस्ते ! नमस्ते ! नमस्ते ! नमस्ते ! ॥ १

नमस्ते जगन्नाथ ! विश्वैकनेतः !,
नमस्ते महामोहमल्लैकजेतः ! ।
नमस्ते सतां मोक्षशिक्षाविनेतः, न० ॥ २

नमस्ते जिनेन्द्र ! प्रभो ! वीतराग !,
नमस्ते स्वयम्भो ! जगद्गन्धनाग ! ।
नमस्ते स्फुरज्ज्ञानजाग्रद्विराग !, न० ॥ ३

नमस्ते जगज्जन्तुजीवातुजन्म !,
नमस्ते प्रभो ! भाग्यलभ्याङ्घ्रिपद्म ! ।
नमस्ते लसत्सत्यसन्तोषसद्म !, न० ॥ ४

नमस्तेऽत्र धर्मार्थिनां धर्मबन्धो !,
नमस्ते सतां पुण्यकारुण्यसिन्धो ! ।
नमस्ते निरुद्धातिदुष्टाश्रवान्धो !, न० ॥ ५

नमस्ते महस्विन् ! नमस्ते यशस्विन् !,
नमस्ते वचस्विन् नमस्ते तपस्विन् ! ।
नमस्ते गुणैरद्भुतैरद्भुताय, न० ॥ ६

नमस्ते महात्मन् ! नमस्ते चिदात्मन् !,
नमस्ते शिवात्मन् ! नमस्ते परात्मन् ! ।
नमस्ते स्थिरात्मन् ! नमस्तेऽन्तरात्मन् !, न० ॥ ७

नमस्ते गुणानन्त्यमाहात्म्यधाम्ने,
नमस्ते मुनिग्रामणे ध्येयनाम्ने ।
नमस्ते विशुद्धावबोधात्मकाय, न० ॥ ८

नमस्ते भवप्रान्तरस्वर्द्रुमाय,
नमस्ते कृतास्मन्मनोविश्रमाय ।
नमस्ते गलज्जन्ममृत्युश्रमाय, न० ॥ ९

नमस्ते सुधाधोरणीवल्लभाय,
नमस्ते भवेऽस्मिन् भृशं दुर्लभाय ।
नमस्तेऽत्र लब्धाय पुण्यैःप्रकर्षैः, न० ॥ १०

नमस्ते सुधासारनेत्राञ्जनाय,
नमस्ते सदाऽस्मन्मनोरञ्जनाय ।
नमस्ते भवभ्रान्तिभीभञ्जनाय, न० ॥ ११

नमस्ते शुचिज्ञानरत्नाकराय,
नमस्ते सतां कल्पकारस्कराय ।
नमस्ते जगज्जीवभद्रङ्कराय, न० ॥ १२

नमो मण्डिताखण्डभूमण्डलाय,
नमो भक्तिनम्राखिलाखण्डलाय ।
नमो युक्तयोगाय योगीश्वराय, न० ॥ १३

नमस्ते सदा सुप्रसन्नाननाय,
नमः सिद्धिसम्पल्लताकाननाय ।
नमो दत्तविद्वन्मनस्सम्मदाय, न० ॥ १४

नमस्तेऽवतीर्णाय विश्वोपकृत्यै,
नमस्ते कृतार्थाय सद्धर्मकृत्यैः ।
नमस्ते प्रकृत्या जगद्वत्सलाय, न० ॥ १५

नमस्तीर्थकृन्नामकर्मार्जिताय,
नमोऽचिन्त्यसामर्थ्यविस्फूर्जिताय ।
नमो योगिने योगमुद्रान्विताय, न० ॥ १६

नमोऽनुत्तरस्वर्गिभिः पूजिताय,
नमस्तन्मनःसंशयच्छेदकाय ।
नमोऽनुत्तरज्ञानलक्ष्मीश्वराय, न० ॥ १७

नमस्ते धरित्रीव सर्वंसहाय,
नमस्तेऽन्तरङ्गारिभिर्दुस्सहाय ।
नमस्ते तपस्सत्यधूर्धूर्वहाय न० ॥ १८

नमस्ते शुभोपार्जितार्हत्पदाय,
नमस्ते तृतीये भवे निश्चिताय ।
नमो धर्मसम्यक्फलावञ्चिताय, न० ॥ १९

नमो नव्यदिव्योपभोगाभिधाय,
नमस्तेषु तत्रापि वैरङ्गिकाय ।
नमो योगसात्म्यैकतासङ्गताय, न० ॥ २०

नमस्ते भुवि स्वर्गलोकच्युताय,
नमस्ते सतीकुक्षिकोशङ्गताय ।
नमस्ते त्रिलोकोपकारोद्‌गताय, न० ॥ २१

नमस्ते शुभस्वप्नसंसूचिताय,
नमस्ते जनन्याप्तसद्दोहदाय ।
नमस्ते भवत्तद्वपुःसौष्ठवाय, न० ॥ २२

नमस्ते जनुर्भूषिताढ्यान्वयाय,
नमो रत्नरैवृष्टिपूर्णालयाय ।
नमो वर्द्धमानद्विधावैभवाय, न० ॥ २३

नमो दिक्कुमारीकृतस्वोचिताय
नमस्ताभिरर्चाविधिस्वञ्चिताय ।
नमो ज्ञानरत्नत्रयोदञ्चिताय, न० ॥ २४

नमो द्योतिताशेषविश्वत्रयाय,
नमः सर्वलोकैकसौख्यावहाय ।
नमः प्रोल्लसज्जङ्गमस्थावराय, न० ॥ २५

नमः सुप्रसन्नीकृताशामुखाय,
नमस्ते समुज्जृम्भितोर्वीसुखाय ।
नमो नारकेभ्योऽपि दत्तोत्सवाय, न० ॥ २६

नमस्तेऽद्भुतङ्कम्पितेन्द्रासनाय,
नमस्ते मुदा तैः कृतोपासनाय ।
नमः कल्पितध्वान्तनिर्वासनाय, न० ॥ २७

नमस्ते सुराद्रौ सुरैः प्रापिताय,
नमस्ते कृतस्नात्रपूजोत्सवाय ।
नमस्ते विनीताप्सरःपूजिताय, न० ॥ २८

नमोऽङ्गुष्ठपीयूषपानोच्छ्रिताय,
नमस्ते वपुःसर्वनष्टामयाय ।
नमस्ते यथायुक्तसर्वाङ्गकाय, न० ॥ २९

नमस्ते मलस्वेदखेदोज्झिताय,
नमस्ते शुचिक्षीररुक्शोणिताय ।
नमस्ते मुखश्वासह्रीणाम्बुजाय, न० ॥ ३०

नमस्ते मणिस्वर्णजिद्गौरभाय,
नमस्ते प्रसर्पद्वपुःसौरभाय ।
नमोऽनीक्षिताहारनीहारकाय, न० ॥ ३१

नमस्ते सुरौघैरनुक्रीडिताय,
नमस्ते शिशुक्रीडया व्रीडिताय ।
नमस्ते सुराधीश्वरैरीडिताय, न० ॥ ३२

नमो राजहंसेभगोवद्गताय,
नमश्चातुरीमाधुरीसङ्गताय ।
नमः सर्वशास्त्राब्धिपारङ्गताय, न० ॥ ३३

नमः कोमलालापपीयूषवर्ष !,
नमो बाललीलाकृतज्ञातिहर्ष ।
नमस्ते प्रभो ! प्राज्यपुण्यप्रकर्ष !, न० ॥ ३४

नमः स्फारकौमारलीलालसाय,
नमस्ते स्वतस्त्यक्तदुर्लालसाय ।
नमस्ते शुचित्वेऽपि निःसाध्वसाय, न० ॥ ३५

नमस्ते कृतान्वर्थयुक्ताभिधाय,
नमस्ते स्वतःसिद्धविद्याविधाय ।
नमस्ते स्वतो लब्धशिक्षोपधाय, न० ॥ ३६

नमोऽष्टाढ्यसाहस्रसल्लक्षणाय,
नमस्ते कृतप्राणिसंरक्षणाय ।
नमोऽक्षीणदाक्षिण्यधीदक्षिणाय, न० ॥ ३७

नमोऽनङ्कराकेन्दुजैत्राननाय,
नमो दक्षहृल्लक्षसन्दानकाय ।
नमस्ते कपोलान्तशान्तस्मिताय, न० ॥ ३८

नमोऽनन्तगाम्भीर्यवर्याशयाय,
नमः संवृतानन्तशक्त्याश्रयाय ।
नमो धैर्यनिस्तर्जितेन्द्राचलाय, न० ॥ ३९

नमो यौवनेऽप्युद्गतस्थावराय,
नमः प्रातिभोत्थव्यवस्थावराय ।
नमो विष्वगुद्यत्प्रभापीवराय, न० ॥ ४०

नमो जन्मतोऽप्यार्यमार्गाध्वगाय,
नमो रुद्धदुर्नीतिचर्याऽपगाय ।
नमस्ते विनाऽध्यापकं शिक्षिताय, न० ॥ ४१

नमो यौवने प्राप्तपाणिग्रहाय,
नमो मुक्तभोगोपभोगाग्रहाय ।
नमस्ते कृतप्राच्यकर्मौषधाय, न० ॥ ४२

नमस्ते त्रिवर्गक्रियासाधकाय,
नमस्ते यथार्हं तदाराधकाय ।
नमस्तुर्यवर्गेऽप्यनिर्बाधकाय, न० ॥ ४३

नमो दान्तपञ्चेन्द्रियान्तःस्थलाय,
नमःकीलिताजस्रकम्प्रोच्चलाय ।
नमो ज्ञानधाराधुतान्तर्मलाय, न० ॥ ४४

नमो बिभ्रते सात्त्विकाञ्चित्तवृत्तिं,
नमो बिभ्रते मानसैनोनिवृत्तिम् ।
नमः पश्यते सर्वतस्तत्त्वदृष्ट्या, न० ॥ ४५

नमो भोगभङ्गीप्रसङ्गानुगाय,
नमो नोपलिप्ताय तत्तद्रजोभिः ।
नमः प्रोल्लसत्पुण्डरीकोपमाय, न० ॥ ४६

नमः सम्पतद्देवलोकान्तिकाय,
नमस्तैः स्तुताङ्घ्रिद्वयोपान्तिकाय ।
नमो ज्ञाततीर्थप्रवृत्त्यर्थनाय, न० ॥ ४७

नमो निश्चितात्मीयदीक्षाक्षणाय,
नमो ज्ञानशुद्धोपयोगेक्षणाय ।
नमस्ते निरीहाय वीतस्पृहाय, न० ॥ ४८

नमस्ते कृतज्ञातिवर्गार्हणाय,
नमः प्रीणितैतत्कृतोद्बृंहणाय ।
नमस्तेऽर्पितस्वापतेयाय तेभ्यो, न० ॥ ४९

नमो दत्तसांवत्सरोत्सर्जनाय,
नमो विश्वदारिद्र्यनिस्तर्जनाय ।
नमस्ते कृतार्थी-कृतार्थिव्रजाय, न० ॥ ५०

नमः प्रत्यहं कारितोद्घोषणाय,
नमो भो ! वृणीतेति लोकम्पृणाय ।
नमो दानवीराधिवीरोद्धुराय, न० ॥ ५१

नमस्तेऽर्पितानेकगर्जद्गजाय,
नमस्तेऽर्पितानेकवाहव्रजाय ।
नमस्ते समुत्तानदानध्वजाय, न० ॥ ५२

नमस्ते प्रभो ! दत्तदिव्याम्बराय,
नमस्तेऽर्पितस्वर्णरत्नोत्कराय ।
नमो दीनदीनारधाराधराय, न० ॥ ५३

नमः प्रत्यहं यच्छते हेमकोटिं,
नमो यच्छतेऽष्टौ च लक्षाणि तेषाम् ।
नमो यच्छतेऽन्यद्यथेच्छं जनानाम्, न० ॥ ५४

नमस्ते वदान्यीभवन्मार्गणाय,
नमस्ते घनापूर्णगेहाङ्गणाय ।
नमस्ते कृतानेककोटिध्वजाय, न० ॥ ५५

नमस्ते मनःकामकल्पद्रुमाय,
नमस्ते प्रभो ! कामधेनूपमाय ।
नमस्ते निरस्तार्थिनामाश्रमाय, न० ॥ ५६

नमस्त्यक्तसप्ताङ्गराज्येन्दिराय,
नमस्त्यक्तसत्सुन्दरीमन्दिराय ।
नमस्त्यक्तमाणिक्यमुक्ताफलाय, न० ॥ ५७

नमस्तत्क्षणोपागतस्वर्धवाय,
नमस्तत्कृतप्रौढदीक्षोत्सवाय ।
नमस्तत्र तत्तत्स्फुरद्वैभवाय, न० ॥ ५८

नमस्ते प्रभो ! याप्ययानस्थिताय,
नमस्तेऽवनाय प्रभो ! प्रस्थिताय ।
नमस्ते शमस्पृग्मनःसुस्थिताय, न० ॥ ५९

नमो यानधुर्यीभवद्वासवाय,
नमो दूरविक्षिप्तगर्वाऽऽसवाय ।
नमः शुद्धभावावरुद्धाश्रवाय, न० ॥ ६०

नमस्तेऽग्रगच्छन्महेन्द्रध्वजाय,
नमस्तेऽग्रगच्छद्गजाश्वव्रजाय ।
नमस्तेऽभितः सञ्चरद्राजकाय, न० ॥ ६१

नमोऽमर्त्यसङ्कीर्णितोर्वीतलाय,
नमो देवदीप्यन्नभोमण्डलाय ।
नमस्ते नदद्दिव्यतूर्यत्रिकाय, न० ॥ ६२

नमो दीप्ररत्नप्रभाडम्बराय,
नमो बन्दिशब्दोर्जिताशाम्बराय ।
नमो नागरीनागरैर्वीक्षिताय, न० ॥ ६३

नमस्त्यक्तसर्वाङ्गिकाभूषणाय,
नमो निर्गतत्रित्रिधादूषणाय ।
नमः पञ्चमुष्ट्याऽलकोल्लुञ्चकाय, न० ॥ ६४

नमस्ते समुद्गीर्णसामायिकाय,
नमः सर्वदैव त्रिधाऽमायिकाय ।
नमस्सर्वसावद्ययोगोज्झिताय, न० ॥ ६५

नमस्ते मनःपर्यवज्ञानशालिन् !,
नमश्चारुचारित्रपावित्र्यमालिन् ।
नमो नाथ ! षड्जीवकायावकाय, न० ॥ ६६

नमस्ते समुद्यद्विहारक्रमाय,
नमःकर्मवैरिस्फुरद्विक्रमाय ।
नमः स्वीयदेहेऽपि ते निर्ममाय, न० ॥ ६७

नमो ग्राम एकैकरात्रोषिताय,
नमः पत्तने पञ्चरात्रोषिताय ।
नमो भावशुद्धैषणापोषिताय, न० ॥ ६८

नमस्तुल्यरूपाय रात्रौ दिवा वा,
नमस्तुल्यरूपाय तेऽन्तर्बहिश्च ।
नमस्तुल्यरूपाय दुःखे सुखे वा, न० ॥ ६९

नमस्तुल्यचित्ताय मित्रे रिपौ वा,
नमस्तुल्यचित्ताय लोष्ठे मणौ वा ।
नमस्तुल्यचित्ताय गालौ स्तुतौ वा, न० ॥ ७०

नमस्तुल्यचित्ताय मोक्षे भवे वा,
नमस्तुल्यचित्ताय जीर्णे नवे वा ।
नमस्तुल्यचित्ताय मेध्येऽशुचौ वा, न० ॥ ७१

नमस्ते प्रभो ! मृत्युतो निर्भयाय,
नमस्ते प्रभो ! जीविते निःस्पृहाय ।
नमस्ते प्रभो ! स्वस्वरूपे स्थिताय, न० ॥ ७२

नमस्ते प्रभोऽनुत्तरक्षान्तिकर्त्रे,
नमस्ते प्रभो ! मुक्तिसम्भुक्तिकर्त्रे ।
नमस्ते प्रभो ! मार्दवाढ्यार्जवाय, न० ॥ ७३

नमस्ते प्रभो ! सत्तपस्संयमाय,
नमस्ते स्फुरद्ब्रह्मणेऽकिञ्चनाय ।
नमस्ते प्रभो ! सत्यशौचान्विताय, न० ॥ ७४

नमस्ते प्रभो ! युक्तिमन्निर्णयाय,
नमो गुप्तवाक्कायचेतस्त्रयाय ।
नमो धर्मसद्ध्यानतानैकताय, न० ॥ ७५

नमः श्रेणिमारोहते निष्प्रपातं,
नमस्तन्वते सप्तदृग्मोहघातम् ।
नमस्ते प्रभो ! निर्गतायुस्त्रयाय, न० ॥ ७६

नमस्ते क्रमोद्यद्गुणस्थानकाय,
नमस्ते परिक्षीणनिद्राभयाय ।
नमस्तेऽजुगुप्साय वेदोज्झिताय, न० ॥ ७७

नमो विप्रमुक्ताय हास्येन रत्या,
नमो विप्रमुक्ताय शोकारतिभ्याम् ।
नमस्ते क्षरन्नोकषायाय मूलात्, न० ॥ ७८

नमश्छिन्दते क्रोधमानौ दुरन्तौ,
नमो निघ्नते दम्भलोभौ समूलम् ।
नमस्ते यथाख्यातचारित्रराज्ञे, न० ॥ ७९

नमः क्षीणमोहाय सुस्नातकाय,
नमो घातिकर्मद्विषद्घातकाय ।
नमो जातकर्मत्रिषष्टिक्षयाय, न० ॥ ८०

नमः प्रज्वलद्ध्यानदावानलाय,
नमो दग्धनिश्शेषकर्मोपलाय ।
नमस्ते चतुःकर्मशेषोदयाय, न० ॥ ८१

नमस्तेऽत्र कर्मद्वयोदीरकाय,
नमस्सत्तयाऽशीतियुक्पञ्चकाय ।
नमो बध्नते त्रिक्षणस्थायिसातं, न० ॥ ८२

नमो ध्यातशुक्लाद्यभेदद्वयाय,
नमस्ते तृतीयान्तरालस्थिताय ।
नमः शुक्ललेश्यास्थितौ निश्चलाय, न० ॥ ८३

नमः केवलज्ञानसद्दर्शनाय,
नमस्ते कृतार्हत्पदस्पर्शनाय ।
नमस्ते हताष्टादशाऽऽदीनवाय, न० ॥ ८४

नमो जानते पश्यते सर्वलोक-
मलोकं तथैवाशु विद्वन्नमस्ते ।
नमो द्रव्यभावावबोधात्मकाय, न० ॥ ८५

नमस्तत्क्षणायातदेवासुराय,
नमोऽनुत्तरर्द्धिप्रभाभासुराय ।
नमो रत्नरैरूप्यवप्रत्रयाय, न० ॥ ८६

नमस्ते चतुर्दिग्विराजन्मुखाय,
नमस्तेऽभितः संसदां सत्सुखाय ।
नमो योजनच्छायचैत्यद्रुमाय, न० ॥ ८७

नमो योजनासीनतावज्जनाय,
नमश्चैकवाग्बुद्धनानाजनाय ।
नमो भानुजैत्रप्रभामण्डलाय, न० ॥ ८८

नमो दूरनष्टेतिवैरज्वराय,
नमो नष्टदुर्वृष्टिरुग्विड्वराय ।
नमो नष्टसर्वप्रजोपद्रवाय, न० ॥ ८९

नमो धर्मचक्रत्रसत्तामसाय,
नमः केतुहृष्यत्सुदृग्मानसाय ।
नमो व्योमसञ्चारिसिंहासनाय, न० ॥ ९०

नमश्चातुरङ्गाऽऽतपत्रत्रयाय,
नमश्चामरैरष्टभिर्वीजिताय ।
नमः स्वर्णपद्माहिताङ्घ्रिद्वयाय न० ॥ ९१

नमोऽधोमुखाग्रीभवत्कण्टकाय,
नमो ध्वस्तकर्मारिनिष्कण्टकाय ।
नमस्तेऽभितो नम्रमार्गद्रुमाय, न० ॥ ९२

नमस्तेऽनुकूलीभवन्मारुताय,
नमस्ते सुखाकृद्विहायोरुताय ।
नमस्तेऽम्बुसिक्ताभितो योजनाय, न० ॥ ९३

नमो योजनाजानुपुष्पोच्चयाय,
नमोऽवस्थितश्मश्रुकेशादिकाय ।
नमस्ते सुपञ्चेन्द्रियार्थोदयाय, न० ॥ ९४

नमो नाकिकोट्याऽविविक्तान्तिकाय,
नमो दुन्दुभिस्पृष्टभूमित्रिकाय ।
नमोऽभ्रंलिहाग्रोदितेन्द्रध्वजाय, न० ॥ ९५

नमः प्रातिहार्याष्टकालङ्कृताय,
नमो योजनव्याप्तवाक्यामृताय ।
नमस्ते विनालङ्कृतिं सुन्दराय, न० ॥ ९६

नमस्तेऽन्वहं द्विर्भवद्देशनाय,
नमस्सप्ततत्त्वाश्रितोद्देशनाय ।
नमः प्रोक्तषड्द्रव्यरूपत्रयाय, न० ॥ ९७

नमस्ते मतोत्पत्तिसत्त्वव्ययाय,
नमस्ते त्रिपद्यात्तविश्वत्रयाय ।
नमस्त्रासितैकान्तवादिद्विपाय, न० ॥ ९८

नमः क्लृप्ततीर्थस्थितिस्थापनाय,
नमः सच्चतुःसङ्घसत्यापनाय ।
नमस्ते चतुर्भेदधर्मार्पकाय, न० ॥ ९९

नमः प्रोक्तनिःश्रेयसश्रीपथाय,
नमो नाशितश्रावकान्तर्व्यथाय ।
नमस्तेऽस्तु रत्नत्रयीदीपकाय, न० ॥ १००

नृतिर्यक्सुराप्तस्वसामायिकाय,
नमस्ते नमोऽमोघवाक्जायुकाय ।
नमो द्वादशप्रौढपर्षत्प्रियाय, न० ॥ १०१

नमः स्वार्थवाहाय मुक्त्यध्वगानाम्,
नमोऽवारपाराय सूक्त्यापगानाम् ।
विहारैर्नमः पावितोर्वीतलाय, न ॥ १०२

नमो द्वादशाङ्गीनदीभूधराय,
नमः सप्तभङ्गीचमूदुर्धराय ।
नमस्ते प्रमाणोपपन्नागमाय, न० ॥ १०३

नमो बुद्धतत्त्वाय तद्बोधकाय,
नमः कर्ममुक्ताय तन्मोचकाय ।
नमस्तीर्णजन्माब्धये तारकाय, न० ॥ १०४

नमो लोकनाथाय लोकोत्तमाय,
नमस्ते त्रिलोकप्रदीपोपमाय ।
नमो निर्निदानं जनेभ्यो हिताय, न० ॥ १०५

नमः पावनेभ्योऽपि ते पावनाय,
नमः सिद्धियोगैः कृतोद्धाषनाय ।
नमो दत्तनिःशेषजीवाभयाय, न० ॥ १०६

नमोऽन्तर्मुहूर्त्तावशिष्टे यताय,
नमः सारशैलेश्यवस्थोचिताय ।
नमस्ते चतुष्कर्मतुल्यांशताय,न० ॥ १०७

नमस्ते क्रमाद्रुद्धयोगत्रयाय,
नमो लेश्यया शुक्लयाऽप्युज्झिताय ।
नमः पूर्णशुक्लान्त्यभेदद्वयाय, न० ॥ १०८

नमस्ते विशुद्ध्या महानिर्जराय,
नमोऽशीतियुक्पञ्चकर्मोत्किराय ।
नमस्ते त्रिभागोनदेहोच्छ्रयाय, न० ॥ १०९

नमस्ते पतत्कार्मणौदारिकाय,
नमोऽनादिसम्बन्धमुक्ताणुकाय ।
नमस्तत्क्षणाप्तस्थिरस्थानकाय, न० ॥ ११०

नमस्तत्र गत्याऽस्पृशन्त्या गताय,
नमः सिद्धबुद्धाय पारङ्गताय ।
नमः साद्यनन्तस्थितिस्थायुकाय, न० ॥ १११

नमो वीतसंसाररुक्सङ्कथाय,
नमो निर्जराजन्ममृत्युव्यथाय ।
नमः शाश्वतायामलायाचलाय, न० ॥ ११२

नमः केवलज्ञानदृग्लक्षणाय,
नमोऽनुक्रमैकैकबोधक्षणाय ।
नमो ज्ञातदृष्टाखिलार्थप्रथाय, न० ॥ ११३

नमस्तेऽनुपाख्येयसौख्याह्व(ह्न)याय,
नमः स्वोत्थितानन्तवीर्योदयाय ।
नमोऽर्वाग्दृशां वाङ्मनोऽगोचराय, न० ॥ ११४

नमो देहभृद्देहदेवालयाय,
नमस्तेऽत्र चैत्याय चैतन्यमूर्त्या ।
नमः स्वाविभेदेन दक्षेक्षिताय, न० ॥ ११५

नमो निर्विकाराय नीरञ्जनाय,
नमो योगिलक्ष्याय निर्व्यञ्जिताय ।
नमस्तेऽनुमानोपमानातिगाय, न० ॥ ११६

नमः स्थापनाद्रव्यनामात्मकाय,
नमस्ते पुनानाय कालत्रयेऽस्मान् ।
नमो भागधेयाय भव्याङ्गभाजां, न० ॥ ११७

नमस्ते प्रभो ! श्रीयुगादीश्वराय,
नमस्तेऽजिताय प्रभो ! शम्भवाय ।
नमो नाथ ! सैद्धार्थतीर्थेश्वराय, न० ॥ ११८

नमो माङ्गलीयस्फुरन्मङ्गलाय,
नमस्ते महःसद्मपद्मप्रभाय ।
नमस्ते सुपार्श्वाय चन्द्रप्रभाय, न० ॥ ११९

नमः पुष्पदन्ताय ते शीतलाय,
नमः श्रीजितेन्द्राय ते वैष्णवाय ।
नमो वासुपूज्याय पूज्याय सद्भिः, न० ॥ १२०

नमः श्यामया सुप्रसूताय नेतः,
नमोऽनन्तनाथाय धर्मेश्वराय ।
नमः शान्तये कुन्थुनाथाय तुभ्यं, न० ॥ १२१

नमस्तेऽप्यराख्येश ! नम्रामराय,
नमो मल्लिदेवाय ते सुव्रताय ।
नमस्ते नमिस्वामिने नेमयेऽर्हन् !, न० ॥ १२२

नमस्ते प्रभो ! पार्श्वविश्वेश्वराय,
नमस्ते विभो ! वर्द्धमानाभिधाय ।
नमोऽचिन्त्यमाहात्म्यचिद्वैभवाय, न० ॥ १२३

नमस्तेऽवसर्प्पिण्यभिख्येऽत्र काले,
नमस्ते चतुर्विंशतावञ्चिताङ्घ्रे ।
नमः केवलज्ञानिमुख्याह्वयाय, न० ॥ १२४

नमोऽनागतोत्सर्प्पिणीकालभोगे,
चतुर्विंशतावेष्यदार्हन्त्यशक्त्यै ।
नमः स्वामिने पद्मनाभादिनाम्ने, न० ॥ १२५

दशस्वप्यथैवं नमः कर्मभूषु,
चतुर्विंशतौ ते नमोऽनन्तमूर्त्यै ।
नमोऽध्यक्षमूर्त्यै विदेहावनीषु, न० ॥ १२६

नमस्ते प्रभो ! स्वामिसीमन्धराय,
नमस्तेऽधुनार्हन्त्यलक्ष्मीवराय ।
नमः प्राग्विदेहावनीमण्डनाय, न० ॥ १२७

नमस्तेऽधुना दृग्विदेहोद्गताय,
नमस्ते दशद्वैतदेवाद्भुताय ।
नमः सन्ततप्रातिहार्याष्टकाय, न० ॥ १२८

नमो भूर्भुवः स्वस्त्रयीशाश्वताय,
नमस्ते त्रिलोकीस्थिरस्थापनाय ।
नमो देवमर्त्त्यासुराभ्यर्चिताय, न० ॥ १२९

नमः स्वर्विमानेषु देवार्चिताय,
नमो ज्योतिष्केष्विन्दुसूर्यैर्नताय ।
नमोऽधोपि नम्रासुरव्यन्तराय, न० ॥ १३०

नमोऽलङ्कृतस्वेष्टभूभृद्वराय,
नमो व्याप्तनिश्शेषशस्यास्पदाय ।
नमः सर्वविश्वस्थितिस्थापकाय, न० ॥ १३१

नमस्तीर्थराजाय तेऽष्टापदाय,
नमः स्वर्णरत्नार्हदर्चास्पदाय ।
नमस्ते नतश्राद्धविद्याधराय, न० ॥ १३२

नमस्तीर्थसम्मेतशैलाह्वयाय,
नमो विंशतिप्राप्तनिःश्रेयसाय ।
नमःश्रव्यदिव्यप्रभावाश्रयाय, न० ॥ १३३

नमश्श्रोज्जयन्ताद्रितीर्थोत्तमाय,
नमो जातनेमित्रिकल्याणकाय ।
नमः शोभितोद्धारसौराष्ट्रकाय, न० ॥ १३४

नमस्तेऽर्बुदायाप्तचैत्यार्बुदाय,
नमो भव्यहृत्केकिलोकाम्बुदाय ।
नमः प्राच्यवंशेभ्यकीर्तिध्वजाय, न० ॥ १३५

नमस्ते प्रभो ! पार्श्वशङ्खेश्वराय,
नमस्ते यशोगौरगोडीधराय ।
नमस्ते वरकाणतीर्थेश्वराय, न० ॥ १३६

नमस्तेऽन्तरिक्षाय वामाऽङ्गजाय,
नमः सूरतस्थाय ते दिग्गजाय ।
नमो नाथ ! जीराउलीमण्डनाय, न० ॥ १३७

नमो देशपूर्यादिनानाह्वयाय,
नमो ध्येयनाम्ने महिम्नाऽव्ययाय ।
नमस्ते कृतारिष्टदुष्टक्षयाय, न० ॥ १३८

नमो वर्द्धमानप्रभोः शासनाय,
नमस्ते चतुर्वर्णसङ्घाय नित्यम् ।
नमो मन्त्रराजाय ते ध्येयपञ्च !, न० ॥ १३९

नमो जैनसिद्धान्तदुग्धार्णवाय,
नमोऽनेकतत्त्वार्थरत्नाश्रयाय ।
नमो हृद्यविद्येन्दिरासुन्दराय, न० ॥ १४०

नमो दर्शनज्ञानचारित्रशुद्ध्यै,
नमो भव्यसर्वोपधा[पाप] शुद्ध्यै ।
नमो भावनिर्ग्रन्थतथ्यक्रियायै, न० ॥ १४१

नमः श्राद्धधर्माय दानोत्तमाय,
नमस्ते चतुर्वर्गसिद्धिक्षमाय ।
नमस्ते चतुःशालकल्पद्रुमाय, न० ॥ १४२

नमो जैनवागीश्वरीदेवतायै,
नमो वैनयिक्या सुधीसेवितायै ।
नमो वाङ्मयामोघपीयूषवृष्ट्यै, न० ॥ १४३

नमस्कार एकोऽपि चेत्तीर्थनेतु-,
र्जनांस्तारयत्येव संसारवार्द्धेः ।
तदेतत्सहस्त्रं पुनः किं न हन्या-
न्नृणाङ्किल्बिषम्भूरिजन्मान्तरोत्थम् ॥ १४४

इक्को वि नमुक्कारो, जिणवरसहस्स वद्धमाणस्स ।
संसारसागराओ, तारेइ नरं व नारिं वा ॥ १४५

स्तवोऽयं प्रातरुदित-स्तमस्स्तोमच्छिदर्हताम् ।
नमस्कारसहस्त्रेण, सहस्त्रकिरणायताम् ॥ (अनुष्टुप्) १४६

सहस्त्रकिरणस्येव, स्तवस्यास्य प्रभावतः ।
दूरे दोषाः पलायन्ते, पुण्याहः प्रकटो भवेत् ॥(अनुष्टुप्) १४७

स्थित्वा वर्षारात्रं, गन्धारे क्ष्माग्निसंयममितेऽब्दे (१७३१) ।
श्रीविजयप्रभसूरि -प्रसादतः स्तोत्रमिदमुदितम् ॥ १४८

(अनुष्टुप्)

श्रीहीरहीरविजयाह्वयसूरिशिष्य-
श्रीकीर्तिकीर्तिविजयाभिधवाचकानाम् ।
शिष्येण ढौकितमिदं भगवत्पदाग्रे,
स्तोत्रं सुवर्णरचितं विनयाभिधेन ॥ (वसन्ततिलका) १४९

पू.उपा.श्री यशोविजयगणिविरचित:

## ७. ॥ श्रीसिद्धसहस्त्रनामकोश: ॥

(अनुष्टुप्)

ऐन्द्री श्रीः प्रणिधानस्य फलं यस्यानुषङ्गिकम् ।
मुख्यं महोदयप्राप्तिस्तं सिद्धं प्रणिदध्महे ॥ १

तस्याष्टाग्रसहस्राख्यास्मरणं शरणं सताम् ।
मङ्गलानां च सर्वेषां परमं मङ्गलं स्मृतम् ॥ २

**प्रथमशतकप्रकाश:**

अनादिशुद्धः[१] शुद्धात्मा[२] स्वयंज्योतिः[३] स्वयम्प्रभुः[४] ।
केवलः[५] केवली[६] ज्ञानी[७] केवलात्मा[८] कलोज्झितः[९] ॥ ३

सार्द्धसत्रिकलातीतो[१०]ऽन्यूनाधिक-कलानिधिः[११] ।
अनन्तदृग[१२] नन्तात्मा[१३]ऽनन्तप्राप्ति[१४] रनन्तजित्[१५] ॥ ४

परमेष्ठी[१६] परब्रह्म[१७] परमात्मा[१८] सनातनः[१९] ।
सदाशिवः[२०] परंज्योति[२१] र्ध्रुवः[२२] सिद्धो[२३] निरञ्जनः[२४] ॥ ५

अनन्तरूपो[२५]ऽनन्ताख्य[२६] स्तथारूप[२७] स्तथागतः[२८] ।
यथारूपो[२९] यथाजातो[३०] यथाख्यातो[३१] यथास्थितः[३२] ॥ ६

लोकाग्रमौलि[३३] र्लोकेशो[३४] लोकालोक-विलोककः[३५] ।
लोकेड्यो[३६] लोकपो[३७] लोकत्राता[३८] लोकाग्रशेखरः[३९] ॥ ७

विश्वदृग्[४०] विश्वतश्चक्षु[४१] र्विश्वतः पाणि[४२] रात्मभूः[४३] ।
स्वयम्भू[४४] र्विश्वतोबाहु[४५] र्विश्वात्मा[४६] विश्वतोमुखः[४७] ॥ ८

विश्वकृद्[४८] विश्वरूपश्च[४९] विश्वव्यापी[५०] विधु[५१] विधिः[५२] ।
विश्वशीर्षो[५३] नमद्विश्वो[५४] विश्वाधारश्च[५५] विश्वसूः[५६] ॥ ९

विश्वम्भर[:][५७] शिवो[५८] विश्वावतारो[५९] विश्वदर्पणः[६०] ।
विश्वख्यातो[६१] जयो[६२] मृत्युञ्जयो[६३] मृत्युनिवारणः[६४] ॥ १०

सर्वादिः[६५] सर्वगः[६६] सर्वजनीनः[६७] सर्वदर्शनः[६८] ।
सुश्रुतः[६९] सुस्थितः[७०] सुस्थः[७१] पुराणः[७२] प्राक्तनो[७३] विभुः[७४] ॥११

विधिशेषो[७५] विधेः सारः[७६] परो विधि-निषेधतः[७७] ।
प्रशान्तवाह्य[७८] निर्वाच्यौ[७९] विसभागपरिक्षयी[८०] ॥ १२

अपदो[८१] ऽनक्षरो[८२] ऽनिच्छो[८३] ह्येतद्व्यावृत्तिलक्षणः[८४] ।
ब्रह्मचर्यफलीभूतो[८५] ब्रह्मा[८६] ब्रह्मपदस्थितः[८७] ॥ १३

आत्मवान्[८८] वेदवान्[८९] विष्णु[९०] र्ब्रह्मवान्[९१] ब्रह्मसम्भवः[९२] ।
सूक्ष्मः[९३] परात्परो[९४] जेता[९५] जयी[९६] सर्वमलोज्झितः[९७] ॥ १४

उपासनानां फलद[९८] उपास्यत्वेन देशितः[९९] ।
सर्वाविप्रतिपन्नश्च[१००] कृषीष्ट कुशलानि नः ॥ १५

**द्वितीयशतकप्रकाशः**

धर्मवि[१]द्धर्मकृ[२]द्धर्मी[३] धर्मात्मा[४] धर्मदेशकः[५] ।
सुधर्मा[६] धर्मदो[७] धर्मनायको[८] धर्मसारथिः[९] ॥ १

दशधर्मा[१०] ऽनन्तधर्मा[११] धर्मधारः[१२] स्वधर्मगः[१३] ।
परधर्मविनिर्मुक्तो[१४] धर्मप्रापी[१५] विधर्मभूत्[१६] ॥ २

धर्मचक्री[१७] महाधर्मा[१८] धर्ममूर्तिः[१९] सुधर्मदृग्[२०] ।
धर्माङ्गो[२१] धर्मसन्न्यासी[२२] धर्माधर्मविवर्जितः[२३] ॥ ३

धर्मोत्तरो[२४] धर्मकीर्ति[२५] र्धर्ममुद्[२६] धर्ममण्डलः[२७] ।
धर्मानोघा[२८] धर्ममौलि[२९] र्धर्माग्रो[३०] धर्मशासनः[३१] ॥ ४

धर्मक्षमी[३२] धर्ममृदु[३३] र्धर्मर्जु[३४] र्धर्मसंयमः[३५] ।
धर्मसत्यो[३६] धर्मतपा[३७] धर्मब्रह्मा[३८] शुचिस्ततः[३९] ॥ ५

धर्मत्यागी[४०] धर्ममुक्ति[४१] र्धर्मस्थो[४२] धर्मशाश्वतः[४३] ।
धर्मलभ्यो[४४] धर्मसेव्यो[४५] धर्मश्रद्धावशंवदः[४६] ॥ ६

धर्मधातुः[४७] क्षमाधातुः[४८] श्रद्धाधातु[४९] रधातुभाग्[५०] ।
श्रीपातश्च[५१] निपातश्च[५२] ह्रीपातः[५३] पातकक्षयी[५४] ॥ ७

श्रेष्ठः[५५] स्थविष्ठः[५६] स्थविरो[५७] ज्येष्ठः[५८] प्रष्ठः[५९] पुरोहितः[६०] ।
गरिष्ठधी[६१] ररिष्टच्छिद्[६२] बर्हिष्ठो[६३] ऽनिष्ठ[६४] एव च ॥ ८

व्योममूर्ति[६५] रमूर्तिश्चा[६६] न्तरिक्षात्मा[६७] नभोमयः[६८] ।
गगनात्मा[६९] महाकाश[७०] श्चाम्बरात्मा[७१] निरम्बरः[७२] ॥ ९

सुयज्वा[७३] यज्ञपुरुषो[७४] यज्ञाङ्ग[७५] ममृतं[७६] हविः[७७] ।
धर्मयज्ञो[७८] महावीरो[७९] यजमानो[८०] नियाजभाग्[८१] ॥ १०

मन्त्रमूर्ति[८२] र्मन्त्रबीजं[८३] मन्त्रन्यासश्च[८४] मन्त्रराट्[८५] ।
महामन्त्रो[८६] मन्त्रपति[८७] र्मन्त्रस्थानं[८८] सुमन्त्रभूः[८९] ॥ ११

चिन्मन्त्रो[९०] मन्त्रसंस्थानो[९१] मन्त्रेड्यो[९२] मन्त्रपूजितः[९३] ।
मन्त्रमात्रः[९४] स्फुरन्मन्त्रो[९५] मन्त्रदेवश्च[९६] मान्त्रिकः[९७] ॥ १२

पञ्चमङ्गलमन्त्रश्च[९८] सर्वमन्त्रावतारवान्[९९] ।
मन्त्रे प्रत्यक्षरूपो[१००] यस्तस्मै भगवते नमः ॥ १३

## तृतीयशतकप्रकाशः

जगन्नाथो[१] जगज्ज्येष्ठो[२] जगत्स्वामी[३] जगत्पिता[४] ।
जगन्नेता[५] जगद्भर्ता[६] जगद्बन्धु[७]र्जगद्गुरुः[८] ॥ १

जगत्त्राता[९] जगत्पाता[१०] जगद्रक्षो[११] जगत्सखः[१२] ।
जगदीशो[१३] जगत्स्रष्टा[१४] जगद्वन्द्यो[१५] जगद्धितः[१६] ॥ २

जगत्पति[१७]र्जगन्मान्यो[१८] जगच्छास्ता[१९] जगन्मुखम्[२०] ।
जगच्चक्षु[२१]र्जगन्मित्रं[२२] जगद्दीपो[२३] जगत्सुहृत्[२४] ॥ ३

जगत्पूज्यो[२५] जगद्ध्येयो[२६] जगद्वि[२७]ज्जगदर्यमा[२८] ।
जगन्माता[२९] जगद्भ्राता[३०] जगद्भानु[३१]र्जगन्मणिः[३२] ॥ ४

जगदर्च्यो[३३] जगच्चिन्त्यो[३४] जगत्काम्यो[३५] जगत्प्रियः[३६] ।
जगद्धेतु[३७]र्जगत्केतु[३८]र्जगत्सीमा[३९] जगन्निधिः[४०] ॥ ५

जगद्वैद्यो[४१] जगज्ज्योति[४२]र्जगत्पोषी[४३] जगद्वृषः[४४] ।
जगत्पूषा[४५] जगद्धूर्यो[४६] जगद्बीजं[४७] जगत्तरुः[४८] ॥ ६

जगत्सारो[४९] जगन्मूलं[५०] सिद्धार्थः[५१] सिद्धशासनः[५२] ।
सिद्धस्थानः[५३] सुसिद्धान्तः[५४] सिद्धगीः[५५] सिद्धधीः[५६] सुधीः[५७]॥७

भवाब्ध्यगस्ति[५८]र्भवहृद्[५९] भवच्छि[६०]दपुनर्भवः[६१] ।
कालातीतो[६२] भवातीतो[६३] भयातीतः[६४] कलातिगः[६५] ॥ ८

गुणातीतो[६६] रजोऽतीतः[६७] कल्यातीतः[६८] कुलातिगः[६९] ।
वर्णातीतः[७०] पदातीतो[७१] मार्गातीतो[७२] ऽक्षरातिगः[७३] ॥ ९

वाक्यातीतः[७४] स्मयातीतो[७५] वाचोऽतीतो[७६] नयातिगः[७७] ।
वृत्त्यतीतः[७८] स्पृहातीतो[७९] न्यासातीतो[८०] जनातिगः[८१] ॥ १०

छन्दोऽतीतो[८२] जनातीतो[८३] लोकातीतो[८४] लयातिगः[८५] ।
योगातीत[८६] स्तपोऽतीतो[८७] व्रतातीतो[८८] यमातिगः[८९] ॥ ११

ध्यानातीतो[९०] मनोऽतीत[९१] श्चिन्तातीत[९२] श्चयातिगः[९३] ।
लेपातीतो[९४] गदातीतो[९५] कामातीत[९६] स्तमोऽतिगः[९७] ॥ १२

वेदातीतो[९८] वयोऽतीतः[९९] सर्वातीतश्च[३००] यः प्रभुः ।
कर्मेन्धनानि दह्यन्ते तस्य ध्यानाग्निना क्षणात् ॥ १३

**चतुर्थशतकप्रकाशः**

अमृतात्मा[१]ऽमृतोद्भूतो[२]ऽमृतस्रष्टा[३]ऽमृतोद्भवः[४] ।
अमृतौघो[५]ऽमृताधारो[६]ऽमृताङ्गो[७]ऽमृतसंस्थितिः[८] ॥ १

कृतज्ञः[९] कृतकृत्यश्च[१०] कृतधर्मा[११] कृतक्रतुः[१२] ।
कृतवेदः[१३] कृतात्मा च[१४] संस्कृतासि[१५] रसंस्कृतः[१६] ॥ २

भावः[१७] स्वभावो[१८] निर्वर्गो[१९] मुख्यवर्गो[२०]ऽपवर्गभाग्[२१] ।
सत्ता[२२] पदार्थः[२३] पूर्णार्थो[२४] लक्षणार्थ[२५]-स्त्रिलक्षणः[२६] ॥ ३

पद्मेशः[२७] पद्मसम्भूतिः[२८] पद्मभूः[२९] पद्मविष्टरः[३०] ।
हृत्पद्मस्थो[३१] महापद्मः[३२] पद्मः[३३] पद्मासनोदयः[३४] ॥ ४

हिरण्यगर्भः[३५] श्रीगर्भो[३६] विरञ्चि[३७] र्द्रुहिणश्च[३८] कः[३९] ।
वेदगर्भः[४०] शतानन्दः[४१] पुराणज्ञः[४२] पुराणगः[४३] ॥ ५

विश्वरेता[४४] हंसगति[४५] र्महाहंसश्च[४६] हंसराट्[४७] ।
प्रजापतिः[४८] प्रजानाथो[४९] हिरण्येशो[५०] हिरण्मयः[५१] ॥ ६

हृषीकेशो[५२] नभःकेशः[५३] स्थास्नु[५४] र्जिष्णुः[५५] पितामहः[५६] ।
भिषग्वरो[५७]ऽगदङ्कारो[५८] वैद्यो[५९] ध्वस्तगदो[६०]ऽगदः[६१] ॥ ७

वरदः[६२] पारदः[६३] श्रीदः[६४] सिद्धिदः[६५] सर्वशर्मदः[६६] ।
वर्षीयान्[६७] वृषभो[६८] वर्षो[६९] वृषकेतु[७०] वृषध्वजः[७१] ॥ ८

महाबोधि[७२] र्वर्द्धमानो[७३] महर्द्धि[७४] र्वृद्धिलक्षणः[७५] ।
अहानि-वृद्धि[७६] स्तुल्यात्मा[७७] त्रिलिङ्गो[७८]ऽतिस्त्रिलिङ्गकः[७९] ॥९

निरक्षः[८०] कृतभूरक्षो[८१] रक्षोहन्ता[८२] स्वरक्षितः[८३] ।
आत्मेक्षणः[८४] क्षणमयः[८५] शुभंयुः[८६] पुष्कलेक्षणः[८७] ॥ १०

त्रयीमय[८८]स्त्रयीकेतु[८९]र्धारावाही[९०] त्रयीधरः[९१] ।
त्रयीतेजोमय[९२] स्त्रेता[९३] दशपारमितेश्वरः[९४] ॥ ११

त्रयीतनु[९५]स्त्रयीगीतः[९६] पिटकत्रयदेशितः[९७] ।
त्रिस्थ[९८]स्त्रिकरणोन्मुक्त[९९]स्त्रिब्रह्मप्रकृतिः[४००] श्रिये ॥ १२

**पञ्चमशतकप्रकाशः**

शक्तो[१] निरेजः[२] कूटस्थः[३] शीलेशः[४] शीलनायकः[५] ।
शैलेशः[६] प्राप्तशैलेशि[७]र्निश्चयी[८] व्यवहारमुक्[९] ॥ १

अनुपाधि[१०]रुपाधिच्छित्[११] सर्वोपाधिविशुद्धिमान्[१२] ।
अनाचार्यो[१३]ऽनुपाध्यायो[१४]ऽगुरु[१५]र्गुरुशिरोमणिः[१६] ॥ २

स्वयम्बुद्धो[१७] विबुद्धश्च[१८] सम्बुद्धो[१९] बुद्धजागरः[२०] ।
तुरीयावस्थित[२१]स्तुर्यः [२२]सिद्धजागरिकात्रयः[२३] ॥ ३

अशस्त्रः[२४] शस्त्रमुक्[२५] शस्त्रोज्झितः[२६] शस्त्रविवर्जितः[२७] ।
अशस्त्री[२८] परमाशस्त्रो[२९]ऽशस्त्रभी[३०]रकुतोभयः[३१] ॥ ४

दयासिन्धु[३२]र्दयापालो[३३] दयानेता[३४] दयानिधिः[३५] ।
दयालुः[३६] स्वदयाचिह्नो[३७] दयाश्रेष्ठो[३८] दयोदयः[३९] ॥ ५

दयास्थायी[४०] दयास्थानं[४१] सर्वशुद्धदयामयः[४२] ।
दयापात्रं[४३] दयामात्रो[४४] दयाव्याप्तो[४५] दयोन्नतिः[४६] ॥ ६

आत्माराम[४७]श्चिदाराम[४८]श्चिद्रामो[४९] रामसत्तमः[५०] ।
श्रीरामः[५१] केवलारामो[५२] दयारामो[५३] विरामवान्[५४] ॥ ७

अजन्मरामो[५५]ऽति रामो[५६] महारामो[५७] मनोरमः[५८] ।
स्वतोरामः[५९] स्वयंरामः[६०] केवलाराम[६१] एव च ॥ ८

महेन्द्राऽर्च्यो[६२] महेन्द्रेड्यो[६३] महेन्द्रो[६४]ऽतीन्द्रियार्थदृक्[६५] ।
अनिन्द्रियो[६६]ऽहमिन्द्रार्च्यो[६७]ऽतीन्द्रो[६८]ऽतीन्द्रियदृक्[६९] स्वदृक्[७०] ॥ ९

भूतात्मा[७१] भूतभृद्[७२] भूतरक्षी[७३] भूताभयङ्करः[७४] ।
प्रभवो[७५] विभवो[७६] भूताधारो[७७] भूतानुपग्रहः[७८] ॥ १०

अस्तप्राणो[७९] महाप्राणः[८०] प्राणदः[८१] प्राणितेश्वरः[८२] ।
प्राणेशः[८३] प्राणदयितः[८४] प्राणाग्र्यः[८५] प्राणवल्लभः[८६] ॥ ११

प्राणोत्तरः[८७] प्राणगति[८८]रप्राणः[८९] प्राणिनामिनः[९०] ।
अग्राह्यो[९१] गहनं[९२] गुह्यं[९३] प्रणवः[९४] प्रणवोत्सवः[९५] ॥ १२

प्राणायामप्रकटितः[९६] प्राणमन्त्रो[९७] जपञ्जपः[९८] ।
द्रष्टा[९९] कलङ्कलीभावः[५००] सिद्धः सिद्धिं ददातु नः ॥ १३

**षष्ठशतकप्रकाशः**

महाशिवो[१] महाज्योति[२]र्महासिद्धो[३] महाध्रुवः[४] ।
महादृष्टि[५]र्महाप्राप्ति[६]र्महारूपो[७] महायशाः[८] ॥ १

महात्राता[९] महाचक्षु[१०]र्महाधारो[११] महाविधिः[१२] ।
महाविभु[१३]र्महासारो[१४] महावेदो[१५] महागमः[१६] ॥ २

महोपास्यो[१७] महाध्येयो[१८] महाव्यापी[१९] महामहः[२०] ।
महानाथो[२१] महाज्येष्ठो[२२] महास्वामी[२३] महासुहृत्[२४] ॥ ३

महास्रष्टा[२५] महावन्द्यो[२६] महामान्यो[२७] महामुनिः[२८] ।
महापूज्यो[२९] महाभ्राता[३०] महाकाम्यो[३१] महाप्रियः[३२] ॥ ४

महाहेतु[३३]र्महासीमा[३४] महावैद्यो[३५] महौषधः[३६] ।
महामार्गो[३७] महान्यासो[३८] महापूषा[३९] महाचलः[४०] ॥ ५

महामूर्ति[४१]र्महाचक्री[४२] महाराजो[४३] महानयः[४४] ।
महाकीर्ति[४५]र्महास्फुर्ति[४६]र्महासत्यो[४७] महातपाः[४८] ॥ ६

महामुक्ति[४९]र्महात्यागी[५०] महाब्रह्मा[५१] महाशुचिः[५२] ।
महाधातु[५३]र्महाप्रष्ठो[५४] महायज्वा[५५] महाहविः[५६] ॥ ७

महाव्योम[५७] महाबीजं[५८] महामात्रो[५९] महाधृतिः[६०] ।
महाकृतो[६१] महाभावो[६२] महावर्गो[६३] महाधरः[६४] ॥ ८

महासनो[६५] महाभुति[६६]र्महेशश्च[६७] महावृषः[६८] ।
महाशिष्टि[६९]र्महादेशो[७०] महाज्ञश्च[७१] महाव्रतः[७२] ॥ ९

महागति[७३]र्महास्थास्नु[७४]र्महावृद्धि[७५]र्महाक्षणः[७६] ।
महागुरु[७७]र्महाणुश्च[७८] महावेश्मा[७९] महावशी[८०] ॥ १०

महाशक्तो[८१] महाशीलो[८२] महाचार्यो[८३] महागुणः[८४] ।
महादयो[८५] महापात्रो[८६] महाव्याप्ति[८७]र्महोन्नतिः[८८] ॥ ११

महार्णवो[८९] महामेरु[९०]र्महाशाखो[९१] महाधनः[९२] ।
महावसु[९३]र्महावेदो[९४] महापोतो[९५] महागृहम्[९६] ॥ १२

महादित्यो[९७] महासोमो[९८] महाप्रज्ञाङ्कुर[९९]स्तथा ।
महातर्कावतारश्च[१००] श्रेयांसि वितनोतु नः ॥ १३

## सप्तमशतकप्रकाशः

विजयो[१] वैजयन्तश्च[२] जयन्त[३]श्चापराजितः[४] ।
सर्वार्थसिद्ध[५]स्तीर्थार्चः[६] स्वयम्भूरमणो[७] जयः[८] ॥ १

सदातनः[९] सदाज्ञानः[१०] सदासत्यः[११] सदाश्रयः[१२] ।
सदासुहृत्[१३] सदासौख्यः[१४] सदाविद्यः[१५] सदोदयः[१६] ॥ २

सदायोगः[१७] सदाभोगः[१८] सदातृप्तः[१९] सदानघः[२०] ।
सदास्नातः[२१] सदालेपः[२२] सदोद्द्योतः[२३] सदास्थितिः[२४] ॥ ३

अतुल्यो[२५]ऽसदृशो[२६]ऽकल्पो[२७]ऽसमानो[२८] सवया[२९] नगः[३०] ।
अगो[३१] नगाधिराजश्च[३२] स्थावरो[३३] जङ्गमाश्रयः[३४] ॥ ४

प्रक्षीणबन्धः[३५] कामारिः[३६] प्रमाणपरिधिः[३७] प्रधीः[३८] ।
कृतानन्दः[३९] कृतामोदः[४०] कृतशर्मा[४१] कृतोदयः[४२] ॥ ५

कृतान्तसृट्[४३] कृतान्तच्छित्[४४] कृतान्तज्ञः[४५] कृतान्तहृत्[४६] ।
समयः[४७] समयातीतो[४८] विषयो[४९] विषमास्त्रजित्[५०] ॥ ६

जितारि[५१]रजितो[५२] धर्ममेघो[५३]ऽमोघश्च[५४] शम्भवः[५५] ।
सुप्रतिष्ठो[५६] दृढरथो[५७] विश्वसेनो[५८] महारथः[५९] ॥ ७

चिन्तामणिः[६०] सुरमणिः[६१] कामकुम्भः[६२] सुरद्रुमः[६३] ।
रोहणो[६४] दक्षिणावर्तः[६५] कामधेनु[६६]रकश्मलः[६७] ॥ ८

चिन्तितार्थप्रद[६८]श्चैत्य[६९]श्चिरच्छाय[७०]श्चिरस्थितिः[७१] ।
जैवातृको[७२]ऽनभिज्ञानो[७३] विस्पर्शः[७४] स्पर्शगोचरः[७५] ॥ ९

असम्मोहाख्य[७६] उन्नेयः[७७] पुरुहूतो[७८]ऽवतारमुक्[७९] ।
दशलाक्षणिको[८०] देशो[८१]ऽनुद्देशो[८२]ऽनुपचारभूः[८३] ॥ १०

बन्धुरो[८४] रुचिर[८५]श्चारु[८६]र्बन्धू[८७] रुच्यश्च[८८] शोभनः[८९] ।
शतशाखः[९०] शतर्क्षश्च[९१] शततारः[९२] शताध्वगः[९३] ॥ ११

शतोपायः[९४] शताख्यानः[९५] शतकीर्तिः[९६] शताह्वयः[९७] ।
शतगृह्यः[९८] शतोद्गीथः[९९] शतवृत्तिः[७००] श्रियेऽस्तु नः ॥ १२

## अष्टमशतकप्रकाशः

धीशो[१] धियःपति[२]र्धीन्द्रो[३] धिषणः[४] शेमुषीधरः[५] ।
धीगणो[६] धीसमूहश्च[७] गीष्पतिश्च[८] गिराम्पतिः[९] ॥ १

वाचस्पति[१०]र्वचःस्रष्टा[११] बृहदात्मा[१२] बृहस्पतिः[१३] ।
बृहदारण्यकोद्योती[१४] मनीषीशो[१५] मनीषितः[१६] ॥ २

नयोत्क्रान्तो[१७] नयोद्भेदी[१८] ज्ञानगर्भः[१९] प्रभास्वरः[२०] ।
रत्नगर्भो[२१] दयागर्भः[२२] पुण्यगर्भः[२३] स्वगर्भगः[२४] ॥ ३

लक्ष्मीशः[२५] कमलानाथो[२६] निर्मन्तु[२७]र्मन्तुमोचनः[२८] ।
आशामोचन[२९] उद्दाम[३०] आशाविश्रामभाजनम्[३१] ॥ ४

धर्मयूपो[३२] धर्मगणो[३३] धर्मनेमि[३४]रकर्मठः[३५] ।
धर्मचक्रायुधो[३६] धर्मघोषणो[३७] धर्मपोषणः[३८] ॥ ५

स्पृहामुक्तः[३९] स्पृहात्यागी[४०] स्पृहापर्शुः[४१] स्पृहोज्झितः[४२] ।
दूरस्थो[४३] दूरदृग्[४४] दूरपथ[४५]स्तथ्यः[४६] स्थितिप्रणीः[४७] ॥ ६

अध्यात्मगम्यो[४८]ऽध्यात्माङ्गो[४९]ऽध्यात्माप्यो[५०]ऽध्यात्मलोचनः[५१] ।
अध्यात्माधित्यको[५२]ऽध्यात्मकैलाशो[५३]ऽध्यात्मशासनः[५४] ॥ ७

अध्यात्मवासो[५५]ऽध्यात्मार्चो[५६]ऽध्यात्मार्को[५७]ऽध्यात्मभास्करः[५८] ।
अध्यात्मांशु[५९] र्घनाध्यात्मः[६०] स्वाध्यात्मो[६१]ऽध्यात्मसङ्ग्रहः[६२]॥८

अध्यात्मकोटि[६३]रध्यात्मसारो[६४]ऽध्यात्मपरिग्रहः[६५] ।
अध्यात्मसृष्टि[६६] रध्यात्मपवित्रो[६७]ऽध्यात्मपारगः[६८] ॥ ९

अध्यात्मपूर्णो[६९]ऽध्यात्मेष्टो[७०]ऽध्यात्माढ्यो[७१]ऽध्यात्मसंश्रयः[७२] ।
अध्यात्मयज्ञो[७३]ऽध्यात्मेन्द्रो[७४]ऽध्यात्मेनो[७५]ऽध्यात्मवासितः[७६] ॥१०

अध्यात्मभाव्यो[७७]ऽध्यात्मेद्धो[७८]ऽध्यात्माध्वा[७९]ऽध्यात्मसङ्गतः[८०] ।
अध्यात्मरङ्गो[८१]ऽध्यात्मार्थो[८२]ऽध्यात्माग्रो[८३]ऽध्यात्ममन्दिरम्[८४] ॥११

अध्यात्मपूतो[८५]ऽध्यात्मास्थो[८६]ऽध्यात्माज्ञो[८७]ऽध्यात्मसंवरः[८८] ।
अध्यात्मस्थो[८९]ऽध्यात्मधनो[९०]ऽध्यात्मज्ञो[९१]ऽध्यात्मविष्टरः[९२] ॥१२

अध्यात्मपीठो[९३]ऽध्यात्मेलो[९४]ऽध्यात्मेतो[९५]ऽध्यात्मसन्ततः[९६] ।
प्राध्यात्मो[९७]ऽध्यात्मसन्तानो[९८]ऽध्यात्माख्यो[९९]ऽध्यात्मविन्[१००]मुदे॥

**नवमशतकप्रकाशः**

अभो[१]ऽनदो[२]ऽरवो[३]ऽनादो[४]स्वरो[५]ऽस्वानो[६]ऽस्वनो[७]ऽध्वनिः[८] ।
अवृद्धि[९]रगुणो[१०]ऽबिन्दु[११]रविसर्गो[१२]ऽलुग[१३] क्रमः[१४] ॥ १

अहसो[१५]ऽमातृको[१६]ऽप्रत्याहारो[१७]ऽघोषो[१८]ऽनुपाहितः[१९] ।
अनामा[२०]ऽप्रातिपदिको[२१]ऽसमासो[२२]ऽविग्रहो[२३]ऽग्रहः[२४] ॥ २

अनाख्यातो[२५]ऽकृदन्त[२६] श्चातद्धितो[२७] नणु (?नाप्यु)णादिकः[२८] ।
अयोगो[२९]ऽरूढि[३०] रस्तोभो[३१]ऽच्छन्द[३२]श्चाप्यनलङ्कृतिः[३३] ॥३

अपातो[३४]ऽलम्बनो[३५]ऽक्रान्ति[३६] रराशि[३७] रनहर्गणः[३८] ।
अनतो[३९]ऽनुन्नतो[४०]ऽलग्नो[४१]ऽनुच्चो[४२]ऽनीचो[४३]ऽदिगन्तरः[४४] ॥ ४

अतर्को[४५]ऽनाटको[४६]ऽनाट्यो[४७]ऽविभवो[४८]ऽतनुभावकः[४९] ।
स्थायी[५०]रसो[५१]ऽश्लथो[५२]ऽगाथो[५३]ऽकाव्यो[५४]ऽगीति[५५]रपिङ्गलः[५६]॥५

अनिघण्टु[५७]-रनध्यायो[५८]ऽसंहितो[५९]ऽवैद्यको[६०]ऽव्यथः[६१] ।
अग्रामो[६२]ऽमूर्च्छनो[६३]ऽवाद्यो[६४]ऽनेपथ्यो[६५]ऽनिङ्गितो[६६] ऽलयः[६७] ॥६

पश्यत्यात्मा[६८]ऽघनो[६९]ऽभाषो[७०] ह्यवैखरि[७१] रमध्यमः[७२] ।
अश्वेतो[७३]ऽपाटलो[७४]ऽश्यामो[७५]ऽनीलो[७६]ऽबभ्रु[७७]रपीतिमा[७८] ॥७

अतिक्तो[७९]ऽमधुरो[८०]ऽनम्लो[८१]ऽकषायो[८२]ऽलवणो[८३]ऽकटुः[८४] ।
असौगन्ध्यो[८५]ऽपदौर्गन्ध्यो[८६]ऽनुष्णो[८७]ऽशीतो[८८]ऽखरो[८९]ऽमृदुः[९०] ॥८

अस्निग्धो[९१]ऽगौरवो[९२]ऽलूक्षो[९३]ऽसंस्थानो[९४]ऽलघु[९५]रस्मयः[९६] ।
अवेदो[९७]वेदसङ्गीतः[९८] श्रीयुक्तः[९९] श्रीपतिः[१००] श्रिये ॥ ९

**दशमशतकप्रकाशः**

आदिदेवो[१] युगादीशो[२] युगेशो[३] युगपो[४] युगः[५] ।
उपज्ञा[६] समयोपज्ञ[७]मप्रत्यूहो[८] महाबलः[९] ॥ १

शिवताति[१०]र्महाशान्ति[११]र्निर्वृतः[१२] संवृतो[१३]ऽवृतः[१४] ।
अरहा[१५] अरुहो[१६]ऽरोह[१७] आद्यध्येयः[१८] पदोत्तरः[१९] ॥ २

आत्मरक्षा[२०]ऽऽत्मकवच[२१] मात्मत्राता[२२]ऽऽत्मपञ्जरम्[२३] ।
अकुण्ठ[२४] स्त्र्यम्बकः[२५] सार्वः[२६] शर्वः[२७] सर्वेश्वरो[२८] मृडः[२९] ॥३

आद्येड्य[३०] आद्यचारित्र[३१] माद्यमन्त्र[३२] ऋगादिमः[३३] ।
आद्यवा[३४] गाद्यभू[३५] राद्यनेता[३६]ऽऽद्यर्षि[३७]र्वृषादिमः[३८] ॥ ४

आद्यमेघः[३९] प्रधानाद्यः[४०] क्ष्माद्यो[४१] नाद्यो[४२] निराक्रियः[४३] ।
नन्द्यो[४४] नादीनवो[४५] नन्द्यावर्तो[४६]ऽर्हः[४७] स्वस्तिको[४८]ऽस्तिकः[४९]॥५

प्रोढो[५०]ऽनूढो[५१] मन्त्रशिखो[५२] दीप्तो[५३]ऽरिघ्नो[५४] निरन्तरः[५५] ।
भद्रो[५६]ऽनीदृ[५७]गनित्थंस्थो[५८]ऽयुतसिद्धः[५९] सुसंयुतः[६०] ॥ ६

अलोकस्पृग्[६१] लोकमध्यो[६२] लोकमान्यो[६३] विसंशयः[६४] ।
जागरूकः[६५] सदोन्निद्रो[६६] निस्तन्द्रो[६७] निःप्रमीलदृग्[६८] ॥ ७

अनिमेषो[६९] निमेषेन्द्रः[७०] प्रमाकर्ता[७१] प्रमाप्यकः[७२] ।
प्रमाणं च[७३] प्रमासम्प्रदानं[७४] शुद्धप्रमाश्रयः[७५] ॥ ८

प्रमापादानः[७६] सम्बन्धी प्रमायाः[७७] स्वप्रमोद्गतः[७८] ।
मार्गो[७९] मार्गप्रभु[८०]र्मार्गस्वामी[८१] मार्गविशोधकः[८२] ॥ ९

एकधी[८३]रेकपू[८४]रेकवेश्मै[८५]कस्थिति[८६] रेकभूः[८७] ।
एकोद्भव[८८]श्चैकमार्ग[८९] एकधामै[९०]कशासनः[९१] ॥ १०

एकातपत्र[९२] एकाज्ञ[९३] एकाग्र[९४]श्चैकमन्दिरः[९५] ।
गभस्ति[९६] स्तरणि[९७] स्तारः[९८] सविता[९९] ध्वान्तनाशनः[१०००] ॥११

चतुष्कभा[१]गष्टगुणो[२] दीनपो[३] भक्तवत्सलः[४] ।
कृपालुः[५] स्फीतकरुणो[६] धीरः[७] श्रीरमणः[८] श्रिये ॥ १२

**फलश्रुतिः**

अष्टोत्तरं नामसहस्रमेतत् पठन्ति ये प्रातरपप्रमीलाः ।
ते स्वर्गलीलामनुभूय भूयः सिद्धालयं यान्ति न संशयोऽत्र ॥१

(उपजाति)

**प्रशस्तिः**

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः,
प्रोढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशु-
स्तत्त्वं किञ्चिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥ २

(शार्दुलविक्रीडित)

पू.मु.श्री देवविजयकृतः

# ८. ॥ श्रीअर्हन्नामसहस्रसमुच्चयः ॥

## प्रथमं शतकम्

प्रणम्य मगसीपार्श्वं, श्रीमन्तं महिमोदधिम् ।
कुर्वेऽहं कामितफलमर्हन्नामसहस्रकम् ॥ १

सुप्रभावमिदं सम्यग्, जिनस्य जपतोऽन्वहम् ।
भवन्ति भूरयः सिद्धि-बुद्धि-वृद्धि-समृद्धयः ॥ २

ऐहिकामुष्मिक-शुभफलदानैकतत्परः ।
जागरुकः प्रभावोऽत्र, स्तोत्रे मन्त्रपदान्विते ॥ ३

ॐकारः प्रथमः पुण्यः परमात्माऽपरः परः ।
शम्भुः स्वयम्भूर्भगवान्, वीतरागो जिनेश्वरः ॥ ४

जगदीशो जगत्पूज्यो, जगद्वन्द्यो जगज्जयी ।
जगद्ध्येयो जगद्गेयो, जगन्मेयो जगत्पतिः ॥ ५

अनन्तदर्शनोऽनन्त-ज्ञानोऽनन्तसुखः शिवः ।
अनन्तवीर्योऽनन्तज्ञोऽनन्तात्मा शाश्वत-स्थितिः ॥ ६

सिद्धः साध्यः स्वयम्बुद्धः साधितार्थः परार्थकृत् ।
योगी योगविनिर्मुक्तस्त्यागी भोगी विरागवान् ॥ ७

सगुणो निर्गुणः शुद्धः प्रबुद्धः सूक्ष्मविद् विभुः ।
निरञ्जनो निराकारो, निर्लेपो निरहङ्कृतिः ॥ ८

निर्ममो निर्मदो नित्यः, स्तुत्यः स्तोतव्यवर्जितः ।
निर्लोभो निःस्पृहो नीरुक् निर्भयो निर्मलोऽकलः ॥ ९

परमेष्ठी परपदः, परमः परमावधि ।
चिन्मयोऽचिन्त्यचरितः, कृतकृत्यः कृपामयः ॥ १०

अगम्यः शोभनः साधुः, सदानन्दसनातनः ।
एकोऽनेको महातेजास्तपस्वी विजितेन्द्रियः ॥ ११

प्रकाशः प्रथितः पूतः, पावनः परमेश्वरः ।
हंसोऽर्हन् सुगतिर्जेता, नेता नाथोऽरतिः प्रभुः ॥ १२

वीरो धीरः सितः शान्तः, शान्तिकृत् सुविधिर्जिनः ।
महाध्यानी महामानी, महाध्येता महाधृतिः ॥ १३

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृति-तत्पराणां,
भवन्तु भव्या विजयश्रियो द्राग् ॥ १४

## द्वितीयं शतकम्

क्षीणकर्मा महाकर्मा, सुधर्मा सर्ववत्सलः ।
अनुकूलः प्रतिकूलो, लब्धिमानरसो गुरुः ॥ १

अरुपी रुपवान् सर्व-जनीनः केवली महान् ।
देववन्द्यो महावीरो, महादेवो महोदयः ॥ २

अधीश्वरः पारगतोऽनघोऽनर्घ्यो ऽसितोजितः ।
यथार्थवक्ता स्याद्वादी, सर्वज्ञः सर्वदर्शनः ॥ ३

चन्द्रप्रभो निष्प्रतिमः, प्रतिमाभृन्महोमयः ।
अव्यक्तो व्यक्तरुपोऽर्च्यः प्रकृष्टः स्पष्टवाक् शुचिः ॥ ४

अगन्धोऽस्पर्शनः पीतो-रक्तोऽरक्तो गणाधिपः ।
महासिद्धिर्महावृद्धि-र्वर्धमानः प्रवर्धनः ॥ ५

अमूर्तो मूर्त्तिमान् मान्यो, महाभागो महामुनिः ।
अदोषो दीप्तिमान् दिव्यः, सक्षमः समतानिधिः ॥ ६

अयोगो रोगभिद् भव्यः, श्रव्यो गव्यो गवाम्पतिः ।
अशरीरो जीवघनोऽनादिः सादिरनङ्गजित् ॥ ७

महायशा जितरिपुर्विघ्नहृत् प्रियदर्शनः ।
अयोनिर्योनिवित् सर्व-विद्यामूलं त्रिकालवित् ॥ ८

अबद्धो बोधिदो दाता, भ्राता माता महीपतिः ।
षट्कायरक्षको भाव-बान्धवो बुद्धिमान् क्षमः ॥ ९

कर्ता हर्ता पिता भर्ता, विधाता वञ्चकोऽरुचिः ।
आप्तो राजा जयी यन्ता, परञ्ज्योति र्दिगम्बरः ॥ १०

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग्॥ ११

## तृतीयं शतकम्

देवाधिदेवो भवभिदभिनन्द्योऽभिनन्दनः ।
सुमतिः पद्मप्रभो भद्रस्तीर्थकृत् तीर्थसेवितः ॥ १

ईशानः शङ्करः पञ्चवर्णोऽवर्णश्चचतुर्मुखः ।
अनगारो व्रती विज्ञो, महिमाढ्यो महेशिता ॥ २

भदन्तः सुव्रतोऽसङ्गः, प्रातिहार्ययुतोऽच्युतः ।
अनिन्दकः सातिशयोऽनङ्गः केतुस्त्रिवेदजित् ॥ ३

तमोपहो गतक्लेशः, सविता पुरुषोत्तमः ।
निर्नाथो नन्दनोऽलेश्यः, सेवनीयो मुनीश्वरः ॥ ४

हितोऽनाहारकोऽशब्दो ऽलिङ्गोऽसञ्ज्ञी निरुत्सुकः ।
उदासीनः परब्रह्म-लीनोनुत्तररूपयुग् ॥ ५

अनाश्रवो महामायः, कामचारी कृतागमः ।
लोकालोकस्वरूपज्ञः षट्पदार्थ-निवेदकः ॥ ६

लोकोद्द्योतकरो लोक-प्रदीपो लोकबोधकः ।
मृत्युञ्जयोऽभवोऽभीतोऽगतिर्गम्योऽतिशायिवाक् ॥ ७

अजन्माऽनुत्तमो दान्तः, सावधानो महोद्यमः ।
आत्मभूः श्रमणः श्रीमान्, लोकेशो लोकवल्लभः ॥ ८

अरहस्यः क्रियामुक्तः, पुरुषार्थप्रसाधकः ।
अनुत्तरगुणो गुण्यो, योगाऽष्टाङ्गनिषेवकः ॥ ९

सिद्धचक्रादिमध्ये यः-कृतस्थानकसत्तपाः ।
अवेदोऽवेदनो विद्वान्, ब्रह्मा विष्णुर्महाव्रती ॥ १०

पौरस्त्यशरणे लोकोत्तमाद्यः पूर्वमङ्गलम् ।
महाराजः पुराणज्ञोऽनेकनामा समाधिमान् ॥ ११

शरण्यः सर्वगो गुप्तो, मन्त्रतन्त्रमयोऽकलिः ।
अनध्ययनसङ्ख्यावान्, पूर्वाधीतश्रुतान्वितः ॥ १२

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां भवन्तु भव्या विजयश्रियो द्राग् ॥

## चतुर्थं शतकम्

अष्टोत्तरसहस्राङ्गलक्षणः कृतलक्षणः ।
परम्परगतोऽभूतः, पञ्चमज्ञानवान् यती ॥ १

सुलक्षणः स्तुतिसहः, सुश्रीः धीमानजो वशी ।
आर्यो वर्योऽस्मरः स्वामी, विवेकी नियमी शमी ॥ २

साहसी संयमी बुद्धः शास्ता शस्तः शुभाशयः ।
कर्मभूमिभवः सत्य-शासनो विनयी नयी ॥ ३

कर्मभूलब्धनिर्वाणः, सुभगः कुलदीपकः ।
आदिकृत् कुशलोऽ जय्योऽनधीनो मार्गदर्शकः ॥ ४

अप्रमत्तो गतद्वेषः, सुप्रभावः शिवङ्करः ।
सौम्यो रम्यो नमस्कार्योऽध्यात्मविद् देवताऽजरः ॥ ५

अक्षरो विश्वविज्ञातो, धर्मचक्री सुरार्चितः ।
पिण्डस्थः, पण्डितोऽपिण्डः, पदस्थस्तत्त्वमव्यथः ॥ ६

रूपस्थो विधिविद् रूपा-तीतो जन्तुहितोऽग्रिमः ।
सर्वदुःखक्षयः सर्व-सत्त्वः सर्वाभयप्रदः ॥ ७

अविग्रहोऽनन्तरायो, जितात्मा जितलोचनः ।
कल्पातीतो विश्वगुरुरीतिभिद् धर्मसारथिः ॥ ८

जगज्ज्येष्ठश्चिदानन्दोऽनुपमो बान्धवोऽधिभूः ।
मेरुजन्माभिषेकः श्रीसूचितः शक्रसंस्तुतः ॥ ९

सहायः स्थापनासेव्यो, नामाराध्यः प्रसन्नदृग् ।
उपसर्गसहः शुद्ध-चैतन्यः सन् विशेषवित् ॥ १०

उग्रोऽनार्त्तः पृथुः प्रौढोऽभीष्टः शिष्टः कृतस्थितिः ।
पुराणपुरुषो भाव-जिनो द्रव्यजिनोऽचलः ॥ ११

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग् ॥

## पञ्चमं शतकम्

गौरवार्हो गणी मौनी, गरीयान् स्थविरोऽद्भुतः ।
युगादिकारी कार्यज्ञः, सुपार्श्वः कमलक्रमः ॥ १

चतुर्दशस्वप्नलभ्योऽमितज्ञो महितोऽरजाः ।
धृतातपत्रश्चमर-चारुस्तथ्यगुणोऽग्रणीः ॥ २

एकज्ञानः सत्यसन्धो, नायको नयनप्रियः ।
अशोकस्तपनोऽरौद्रस्तेजस्वी सुश्रुतोऽतिथिः ॥ ३

अव्याबाधसुखोऽसङ्ख्य-द्वीपोदधिनिरूपकः ।
नित्यप्रकाशो नियतो, निष्कलङ्को निराश्रयः ॥ ४

समयज्ञो जगच्चक्षुर्धर्माचार्योऽनवद्यवाग् ।
निरुपक्रमायुर्द्रव्यं मुक्तिकान्तः कृतान्तहृत् ॥ ५

जगन्मित्रं जगद्बन्धुर्धर्मनाथः कुलध्वजः ।
अनन्तरो यथाख्यात-चारित्री चरमः पुमान् ॥ ६

अलक्ष्यो लक्षितः सिद्ध-दर्शनः प्रतिभानिधिः ।
वेदगर्भो ज्ञानगर्भवैराग्यो मुनिपुङ्गवः ॥ ७

सिंहासनस्थः क्षायिक-पारिणामिकभाववान् ।
पर्युपास्यो वंशवृद्धो, वंशजो रजनीजनिः ॥ ८

जिनाधिराजो जैनेन्द्रो, जिनचन्द्रो विभूतिभुक् ।
जिष्णुः प्रवचनी चित्र-चरितः कीर्तिपुरुषः ॥ ९

आर्यभूजातकल्याणोऽसन्दिग्धवचनः कृती ।
हितोपदेशको योगि-राजो रञ्जितरञ्जनः ॥ १०

निष्कामो निर्जरो राज-पूजितः पावितक्षितिः ।
प्रीतिकृत् पुण्डरीकाक्षः, कल्पकारी भवान्तकृत् ॥ ११

मङ्गल्यो मङ्गलावासः श्रीवासोऽवनिमण्डनम् ।
महावैद्यः सुराधीशः, कृतसर्वमहोत्सवः ॥ १२

संसारतारकस्तीर्ण्णः, पूर्ण्णः परमभावनः ।
प्रसत्तिमान् पवित्रात्मा, सन्तोषी सम्मतः सुधीः ॥ १३

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां भवन्तु भव्या विजयश्रियो द्राग् ॥

## षष्ठं शतकम्

यशस्वी नारकानन्दिकल्याणकदिनोंऽशुमान् ।
नरर्षभः शक्तिशाली, सुसन्तानः शुभान्वयः ॥ १

अप्रमेयोऽपरिमित-प्रकाशी सर्वसम्मतः ।
प्रियंवदोऽविसंवादिसिद्धान्तोऽविकृतेन्द्रियः ॥ २

मोक्षदो निपुणो जाति-वैरध्वंसी पितामहः ।
क्रियावान् वरदस्तीव्र-तपाः कश्मलनाशनः ॥ ३

वज्रर्षभसंहननः, कर्मठः कामितप्रदः ।
आद्यसंस्थानसंशोभी, कान्तिमान् केवलेक्षणः ॥ ४

विश्वदृश्वा महानादो, निर्निद्रो विमलाशयः ।
आम्नायवादी स्वाध्यायी, परमर्षिः परर्द्धिकः ॥ ५

मुमुक्षुः समितः पाता, प्रमाता पूर्वदेशकः ।
परंब्रह्म परंतेजः सुराचार्यो विदांवरः ॥ ६

गतिज्ञाताऽऽगतिज्ञाता, स्थितिज्ञाता परोपकृत् ।
धर्माधर्मास्तिकायज्ञो, ज्ञानवृद्धो महाबलः ॥ ७

निर्विकारो निर्विकल्पो, दिव्यतेजा निरीश्वरः ।
सर्वदः सर्वदेवेशः, क्षान्तिमान् निहतान्तकः ॥ ८

अनलङ्कारसुभगो, द्रव्यदो निष्परिग्रहः ।
आदिदेवः श्रुतधरः, सुप्रजातोऽगुणाकरः ॥ ९

ज्ञानगम्यो ब्रह्मचारी, जितनिद्रो महातपाः ।
आदित्यवर्ण्णो ज्ञानात्मा, भूतेशः श्रीमदऽग्रणीः ॥ १०

रक्षी साक्षी तत्त्वदर्शी, सहिष्णुः सकलः सुहृत् ।
कर्मध्वंसी शमनिधिर्यतिराजो यतीहितः ॥ ११

सम्यग्दृष्टिर्मोहजयी, सर्वतीर्थमयोऽधिकः ।
सर्वदेवमयो देव-देवो दिव्यध्वनिः सुदृक् ॥ १२

ऐश्वर्यवान् शुद्धधर्मा, सुखी शक्तो जितश्रमः ।
यथावादी तथाकारी, क्षीणबन्धो निरर्गलः ॥ १३

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग् ॥

## सप्तमं शतकम्

अनुत्तरसुरप्रश्नो-त्तरदाता नरद्विपः ।
क्षपकश्रेणिकृद् वर्ण्य-गोत्रस्तीर्थ-प्रर्वत्तकः ॥ १

तीर्थादिस्तीर्थनिर्णेता, नततीर्थः समाहितः ।
प्रमाणसाध्यः प्रत्यक्ष-महिमा गुणवेदकः ॥ २

भावज्ञोऽनन्तपर्याय-ज्ञायकोऽविषयोऽग्रगः ।
यथास्वरूपजातात्मा, विहायोविज्जिनर्षभः ॥ ३

असाध्यसाधकोऽबाध्य-बाधकोऽबोध्यबोधकः ।
अलक्ष्यलक्षकोऽदेय-दायकोहेयहायकः ॥ ४

अतार्यतारको ऽकार्य-कारकोऽहार्यहारकः ।
अमोच्यमोचकोऽस्पृश्य-स्पर्शकोऽवार्यवारकः ॥ ५

मनोगुप्तो वचोगुप्तः कायगुप्तो दुरासदः ।
इर्यासमितिमान् भाषा-समितोऽध्येषणायुतः ॥ ६

आदानसमितः पारि-ष्ठापनिकायुतोऽव्ययः ।
छिन्नग्रन्थ छिन्नशोक-श्छिन्नस्रोता अकिञ्चनः ॥ ७

सर्वस्पर्शसहो दक्षः, प्रशान्तो निर्वृतोऽक्षयः ।
उपशान्तोऽप्रतिहत-गतिः सामान्यविद् बृहन् ॥ ८

विनीतः शुद्धहृदयो, विप्रमुक्तोऽनतार्त्तिहृत् ।
भक्तिलभ्योऽप्रतिबद्धः, सिद्धिदाता तपोधनः ॥ ९

अप्रकम्प्यो निरालम्बोऽरुहन् प्रकृतिभद्रकः ।
श्रेयान् श्रेयः सममित्र-शत्रुः काम्यः सुखाश्रयः ॥ १०

शमद्युम्नो योगधनो, महर्षिरुपतापहृत् ।
निर्ग्रन्थनाथो योगीशो, महोत्साही जिनप्रभः ॥ ११

सोमलेश्यो दीप्ततेजा, ज्ञानरूपो महालयः ।
विदितात्मा गर्भ्भगूढोऽभिग्रही जन्तुबान्धवः ॥ १२

ध्यानलक्ष्यो ज्ञानदानी, नवतत्त्वनिरूपकः ।
असद्वादनिराकर्तापूर्वसूरिः शिवाध्वगः ॥ १३

आदेयनामा समव-सरणस्थो महेश्वरः ।
आदेयवाक्यो निष्णातो, वरीयांश्चरणोद्यतः ॥ १४

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग् ॥

## अष्टमं शतकम्

अरिहन्ताकृतिः पाद-लाञ्छनो योजनध्वनिः ।
सर्वभाषापरिणत-वाग् वादी वदतांवरः ॥ १

साधुवादी दशविध-साधुधर्मोपदेशकः ।
आदिगुरुरुदारश्रीरालीनः प्रतिरूपकः ॥ २

शुद्धप्रवचनः शुद्ध-चारित्रः शुद्धदर्शकः ।
योगक्षेमकरो योगा-चारज्ञो जननन्दनः ॥ ३

क्षीणज्ञानावृत्तिः क्षीण-दर्शनावरणो हरः ।
क्षीणमोहः क्षीणविघ्नः, स्वतन्त्रस्तेजसा ज्वलन् ॥ ४

परोक्षभाषी प्रत्यक्ष-भाषी दुर्नयमर्दकः ।
प्रमाणवादी वेदान्ती, नयज्ञो नयनामृतम् ॥ ५

एककालीनसप्तति-शतोत्कर्षो महोत्सवी ।
तुष्टिदः पुष्टिदः कान्ति-दायकः कीर्तिदायकः ॥ ६

एकदाविंशतिदश-जघन्यो नरशेखरः ।
महालक्ष्मीप्रदो दत्त-कोटिदानो दयालुराट् ॥ ७

एकसामायिक-दश-विंशत्युत्पत्तिरङ्गकृत् ।
लाभदो लभ्यदो दम्भ-त्यक्तो भवविरक्तधीः ॥ ८

स्थिरो गिरामधिष्ठाता, प्रष्ठः पावनदर्शनः ।
उमाप्रियः कामरिपुर्विश्वरूपो रमापतिः ॥ ९

नरकान्तकरः, सोम-श्चिन्मूर्ति-र्महितागमः ।
आत्मरूपो हृषीकेशो, भास्वान्, विश्वहितावहः ॥ १०

शाश्वतानन्दरूपः श्री-धरः स्थूलः प्रकाशकृत् ।
सुप्रभः प्रभवोऽसङ्ख्यः, सर्ववेदी महाकविः ॥ ११

ब्राह्मणोऽर्हं वरज्ञान-क्रियावादी विशारदः ।
धर्मधातुर्महाबोधिः, पञ्चज्ञानस्तथागतः ॥ १२

समन्तभद्रः सुगतः श्रीघनो मारजिद् दमी ।
सुनिश्चलो जगन्नाथो, लोकजिद् विश्वभूः खजित् ॥ १३

धर्मराजो दयाकूर्चो, महासत्त्वो गुणाधिकः ।
सर्वार्थसिद्धः सङ्गुप्तो, महायक्षो विनायकः ॥ १४

देवाधिदेवस्य दशाधिकार-सहस्रनाम्नस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग् ॥

## नवमं शतकम्

सत्त्वानुग्राहकः सत्त्व-शेवधिस्त्रिपदीप्रदः ।
लोकम्पृणगुणो धर्मा-धिकारी प्रशमाकरः ॥ १

भीमकान्तगुणः स्थाष्णु-स्तमःपारे-प्रतिष्ठितः ।
आत्मारामः सुरज्येष्ठः, शिवतातिः शनैश्चरः ॥ २

उत्पन्न-विगत-स्थायि-वस्तुवादी विभावसुः ।
भवोच्छेदी भयोच्छेदी, छिन्नसंसारबन्धनः ॥ ३

सृष्टिकृद् ब्रह्मनिष्ठात्मा, निर्व्यापारोऽक्षतव्रतः ।
वरेण्यो वनितात्यागी, विरक्तोऽसुखदुःखवित् ॥ ४

जगत्त्राता शुभध्यानो, महीयान् सर्वतोमुखः ।
सर्वतोदृक् ज्ञाननिधि-र्लोकोत्तरभवस्थितिः ॥ ५

असंस्थानोऽसंहननो, मैत्रीवान् मुदितायुतः ।
कारुण्यवानुपेक्षावान्, महात्माऽमर्मवेधिवाक् ॥ ६

कर्मानुभागवित् कर्म-स्थितिज्ञः कर्मबन्धवित् ।
कर्मप्रदेशभुत् कर्मो-दयज्ञः कर्मभाववित् ॥ ७

परिषहसहः सौभा-गिनेयो वीरसूसुतः ।
कुमोदकस्त्रिपुरजि-दतिजातोऽपुनर्भवः ॥ ८

स्थिरकर्मा समलोष्टु-काञ्चनो यक्षसेवितः ।
परमार्थनिष्ठितार्थः सर्वतश्चक्षुरिष्टदः ॥ ९

प्रयतः संयतः प्राप्त-निर्वाणः सर्वतोगुणः ।
अविक्रियः प्रकृतिवि-च्चक्रवर्ती प्रभाकरः ॥ १०

ग्रहपूज्यो ग्रहाधीशो, ग्रहराजः शुभग्रहः ।
आदिभूमानादिमुनि-रादिकर्ताऽऽदिकेवली ॥ ११

सरोरुहासनो धर्म-नन्दनोऽष्टश्रवा ध्रुवः ।
भट्टारकः पूज्यपादः, श्रद्धालुर्हृदयङ्गमः ॥ १२

चिद्रूपश्चित्रकृद्वृत्तः, प्रजापतिरनन्तजित् ।
पुष्पदन्तो गतोन्मादः, शान्तमूर्तिर्मनोहरः ॥ १३

पुण्यकीर्ति- र्विविक्तात्मा, निश्शङ्को देवपादपः ।
चिन्तामणिः कामगवी, कामकुम्भः स्थिरस्थितिः ॥ १४

देवाधिदेवस्य दशाधिकार-सहस्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृतितत्पराणां, भवन्तु भव्या विजयश्रियो द्राग् ॥

## दशमं शतकम्

स्थिरधीरपवर्गार्थी, सार्थवाहो महावपुः ।
भावदेवश्चतुः षष्टि-हरिसेव्यो विचक्षणः ॥ १

सिद्धसाध्यो नित्यसुखी, लोकान्तिकविबोधितः ।
अस्वप्नः सर्वतोभद्रः, स्नातको गतमत्सरः ॥ २

विद्यादेवीषोडशक-वृतोऽष्टादशदोषजित् ।
षट्पञ्चाशत् दिक्कुमारी - सेव्यजन्मा जयावहः ॥ ३

सदाभावी सदाभूतः, सदाधर्मा सदाश्रुतः ।
सदास्तित्वो महाशक्तिः, सुग्रहो मुनिसुव्रतः ॥ ४

भविष्यन् भूतवान् वर्त-मानोऽमानो बृहत्तनुः ।
चित्रभानुर्बृहद्भानु-रभीरुरमरोऽनकः ॥ ५

परानपेक्षसिद्धार्थः, शौण्डीरः शुद्धमानसः ।
जातस्थामा निष्प्रकम्पो, ऽनुर्धर्षोऽनुत्तरार्जवः ॥ ६

जातरूपस्तपस्तेजास्-तेजोराशिस्त्रयीमयः ।
क्षेत्रज्ञः शम्भवः पद्म-पाणिः शुद्धमतिः स्वभूः ॥ ७

चक्रपाणिः क्रतुच्छेदी-श्रीकण्ठो वृषकेतनः ।
श्रीवत्सलक्ष्मा लक्ष्मीवा-ननुत्तरविहारकः ॥ ८

त्रिविक्रमो दयादानी, दीनोद्धारी धराप्रियः ।
माधवोऽबाध्यसिद्धान्तः, सिद्धिसेव्यो वरिष्ठधीः ॥ ९

मन्त्रविन्मन्त्रकृन्मन्त्र-मूर्ति निरूपमाश्रयः ।
अनादिनिधनो दत्त-दानोनुत्तरमुक्तिकः ॥ १०

विभवश्चन्द्रमा एक-दृग् त्रिनेत्रः पवित्रहृत् ।
महाभोगो महाहंसो, महागोत्रो महायतिः ॥ ११

अचर्च्यचरितोऽनन्त-दर्शी वृजिनवर्जकः ।
राजराजो जनाधारो, हृद्यविद्यो गमागमः ॥ १२

ध्याताध्यानं क्षमी वेत्ता, गीष्पतिर्गरिमालयः ।
तीर्थदेवीस्तुतस्तीर्थ-स्तोता वक्ता महासुखी ॥ १३

मायाबीजं श्रियं दाता, कामराजो महामहः ।
कल्याणं मङ्गलं चैत्यं, नमः पदपुरस्सरः ॥ १४

(मङ्गलनामाष्टकं)
देवाधिदेवस्य दशाधिकारसहस्त्रनामस्तवनस्य पाठात् ।
इतः सतां संस्मृति तत्पराणां, भवन्तु भव्या विजयश्रियो द्राक् ॥

श्रीमुनिविजयगणीनां वाचकपदशालिनां सुशिष्येण ।
अर्हन्नामसहस्त्रं विनिर्मितं देवविजयेन ॥ १६

पण्डित-आशाधरकृतम्

## ९. ॥ श्रीजिनसहस्रनामस्तवनम् ॥

(अनुष्टुप्)

जिनशतम् ।

प्रभो ! भवाङ्गभोगेषु, निर्विण्णो दुःखभीरुकः ।
एष विज्ञापयामि त्वां, शरण्यं करुणार्णवम् ॥ १

सुखलालसया मोहाद् भ्राम्यन् बहिरितस्ततः ।
सुखैकहेतोर्नामापि, तव न ज्ञातवान् पुरा ॥ २

अद्य मोहग्रहावेश-शैथिल्यात् किञ्चिदुन्मुखः ।
अनन्तगुणमाप्तेभ्य-स्त्वां श्रुत्वा स्तोतुमुद्यतः ॥ ३

भक्त्या प्रोत्साह्यमानोऽपि,दूरं शक्त्या तिरस्कृतः ।
त्वां नामाष्टसहस्रेण, स्तुत्वाऽऽत्मानं पुनाम्यहम् ॥ ४

जिनसर्वज्ञयज्ञार्ह-तीर्थकृन्नाथयोगिनाम् ।
निर्वाणब्रह्मबुद्धान्त-कृतां चाष्टोत्तरैः शतैः ॥ ५

तद्यथा-

जिनो जिनेन्द्रो जिनराड्, जिनप्रष्ठो जिनोत्तमः ।
जिनाधिपो जिनाधीशो जिनस्वामी जिनेश्वरः ॥ ६

जिननाथो जिनपति-र्जिनराजो जिनाधिराट् ।
जिनप्रभुर्जिनविभु-र्जिनभर्ता जिनाधिभूः ॥ ७

जिननेता जिनेशानो, जिनेनो जिननायकः ।
जिनेड् जिनपरिवृढो, जिनदेवो जिनेशिता ॥ ८

जिनाधिराजो जिनपो, जिनेशी जिनशासिता ।
जिनाधिनाथोऽपि जिना-धिपतिर्जिनपालकः ॥ ९

जिनचन्द्रो जिनादित्यो, जिनार्को जिनकुञ्जरः ।
जिनेन्दुर्जिनधौरेयो, जिनधुर्यो जिनोत्तरः ॥ १०

जिनवर्यो जिनवरो, जिनसिंहो जिनोद्वहः ।
जिनर्षभो जिनवृषो, जिनरत्नं जिनोरसम् ॥ ११

जिनेशो जिनशार्दूलो, जिनाग्र्यो जिनपुङ्गवः ।
जिनहंसो जिनोत्तंसो, जिननागो जिनाग्रणीः ॥ १२

जिनप्रवेकश्च जिन-ग्रामणीर्जिनसत्तमः ।
जिनप्रबर्हः परम-जिनो जिनपुरोगमः ॥ १३

जिनश्रेष्ठो जिनज्येष्ठो, जिनमुख्यो जिनाग्रिमः ।
श्रीजिनश्चोत्तमजिनो, जिनवृन्दारकोऽरिजित् ॥ १४

निर्विघ्नो विरजाः शुद्धो, निस्तमस्को निरञ्जनः ।
घातिकर्मान्तकः कर्म-मर्मवित्कर्महाऽनघः ॥ १५

वीतरागोऽक्षुदद्वेषो, निर्मोहो निर्मदोऽगदः ।
वैतृष्णो निर्ममोऽसङ्गो, निर्भयो वीतविस्मयः ॥ १६

अस्वप्नो निःश्रमोऽजन्मा, निस्वेदो निर्जरोऽमरः ।
अरत्यतीतो निश्चिन्तो, निर्विषादस्त्रिषष्टिजित् ॥ १७

सर्वज्ञशतम् ।

सर्वज्ञः सर्ववित्सर्व-दर्शी सर्वावलोकनः ।
अनन्तविक्रमोऽनन्त-वीर्योऽनन्तसुखात्मकः ॥ १८

अनन्तसौख्यो विश्वज्ञो, विश्वदृश्वाऽखिलार्थदृक् ।
न्यक्षदृग् विश्वतश्चक्षु-र्विश्वचक्षुरशेषवित् ॥ १९

आनन्दः परमानन्दः, सदानन्दः सदोदयः ।
नित्यानन्दो महानन्दः,परानन्दः परोदयः ॥ २०

परमोजः परंतेजः,परंधाम परंमहः ।
प्रत्यग्ज्योतिः परंज्योतिः, परंब्रह्म परंरहः ॥ २१

प्रत्यगात्मा प्रबुद्धात्मा, महात्माऽऽत्ममहोदयः ।
परमात्मा प्रशान्तात्मा, परात्माऽऽत्मनिकेतनः ॥ २२

परमेष्ठी महेष्टात्मा, श्रेष्ठात्मा स्वात्मनिष्ठितः ।
ब्रह्मनिष्ठो महानिष्ठो, निरूढात्मा दृढात्मदृक् ॥ २३

एकविद्यो महाविद्यो, महाब्रह्मपदेश्वरः ।
पञ्चब्रह्ममयः सार्वः,सर्वविद्येश्वरः स्वभूः ॥ २४

अनन्तधीरनन्तात्मा-ऽनन्तशक्तिरनन्तदृक् ।
अनन्तानन्तधीशक्ति-रनन्तचिदनन्तमुत् ॥ २५

सदाप्रकाशः सर्वार्थ-साक्षात्कारी समग्रधीः ।
कर्मसाक्षी जगच्चक्षु-रलक्ष्यात्माऽचलस्थितिः ॥ २६

निराबाधोऽप्रतर्क्यात्मा, धर्मचक्री विदांवरः ।
भूतात्मा सहजज्योति-र्विश्वज्योतिरतीन्द्रियः ॥ २७

केवली केवलालोको, लोकालोकविलोकनः ।
विविक्तःकेवलो व्यक्तः, शरण्योऽचिन्त्यवैभवः ॥ २८

विश्वभृद्विश्वरूपात्मा, विश्वात्मा विश्वतोमुखः ।
विश्वव्यापी स्वयंज्योति-रचिन्त्यात्माऽमलप्रभः ॥ २९

महौदार्यो महाबोधि-र्महालाभो महोदयः ।
महोपभोगः सुगति-र्महाभोगो महाबलः ॥ ३०

यज्ञार्हशतम् ।

यज्ञार्हो भगवानर्ह-न्महार्हो मघवार्चितः ।
भूतार्थयज्ञपुरुषो, भूतार्थक्रतुपूरुषः ॥ ३१

पूज्यो भट्टारकस्तत्र-भवानत्रभवान्महान् ।
महामहार्डर्हस्तत्रायु-स्ततो दीर्घायुरर्घ्यवाक् ॥ ३२

आराध्यः परमाराध्यः, पञ्चकल्याणपूजितः ।
दृग्विशुद्धिगणोदग्रो, वसुधारार्चितास्पदः ॥ ३३

सुस्वप्नदर्शी दिव्यौजाः, शचीसेवितमातृकः ।
स्याद्रत्नगर्भःश्रीपूत गर्भो गर्भोत्सवोत्थितः ॥ ३४

दिव्योपचारोपचितः, पद्मभूर्निष्कलः स्वजः ।
सर्वीयजन्मा पुण्याङ्गो, भास्वानुद्भूतदैवतः ॥ ३५

विश्वविज्ञातसम्भूति-र्विश्वदेवागमाद्भुतः ।
शचीसृष्टप्रतिच्छन्दः, सहस्राक्षो दृगुत्सवः ॥ ३६

नृत्यदैरावतासीनः सर्वशक्रनमस्कृतः ।
हर्षाकुलामरखग-श्चारणर्षिमनोत्सवः ॥ ३७

व्योमविष्णुपदारक्षा-स्नानपीठायिताद्रिराट् ।
तीर्थेशंमन्यदुग्धाब्धि-स्नानाम्बुस्नातवासवः ॥ ३८

गन्धाम्बुपूतत्रैलोक्यो, वज्रसूचीशुचिश्रवाः ।
कृतार्थितशचीहस्ता-शक्रोद्धुष्टेष्टनामकः ॥ ३९

शक्रारब्धानन्दनृत्यः, शचीविस्मापिताम्बिकः ।
इन्द्रनृत्यन्तपितृको, रैदपूर्णमनोरथः ॥ ४०

आज्ञार्थीन्द्रकृतासेवो, देवर्षीष्टशिवोद्यमः ।
दीक्षाक्षणक्षुब्धजग-द्भूर्भुवःस्वःपतीडितः ॥ ४१

कुबेरनिर्मितास्थानः,श्रीयुग्योगीश्वरार्चितः ।
ब्रह्मेड्यो ब्रह्मविद् वेद्यो, याज्यो यज्ञपतिक्रतुः ॥ ४२

यज्ञाङ्गममृतं यज्ञो, हविःस्तुत्यः स्तुतीश्वरः ।
भावो महामहपति-र्महायज्ञोऽग्रयाजकः ॥ ४३

दयायागो जगत्पूज्यः, पूजार्हो जगदर्चितः ।
देवाधिदेवः शक्रार्च्यो, देवदेवो जगद्गुरुः ॥ ४४

संहूतदेवसङ्घार्च्यः, पद्मयानो जयध्वजी ।
भामण्डली चतुःषष्टि-चामरो देवदुन्दुभिः ॥ ४५

वागस्पृष्टासनश्छत्र-त्रयराट् पुष्पवृष्टिभाक् ।
दिव्याशोको मानमर्दी, सङ्गीतार्होऽष्टमङ्गलः ॥ ४६

तीर्थकृच्छतम् ।

तीर्थकृत्तीर्थसृट् तीर्थ-करस्तीर्थङ्करः सुदृक् ।
तीर्थकर्ता तीर्थभर्ता, तीर्थेशस्तीर्थनायकः ॥ ४७

धर्मतीर्थकरस्तीर्थ-प्रणेता तीर्थकारकः ।
तीर्थप्रवर्तकस्तीर्थ-वेधास्तीर्थविधायकः ॥ ४८

सत्यतीर्थकरस्तीर्थ-सेव्यस्तैर्थिकतारकः ।
सत्यवाक्याधिपः सत्य-शासनोऽप्रतिशासनः ॥ ४९

स्याद्वादी दिव्यगीर्दिव्य-ध्वनिरव्याहतार्थवाक् ।
पुण्यवागर्थ्यवागर्ध-मागधीयोक्तिरिद्धवाक् ॥ ५०

अनेकान्तदिगेकान्त-ध्वान्तभिद्दुर्नयान्तकृत् ।
सार्थवागप्रयत्नोक्तिः, प्रतितीर्थमदघ्नवाक् ॥ ५१

स्यात्कारध्वजवागीहा-पेतवागचलौष्ठवाग् ।
अपौरुषेयवाक् शास्ता-रुद्धवाक् सप्तभङ्गिवाक् ॥ ५२

अवर्णगीः सर्वभाषा-मयगीर्व्यक्तवर्णगीः ।
अमोघवागक्रमवा-गवाच्यानन्तवागवाक् ॥ ५३

अद्वैतगीः सूनृतगीः, सत्यानुभवगीः सुगीः ।
योजनव्यापिगीः क्षीर-गौरगीस्तीर्थकृत्त्वगीः ॥ ५४

भव्यैकः श्रव्यगुः सद्गु-श्चित्रगुः परमार्थगुः ।
प्रशान्तगुः प्राश्निकगुः,सुगुर्नियतकालगुः ॥ ५५

सुश्रुतिः सुश्रुतो याज्य-श्रुतिः सुश्रन्महाश्रुतिः ।
धर्मश्रुतिः श्रुतिपतिः,श्रुत्युद्धर्ता ध्रुवश्रुतिः ॥ ५६

निर्वाणमार्गदिग्मार्ग-देशकः सर्वमार्गदिक् ।
सारस्वतपथस्तीर्थ-परमोत्तमतीर्थकृत् ॥ ५७

देष्टा वाग्मीश्वरो धर्म-शासको धर्मदेशकः ।
वागीश्वरस्त्रयीनाथ-स्त्रिभङ्गीशो गिरां पतिः ॥ ५८

सिद्धाज्ञः सिद्धवागाज्ञा-सिद्धः सिद्धैकशासनः ।
जगत्प्रसिद्धसिद्धान्तः सिद्धमन्त्रः सुसिद्धवाक् ॥ ५९

शुचिश्रवा निरुक्तोक्ति-स्तन्त्रकृन्न्यायशास्त्रकृत् ।
महिष्ठवाग्महोनादः, कवीन्द्रो दुन्दुभिस्वनः ॥ ६०

## नाथशतम् ।

नाथः पतिः परिवृढः,स्वामी भर्ता विभुः प्रभुः ।
ईश्वरोऽधीश्वरोऽधीशो-ऽधीशानोऽधीशितेशिता ॥ ६१

ईशोऽधिपतिरीशान, इन इन्द्रोऽधिपोऽधिभूः ।
महेश्वरो महेशानो, महेशः परमेशिता ॥ ६२

अधिदेवो महादेवो, देवस्त्रिभुवनेश्वरः ।
विश्वेशो विश्वभूतेशो, विश्वेड् विश्वेश्वरोऽधिराट् ॥ ६३

लोकेश्वरो लोकपति-र्लोकनाथो जगत्पतिः ।
त्रैलोक्यनाथो लोकेशो, जगन्नाथो जगत्प्रभुः ॥ ६४

पिता परः परतरो,जेता जिष्णुरनीश्वरः ।
कर्ता प्रभूष्णुर्भ्राजिष्णुः, प्रभविष्णुः स्वयम्प्रभः ॥ ६५

लोकजिद्विश्वजिद्विश्व-विजेता विश्वजित्वरः ।
जगज्जेता जगज्जैत्रो, जगज्जिष्णुर्जगज्जयी ॥ ६६

अग्रणीर्ग्रामणीर्नेता, भूर्भुवःस्वरधीश्वरः ।
धर्मनायक ऋद्धीशो, भूतनाथश्च भूतभृत् ॥ ६७

गतिः पाता वृषो वर्यो, मन्त्रकृच्छुभलक्षणः ।
लोकाध्यक्षो दुराधर्षो, भव्यबन्धुर्निरुत्सुकः ॥ ६८

धीरो जगद्धितोऽ जय्य-स्त्रिजगत्परमेश्वरः ।
विश्वासी सर्वलोकेशो, विभवो भुवनेश्वरः ॥ ६९

त्रिजगद्वल्लभस्तुङ्ग-स्त्रिजगन्मङ्गलोदयः ।
धर्मचक्रायुधः सद्यो-जातस्त्रैलोक्यमङ्गलः ॥ ७०

वरदोऽप्रतिघोऽच्छेद्यो, द्रढीयानभयङ्करः ।
महाभागो निरौपम्यो, धर्मसाम्राज्यनायकः ॥ ७१

योगीशतम् ।

योगी प्रव्यक्तनिर्वेदः, साम्यारोहणतत्परः ।
सामायिकी सामायिको, निष्प्रमादोऽप्रतिक्रमः ॥ ७२

यमः प्रधाननियमः,स्वभ्यस्तपरमासनः ।
प्राणायामचणः सिद्ध-प्रत्याहारो जितेन्द्रियः ॥ ७३

धारणाधीश्वरो धर्म-ध्याननिष्ठः समाधिराट् ।
स्फुरत्समरसीभाव, एकीकरणनायकः ॥ ७४

निर्ग्रन्थनाथो योगीन्द्र, ऋषिः साधुर्यतिर्मुनिः ।
महर्षिः साधुधौरेयो, यतिनाथो मुनीश्वरः ॥ ७५

महामुनिर्महामौनी, महाध्यानी महाव्रती ।
महाक्षमो महाशीलो, महाशान्तो महादमः ॥ ७६

निर्लेपो निर्भ्रमस्वान्तो, धर्माध्यक्षो दयाध्वजः ।
ब्रह्मयोनिः स्वयम्बुद्धो, ब्रह्मज्ञो ब्रह्मतत्त्ववित् ॥ ७७

पूतात्मा स्नातको दान्तो, भदन्तो वीतमत्सरः ।
धर्मवृक्षायुधोऽक्षोभ्यः, प्रभूतात्माऽमृतोद्भवः ॥ ७८

मन्त्रमूर्त्तिः स्व(सु)सौम्यात्मा,स्वतन्त्रो ब्रह्मसम्भवः ।
सुप्रसन्नो गुणाम्भोधिः, पुण्यापुण्यनिरोधकृत् ॥ ७९

सुसंवृत्तः सुगुप्तात्मा, सिद्धात्मा निरुपप्लवः ।
महोदर्को महोपायो, जगदेकपितामहः ॥ ८०

महाकारुणिको गुण्यो, महाक्लेशाङ्कुशः शुचिः ।
अरिञ्जयः सदायोगः, सदाभोगः सदाधृतिः ॥ ८१

परमौदासिताऽनाश्वान्, सत्याशीः शान्तनायकः ।
अपूर्ववैद्यो योगज्ञो, धर्ममूर्त्तिरधर्मयु(मु)क् ॥ ८२

ब्रह्मेड् महाब्रह्मपतिः, कृतकृत्यः कृतक्रतुः ।
गुणाकरो गुणोच्छेदी, निर्निमेषो निराश्रयः ॥ ८३

सूरिः सुनयतत्त्वज्ञो, महामैत्रीमयः शमी ।
प्रक्षीणबन्धो निर्द्वन्द्वः, परमर्षिरनन्तगः ॥ ८४

## निर्वाणशतम् ।

निर्वाणः सागरः प्राज्ञै-र्महासाधुरुदाहृतः ।
विमलाभोऽथ शुद्धाभः,श्रीधरो दत्त इत्यपि ॥ ८५

अमलाभोऽप्युद्धरोऽग्निः, संयमश्च शिवस्तथा ।
पुष्पाञ्जलिः शिवगुणः, उत्साहो ज्ञानसञ्ज्ञकः ॥ ८६

परमेश्वर इत्युक्तो, विमलेशो यशोधरः ।
कृष्णो ज्ञानमतिः शुद्ध-मतिः श्रीभद्रशान्तयुक् ॥ ८७

वृषभस्तद्वदजितः, सम्भवश्चाभिनन्दनः ।
मुनिभिः सुमतिःपद्म-प्रभः प्रोक्तः सुपार्श्वकः ॥ ८८

चन्द्रप्रभः पुष्पदन्तः, शीतलः श्रेयसाह्वयः ।
वासुपूज्यश्च विमलो-ऽनन्तजिद्धर्म इत्यपि ॥ ८९

शान्तिः कुन्थुररो मल्लिः, सुव्रतो नमिरप्यतः ।
नेमिः पार्श्वो वर्धमानो, महावीरः स वीरकः ॥ ९०

सन्मतिश्चाकथि मह-ति महावीर इत्यथ ।
महापद्मः सूरदेवः, सुप्रभश्च स्वयम्प्रभः ॥ ९१

सर्वायुधो जयदेवो, भवेदुदयदेवकः ।
प्रभादेव उदङ्कश्च, प्रश्नकीर्त्तिर्जयाभिधः ॥ ९२

पूर्णबुद्धिर्निष्कषायो, विज्ञेयो विमलप्रभः ।
बहलो निर्मलश्चित्र-गुप्तः समाधिगुप्तकः ॥ ९३

स्वयम्भूश्चापि कन्दर्पो, जय नाथ इतीरितः ।
श्रीविमलो दिव्यवादो-ऽनन्तवीरोऽप्युदीरितः ॥ ९४

पुरुदेवोऽथ सुविधिः, प्रज्ञापारमितोऽव्ययः ।
पुराणपुरुषो धर्म-सारथिः शिवकीर्तनः ॥ ९५

विश्वकर्माऽक्षरोऽच्छद्मा, विश्वभूर्विश्वनायकः ।
दिगम्बरो निरातङ्को, निरारेको भवान्तकः ॥ ९६

दृढव्रतो नयोत्तुङ्गो, निष्कलङ्कोऽकलाधरः ।
सर्वक्लेशापहोऽक्षय्यः, क्षान्तः श्रीवृक्षलक्षणः ॥ ९७

ब्रह्मशतम् ।

ब्रह्मा चतुर्मुखो धाता, विधाता कमलासनः ।
अब्जभूरात्मभूः स्रष्टा, सुरज्येष्ठः प्रजापतिः ॥ ९८

हिरण्यगर्भो वेदज्ञो, वेदाङ्गो वेदपारगः ।
अजो मनुः शतानन्दो, हंसयानस्त्रयीमयः ॥ ९९

विष्णुस्त्रिविक्रमः शौरिः, श्रीपतिः पुरुषोत्तमः ।
वैकुण्ठः पुण्डरीकाक्षो, हृषीकेशो हरिः स्वभूः ॥ १००

विश्वम्भरोऽसुरध्वंसी, माधवो बलिबन्धनः ।
अधोक्षजो मधुद्वेषी, केशवो विष्टरश्रवाः ॥ १०१

श्रीवत्सलाञ्छनः श्रीमा-नच्युतो नरकान्तकः ।
विष्वक्सेनश्चक्रपाणिः, पद्मनाभो जनार्दनः ॥ १०२

श्रीकण्ठः शङ्करः शम्भुः,कपाली वृषकेतनः ।
मृत्युञ्जयो विरूपाक्षो, वामदेवस्त्रिलोचनः ॥ १०३

उमापतिः पशुपतिः,स्मरारिस्त्रिपुरान्तकः ।
अर्धनारीश्वरो रुद्रो, भवो भर्गः सदाशिवः ॥ १०४

जगत्कर्ताऽन्धकाराति-रनादिनिधनो हरः ।
महासेनस्तारकजि-द्गणनाथो विनायकः ॥ १०५

विरोचनो वियद्रत्नं, द्वादशात्मा विभावसुः ।
द्विजाराध्यो बृहद्भानु-श्चित्रभानुस्तनूनपात् ॥ १०६

द्विजराजः सुधारोचि-रौषधीशः कलानिधिः ।
नक्षत्रनाथः शुभ्रांशुः,सोमः कुमुदबान्धवः ॥ १०७

लेखर्षभोऽनिलः पुण्य-जनः पुण्यजनेश्वरः ।
धर्मराजो भोगिराजः, प्रचेता भूमिनन्दनः ॥ १०८

सिंहिकातनयश्छाया-नन्दनो बृहतापतिः ।
पूर्वदेवोपदेष्टा च, द्विजराजसमुद्भवः ॥ १०९

बुद्धशतम् ।

बुद्धो दशबलः शाक्यः, षडभिज्ञस्तथागतः ।
समन्तभद्रः सुगतः, श्रीधनो भूतकोटिदिक् ॥ ११०

सिद्धार्थो मारजिच्छास्ता, क्षणिकैकसुलक्षणः ।
बोधिसत्त्वो निर्विकल्प-दर्शनोऽद्वयवाद्यपि ॥ १११

महाकृपालुर्नैरात्म्य-वादी सन्तानशासकः ।
सामान्यलक्षणचणः, पञ्चस्कन्धमयात्मदृक् ॥ ११२

भूतार्थभावनासिद्ध-श्चतुर्भूमिकशासनः ।
चतुरार्यसत्यवक्ता, निराश्रयचिदन्वयः ॥ ११३

योगो वैशेषिकस्तुच्छा-भावभित् षट्पदार्थदृक् ।
नैयायिकः षोडशार्थ-वादी पञ्चार्थवर्णकः ॥ ११४

ज्ञानान्तराध्यक्षबोधः, समवायवशार्थभित् ।
भुक्तैकसाध्यकर्मान्तो, निर्विशेषगुणामृतः ॥ ११५

साङ्ख्यः समीक्ष्यः कपिलः, पञ्चविंशतितत्त्ववित् ।
व्यक्ताव्यक्तज्ञविज्ञानी ज्ञानचैतन्यभेददृक् ॥ ११६

अस्वसंविदितज्ञान-वादी सत्कार्यवादसात् ।
त्रिप्रमाणोऽक्षप्रमाणः, स्याद्वाहङ्कारिकाक्षदिक् ॥ ११७

क्षेत्रज्ञ आत्मा पुरुषो, नरो ना चेतनः पुमान् ।
अकर्त्ता निर्गुणोऽमूर्त्तो, भोक्ता सर्वगतोऽक्रियः ॥ ११८

द्रष्टा तटस्थः कूटस्थो, ज्ञाता निर्बन्धनोऽभवः ।
बहिर्विकारो निर्मोक्षः, प्रधानं बहुधानकम् ॥ ११९

प्रकृतिः ख्यातिरारूढ-प्रकृतिः प्रकृतिप्रियः ।
प्रधानभोज्योऽप्रकृति-र्विरम्यो विकृतिः कृतीः ॥ १२०

मीमांसकोऽस्तसर्वज्ञः, श्रुतिपूतः सदोत्सवः ।
परोक्षज्ञानवादीष्ट-पावकः सिद्धकर्मकः ॥ १२१

चार्वाको भौतिकज्ञानो, भूताभिव्यक्तचेतनः ।
प्रत्यक्षैकप्रमाणोऽस्त-परलोको गुरुश्रुतिः ॥ १२२

पुरन्दरविद्धकर्णो, वेदान्ती संविदद्वयी ।
शब्दाद्वैती स्फोटवादी, पाखण्डघ्नो नयौघयुक् ॥ १२३

अन्तकृच्छतम् ।

अन्तकृत् पारकृत् तीर-प्राप्तः पारेतमः स्थितः ।
त्रिदण्डी दण्डितारातिर्ज्ञानकर्मसमुच्चयी ॥ १२४

संहृतध्वनिरुच्छन्न-योगः सप्तार्णवोपमः ।
योगस्नेहापहो योग-किट्टिनिर्लेपनोद्यतः ॥ १२५

स्थितस्थूलवपुर्योगो, गीर्म्मणो योगकार्श्यकः ।
सूक्ष्मवाक्चित्तयोगस्थः, सूक्ष्मीकृतवपुःक्रियः ॥ १२६

सूक्ष्मकायक्रियास्थायी, सूक्ष्मवाक्चित्तयोगहा ।
एकदण्डी च परम-हंसः परमसंवरः ॥ १२७

नैष्कर्म्यसिद्धःपरम-निर्जरः प्रज्वलत्प्रभः ।
मोघकर्मा त्रुटत्कर्म-पाशः शैलेश्यलङ्कृतः ॥ १२८

एकाकाररसास्वादो, विश्वाकाररसाकुलः ।
अजीवन्नमृतोऽजाग्र-दसुप्तः शून्यतामयः ॥ १२९

प्रेयानयोगी चतुर-शीतिलक्षगुणो गुणः ।
निःपीतानन्तपर्यायो, विद्यासंस्कारनाशकः ॥ १३०

वृद्धोऽनिर्वचनीयोऽणु-रणीयाननणुप्रियः ।
प्रेष्ठः स्थेयान् स्थिरो निष्ठः, श्रेष्ठो ज्येष्ठ सुनिष्ठितः ॥१३१

भूतार्थशूरो भूतार्थ-दूरः परमनिर्गुणः ।
व्यवहारसुषुप्तोऽति-जागरूकोऽतिसुस्थितः ॥ १३२

उदितोदितमाहात्म्यो, निरुपाधिरकृत्रिमः ।
अमेयमहिमाऽत्यन्त-शुद्धः सिद्धिस्वयंवरः ॥ १३३

सिद्धानुजः सिद्धपुरी-पान्थः सिद्धगणातिथिः ।
सिद्धसङ्गोन्मुखः सिद्धा-लिङ्ग्यः सिद्धोपगूहकः ॥ १३४

पुष्टोऽष्टादशसहस्र-शीलाङ्गपुण्यशम्बलः ।
वृत्ताग्रयुग्मः परम-शुक्ललेश्योऽपचारकृत् ॥ १३५

क्षेपिष्ठोऽन्त्यक्षणसखा, पञ्चलघ्वक्षरस्थितिः ।
द्वासप्ततिप्रकृत्यासी, त्रयोदशकलिप्रणुत् (?) ॥ १३६

अवेदोऽयाजकोऽयज्यो-ऽयाज्योऽनग्निपरिग्रहः ।
अनग्निहोत्री परम-निःस्पृहोऽत्यन्तनिर्दयः ॥ १३७

अशिष्योऽशासकोऽदीक्ष्यो-ऽदीक्षकोऽदीक्षितोऽक्षयः ।
अगम्योऽगमको ऽरम्यो ऽरमको ज्ञाननिर्भरः ॥ १३८

महायोगीश्वरो द्रव्य-सिद्धोऽदेहोऽपुनर्भवः ।
ज्ञानैकविज्जीवघनः, सिद्धो लोकाग्रगामुकः ॥ १३९

### जिनसहस्रनामस्तवनफलम् ।

इदमष्टोत्तरं नाम्नां, सहस्रं भक्तितोऽर्हताम् ।
योऽनन्तानामधीतेऽसौ, मुक्त्यन्तां भक्तिमश्नुते ॥ १४०

इदं लोकोत्तमं पुंसा-मिदं शरणमुल्बणम् ।
इदं मङ्गलमग्रीय-मिदं परमपावनम् ॥ १४१

इदमेव परं तीर्थ-मिदमेवेष्टसाधनम् ।
इदमेवाखिलक्लेश-सङ्क्लेशक्षयकारणम् ॥ १४२

एतेषामेकमप्यर्ह-न्नाम्नामुच्चारयन्नघैः ।
मुच्यते किं पुनः सर्वा-ण्यर्थज्ञस्तु जिनायते ? ॥ १४३

पू.मु.श्री जीवहर्षगणिविरचितम्

## १०. ॥ श्रीजिनसहस्त्रनामस्तोत्रम् ॥

(भुजङ्गप्रयात)

चिदानन्द चिद्रूप ए मोहवारी,
सदा विश्वरूपी अरूपी अभारी ।
अनाथं सुनाथं उदारं गभीरं,
अलक्ष्यं विलक्ष्यं अनन्त्यं अभीरम् ॥ १

विरञ्ची स्वयम्भू विभू वीतरागं,
जिनं देवदेवं विशालं अतागम् ।
सदा अक्षरं शङ्करं योगरूपं,
समस्तास्तदोषं अरोषं विलोपम् ॥ २

अमुद्रं अतीन्द्रं अनिद्रं अबाधं,
अभेदी अमेदी अछेदी अगाधम् ।
परं मोक्षदं सौख्यदं सिद्धिदाता,
जगन्नाथ पूज्यो अगुह्यो सुनेता ॥ ३

अजं आदिकर्ता कलौ दुःखहर्ता,
महाज्योतिपुञ्जं सितं शास्त्रभर्ता ।
पुराणं प्रवीणं प्रशस्तं प्रसिद्धं,
प्रमोदावबोधी अरोधी सुसिद्धम् ॥ ४

वरीष्ठं पटिष्ठं लघिष्ठं गरीष्ठं,
ध्रुवं नूतनो जीर्णरूपो अचेष्टम् ।
अनामी अनाशी विकाशी विभासी,
अपारं अदारं अमारं विलासी ॥ ५

सहायी अमायी सदा मुक्तिशर्मा,
समीचीन शान्तीन अक्षीणधर्मा ।
अयोगी अभोगी अशोकी अनिन्द्यो,
जिनेशो धनेशो मुनीशो सुवन्द्यो ॥ ६

प्रभूतातिशायी चतुर्गात्रधारी,
चतुर्वक्त्र धर्मोपदेष्टा विचारी ।
स्वयम्बुद्ध बुद्धो प्रबन्धो अगम्यो,
अतुल्यो अशल्यो सदारूपरम्यो ॥ ७

अगन्धो अवर्णो असंस्पर्शनीयो
अमीतो विनीतो जगद्दर्शनीयो ।
अजल्पो अतल्पो अकल्पो अरुची,
अमर्मा अकर्मा अधर्मा असञ्ची ॥ ८

त्रिकालप्रवृत्तिज्ञ हीनाष्टकर्मो,
पवित्रो विचित्रो अमित्रो अभर्मो ।
शरेण्यो वरेण्यो महान् ध्वान्तहारी,
क्षमासिन्धु बन्धु जगज्जन्तुतारी ॥ ९

शमी ध्यानशुक्लो दमी स्याद्वादी,
यतिः शुद्धमार्गी ऋषी जैनवादी ।
अमोहो अलिङ्गी गतोच्छाह अच्छो,
जितेन्द्री गताशो अलिङ्गी अतुच्छो ॥ १०

जिनेन्द्रो स्वयंतेज सूक्ष्मो अशङ्को,
समन्त्रो स्वतन्त्रो अयन्त्रो अपङ्को ।

सदा नीरसो निर्गुणो कालवारी,
निराहार निर्लोभ ए ब्रह्मचारी ॥ ११

धरामूर्ति यज्ञाङ्ग वीरो विधाता,
अधीन्द्रो महीन्द्रो गुणज्ञो सुपाता ।
वृषाङ्को वृषाधीश संसारतातो,
महेशो महात्मा वचस्वी अजातो ॥ १२

शमात्मा शुभात्मा जितानङ्ग वंशी,
धृतिः कीर्ति कान्ति कलादो असंशी ।
महाधर्मधीरो अनन्तर्धिवेदो,
अमोघो प्रदीप्तो स्फुटो त्वं अखेदो ॥ १३

समभ्यर्चनीयो सदाभास इष्टो,
स्थवीयान् दवीयान् परानन्दपुष्टो ।
जरामृत्युहीनो अरिघ्नो सुघोषो,
जितक्लेश सौम्यो कृतज्ञो सुतोषो ॥ १४

असंस्कृत्य सारो हरीराम ध्येयो,
दयायागतुङ्गो सुदृष्टी अमेयो ।
सहस्राक्ष विश्वाक्ष वीरावतंसो,
सुभोक्ता रमेशो अलेशो अदंशो ॥ १५

सदा आदिमूर्तिः प्रभापूर्तिगुप्तो,
गणस्वामि शक्तो अगण्यो असुप्तो ।
कजाक्षो सुदक्षो अपक्षो अतर्को,
अहास्यो अलास्यो श्रुताम्भोजअर्को ॥ १६

महातङ्कनिघ्नो अविघ्नो अशेषो,
त्रिसन्ध्यानतो स्फार सिद्धान्त वेषो ।
जगत्पालको सुश्रिको अंशुमाली,
सदैको लयी शुद्धसम्यक्त्वशाली ॥ १७

सुधानिर्झरो वर्य धुर्यो प्रतिष्ठो,
स्थविष्ठो सुनिष्ठो बहिष्ठो बलिष्ठो ।
महामूर्ति तेजो महानन्दकन्दो,
महाबोधिशास्ता निरक्षो मुनिन्दो ॥ १८

सुसाक्षी भवान्तो वृषीयान् विभावो,
सुधासम्भवो धैर्ययुक्तो अरावो ।
श्रियो राशि उद्दामगीर्मागधीयो,
मुमुक्षुस्तितीर्षुश्चिरायुरजेयो ॥ १९

भवद्योतको भूष्णु भव्यात्मभासी,
दिशावस्त्रधारी सुखाराध्य आसी ।
जगत्पापघाती अलोकान्तदृष्टी,
सदार्हन् जय श्रीमुरारी अकष्टी ॥ २०

अशोकाङ्क ॐकार आरोग्यकारं,
असूरं विसूरं प्रकारं प्रतारम् ।
समग्रागमेगो हितार्थी अनर्थी,
नयी नीतिदो निभ्रमो सुप्रमार्थी ॥ २१

सदा व्यक्तरूपो समानो सहिष्णू,
प्रजापाल पृथ्वीपती प्राग्यजिष्णू ।

भवाम्भोजदन्ती भवो भानुमन्तो,
अजिम्हो अनष्टो अदृष्टो अचेतो ॥ २२

अकम्पस्थिती अग्रणी ऊर्ध्वयायी,
स्तुति स्वामी सम्वृत्त साध्यो सुछायी ।
महास्था नमेशो महाजैन मुक्तो,
अहिंसोपदेशी अनङ्गो अनुक्तो ॥ २३

अवाग्गोचरो आर्तहा अष्टसिद्धिः,
अनेकान्तवादी अतप्तो विवृद्धी ।
सलब्धी सशक्ति सदुद्धारसेतो,
अपीनो अधीनो अनार्ती अरेतो ॥ २४

नभोरत्न निर्मानसो निर्विकारं,
सुराध्यक्ष सङ्कल्प सर्वर्तुसारं ।
स्वहाशब्दवाची स्वधाभुक् सुवर्यो,
सदास्थावरो साकरो त्वं अचर्च्यो ॥ २५

धराधारमाधार धन्यो धूतारिः
त्रिकालो त्रिवर्गो त्रिधर्मो त्रितारी ।
महावैद्य मौनी महावीर्यमेधा,
कलाकल्पकल्पं न कल्याणश्रद्धा ॥ २६

सदा धर्मदीप्तो सुमुद्रो समस्तो,
जगज्जीवनं जीवनं जैनव्यक्तो ।
नतार्तिघ्न निर्वाहको धर्मधामा,
अगर्वो अखर्वो अकालो सुनामा ॥ २७

प्रभातो प्रमाणो परोक्षो प्रतीक्षो,
विहारी विधेयो वरीयान् अनीक्ष्यो ।
बृहत्कीर्ति वाग्मी विवस्वान् विजेता,
विराट् वेगवान् वृत्तिसारी सुवेत्ता ॥ २८

अकर्तापि कर्ता अहर्तापि हर्ता,
अपायोऽपनेता प्रव्रज्याप्रधर्ता ।
महादेव मृत्युञ्जयो केशवेशो,
महोच्छ्रह देवो महात्मा कुलेशो ॥ २९

सदा विश्वविद्यो शिवो विश्वपादो,
महाविश्वचिन्तामणिश्चिन्तितार्थो ।
महामारिवारो अजय्यो श्रुतार्थ्यो,
.................................. ॥ ३०

तथा दिव्यभाषापतिर्दिव्यदेवो,
निरुग् निश्चलो निर्ममो भावदेवो ।
कलिव्यालमन्त्रो सुलोकाग्रवासी,
तिरीतिर्नृसिंहो नृदेवो सुखासी ॥ ३१

तथा मृत्युवारी मुनिमार्गवक्ता,
महासद्गुरो मुत्करो विश्वत्राता ।
महादित्यमूर्तो मनोऽभीष्टचन्द्रो,
सदा अग्रजो स्वर्धरो शान्तिमुद्रो ॥ ३२

सुसौम्यात्मको सौम्यमूर्तिः सुयज्वा,
असङ्गात्मको अग्निमूर्तिः अयुग्वा ।

विधिर्वर्धमानो विचेतो जनूत्यो,
तथा स्थाणु तद्रूपगो तत्त्वकृत्यो ॥ ३३

सुसंवृत्ति सद्बुद्धिगो शैलसङ्गी,
मुनिपुङ्गवो सत्यसन्धो दयाङ्गी ।
तथा विश्वतोवक्त्र विद्याविलासी,
पुरुः पुण्यगीः धन्यगी विश्ववासी ॥ ३४

गुणी गुप्तिभृत् गुप्तवृत्तान्तविज्ञो,
जयो विश्वसृट् विश्वशीर्षो श्रुतज्ञो ।
सदाभक्तिवात्सल्य कल्याणगेहं,
अघोघाती अनघो स्फुरद्योगदेहम् ॥ ३५

मनीषी सुलब्धाक्षरो देववाणी,
गिरां नाथ तृप्तो समस्तप्रमाणी ।
तथा रत्नगर्भो महाज्ञानगर्भो,
दयागर्भयुक्तो तथा पद्मगर्भो ॥ ३६

हिरण्याङ्गभू विश्वगर्भो विनोदी,
मनोज्ञार्ह वाचस्पती सुप्रमोदी ।
दृढीयान् इतो ईशिता ईश्वराङ्गो,
अबाधापदस्थायुको धर्मरागो ॥ ३७

सदा सत्यविज्ञानसेनो शमीशो,
महाकामधेनू यतिराट् दमीशो ।
सदा श्लक्ष्णो गुप्तनेत्रो गिरीशो,
सदुद्योतको दीर्घवाणी हरीशो ॥ ३८

महाध्यात्मगो केवली योगमायो,
वनेवेश्मपूज्यर्धि ऋत्विग् विहायो ।
गुणोच्छेदको याज्यसूक्ति स्वरीशो,
स्वभू विस्मयो प्रोत्तमो शासनेशो ॥ ३९

मनःक्लेशहारी कलिम्लानमुक्तो,
तथा धर्मनेमी समस्तेट् विरक्तो ।
हरन्तं दुरन्तं व्रतायानवेद्यो,
स्फुरन्तं चरन्तं अमोघादिविद्यो ॥ ४०

अरङ्गो विरङ्गो रहस्यं सुहार्दं,
चरातीत चित्कन्द चिन्त्यं सुगीर्दं ।
अनर्हान्तको कर्मठो रुद्रभद्रो,
महाप्रातिहार्योज्ज्वलो एरमेन्द्रो ॥ ४१

चतुर्धर्मभाषी सुकर्मण्यसच्छ्री,
प्रधीयान् प्रपञ्ची जगन्मित्रमुच्छ्री ।
अचाल्यो अपाल्यो न वृद्धिर्न हानी,
न मालो न शालो न रीतिर्मखानीं ॥ ४२

विलोलो अलोलो सदा धर्मजन्यो,
सदा ज्ञानकल्योलकेशो अपुण्यो ।
अधर्मो अनीहो असन्धी अदण्डो,
तथा नेदीयान् स्वस्तियुक् ज्ञानपिण्डो ॥ ४३

तथा तीर्थवन्द्यो स्वयंतीर्थराध्यो,
स्वयंतीर्थकारी स्वयंतीर्थसाध्यो ।

स्वयंतीर्थभोगी स्वयंतीर्थयोगी,
महातीर्थतीर्थो जगत्सप्रयोगी ॥ ४४

महावैभवो निर्भवो देवसेवी,
तथा सप्तभङ्गी भजद्वाणीदेवी ।
समाधानसर्वाङ्गलक्ष्मीविवक्तो,
तथा पद्मसंविष्टरो पद्मयुक्तो ॥ ४५

श्रिया संश्रितो सुन्दरो वप्रशाली,
पदन्यासपङ्केरुहो सङ्घमाली ।
शिरोछत्रराजा चलद्धर्मकेतू,
समस्ताङ्गिवाणी वदन् शुद्धहेतू ॥ ४६

तथा द्रव्यषट्कस्वरूपज्ञ शन्दो,
सदा ज्ञानलोकोत्तरज्ञो अफन्दो ।
महामोक्षसद्मा महामन्त्रतत्त्वो,
अहेयो उपादेय विश्वाधिसत्त्वो ॥ ४७

असंसारभू ब्रह्मदेवो प्रदेशी,
चिदानन्दमग्नो अनन्तोपदेशी ।
तथा कोटिसूर्या सुधी मुख्यवीक्ष्यो,
महाबोधिसत्त्वो जगद्दत्तशिक्षो ॥ ४८

महानुत्तरज्ञानचारित्रचारी,
मदोन्मत्तमोहद्विपानां मृगारी ।
तथा सौगतो ग्रामणी स्वेश सूरी,
मनोभ्रान्तिभित् विश्वशौण्डीर भूरि ॥ ४९

तथा सद्दयो धर्मचक्री प्रभावी,
अविद्वेषको संविदुर्भूतभावी ।
सुचैतन्यवाग्बीजमन्त्रो कृपालो,
महाधर्मशक्रेश भापो दयालो ॥ ५०

तथानन्तसंशुद्धिजं लोकमानं,
सदानन्तवीर्यं प्रसू कीर्तियानम् ।
सुखापूर्ण मित्रारितुल्यो व्रताङ्गी,
महाध्यान योगाधिको तत्त्वसङ्गी ॥ ५१

सदा संयमो विश्रमो धर्मलाभो,
महावायुमूर्तिः महानुत्तराभो ।
सुखानन्द गोविन्दविश्वात्मदीपो,
महाघातिकर्मांशभित् धर्मदीपो ॥ ५२

सदात्यो सनात्यो अनन्तेन्द्रशक्ती,
प्रभालोकसंभासनो तत्त्वयुक्ती ।
असदुर्धरो धर्मरो सन्मनोजम्,
तथा भव्यपूतं श्रुताम्भःसरोजम् ॥ ५३

सदा नित्यद्रव्यो पतज्जन्तुधारी,
तथैकस्वभावी बहुभाववारी ।
सदा पुष्कलो चिन्मयो धर्मवृद्धिः,
स्वयम्मङ्गलो श्रेयसां धामवृद्धिः ॥ ५४

तथा पाटवो मार्दवो तीर्थशौचं,
गलद्वाणिपीयूष शत्याधिशौचम् ।

असंस्कारगो सिद्धिभार्यो बहुत्वं,
गतग्लानिभीतिः अरिञ्जित् लघुत्वम् ॥ ५५

गुरुत्वं प्रसिद्धाधिकारी सुरेष्टो,
जलात्मा यमाशी गताङ्गो अभीष्टो ।
अदत्तो सुदत्तो विभङ्गो जराशी,
महत्त्वं तपो द्रव्य हव्यो प्रकाशी ॥ ५६

परार्धी महाब्रह्मसञ्ज्ञ सुसञ्ज्ञं,
तथा जीवितेशं हरो दाघसञ्ज्ञम् ।
अलिङ्गध्वनी विध्वनी नामधारी,
पुरोगो पृथु स्वर्णगोत्राधिकारी ॥ ५७

श्रुताविष्कृतो त्र्यम्बको पितृतातो,
प्रमेयात्मको दक्षिणो विश्वयातो ।
नमद्विश्वदीप्रो त्रिचक्षुः प्रकम्प्रो,
त्रिधा योगबन्धादरारी अनम्रो ॥ ५८

महाप्तो जगत् पापपू वाक्प्रवीणो,
अकिञ्चित्करो निःक्रियो त्वं अरीणो ।
सदा देवसंसत् विपज्जालघाती,
मुनिव्रातसेव्यो अशिष्यो अपाती ॥ ५९

सदा चिल्लयो विश्वकर्मा त्रिदण्डी,
अदण्डी वितुण्डो सतुण्डो अखण्डी ।
अदास्यो उपास्यो अनक्रो अपादो,
अरङ्को विरङ्को सदा त्वं अपादो ॥ ६०

अनालापवृत्ती जगत्सु प्रवृत्ती,
महीनो धुरीणो मदघ्नो विवृत्ती ।
अहम्बुद्धिनाशी असन्ध्यक्षराख्यो,
सदाचीर्णपुण्यो ऋषी अन्तरीक्षो ॥ ६१

असम्बोधनो स्वात्मना स्वात्मवृद्धि,
त्रिकालीन विध्वंस रिक्तो अगृद्धी ।
महाकामकुम्भो सुकल्याणवृक्षो,
तथा धातुरूपो अधातुत्वदक्षो ॥ ६२

अजाड्यो अताड्यो धनाढ्यो कवीशो,
कपर्दी अघार्दी कलास्यो विधीशो ।
महामोदकन्दो जगच्चिन्त्यचित्तो,
अयाची सुयाची सदा इष्टकृत्यो ॥ ६३

अकेशो अखेशो अलोची विलोची,
अनीचो अनुच्यो सुदीर्घो अशोची ।
अनाकारभासी सदाकारशोभी,
अजाची सुजाची शुभोपायशोभी ॥ ६४

समुत्पत्तिविध्वंसनित्यस्वभावी,
जगत्ज्ञापको जापको ज्ञानभावी ।
जगद्भूतनाथो दुराचारवामी,
पराकारसंसारवारी सुकामी ॥ ६५

तथोत्कृष्टदृष्टी विपर्यायबुद्धिः,
असद्भावनष्टी शुभाचारशुद्धी ।

तपस्वी यशस्वी सुवैराग्यसङ्गो,
अनारम्भभाषी स्फुरद्वक्त्ररङ्गी ॥ ६६

स्वयं धूर्जटी पद्मनाभो नयात्मो,
सदा पुण्यकुम्भो पुरस्कृत्यभात्मो ।
धृतश्री व्रतश्री कृतश्री भृतश्री,
बलश्री कलश्री गुणश्री वरश्री ॥ ६७

चतुर्वर्णभिन्नो अलौकिकसाङ्ख्यो,
सदा न क्षतो न क्षयो नाभिकाङ्क्षो ।
महाज्ञानरत्नप्रदो ब्रह्मलोको,
तथा दुर्गतिघ्नो भगो देवलोको ॥ ६८

महाभर्मवारी असंसारचारी,
निराधार साधार सन्न्यासकारी ।
जगद्भालबिन्दु स्फुरद्धर्मरत्नो,
गुणानां निधानं जगत्सुप्रयत्नो ॥ ६९

महामेरुतुङ्गो सदाचार्यसूर्यो,
जयश्रीविवादी जगच्चित्तधार्यो ।
चलद्धर्ममूर्ती क्रियाहेतुकामो,
तथा सार्व शुश्रुकृती विश्वकामो ॥ ७०

महाकीर्तिवृद्धो सदा कल्मषघ्नो,
तथा कर्मसाक्षी विमर्शी बलघ्नो ।
अलाभो सुलाभो प्रकृष्टप्रभावो,
महाध्यापको वाचको विश्वभावो ॥ ७१

सदा क्षेमशर्मा महाक्षेमकर्ता,
महाविज्ञगम्यो अतिथिप्रधर्ता ।
प्रतर्क्यात्मको हेमगर्भो सुपन्था,
क्षमेशो सुरावो भवाब्धिप्रमन्था ॥ ७२

तथा मेरुशाली कमाली अतागो,
असङ्गो सुसङ्गो महाङ्गो अभागो ।
चलच्चामरौघो जगत्सम्पदीशो,
सुशोभाकरो भाकरो चेतनेशो ॥ ७३

सुनिग्रन्थको सज्जनो शास्त्रगन्धो,
यथाख्यातवान् ज्ञातिवृद्धो सुबन्धो ।
शुभाज्ञाप्रधानो स्फुरद् योगवाणी,
महामङ्गलिको मथत्पञ्चवाणी ।
अपर्याप्त पर्याप्त सज्जीववेत्ता,
महाज्ञानशुद्धेन मिथ्यात्वभेत्ता ॥ ७४

जगन्मौलिचूडामणी विश्वहारो,
रमाकेलिगेहं भवापारपारो ।
महोदारकर्मा सुवेश्मा सुदारो,
अनाचारआचारसर्वर्द्धिकारो ॥ ७५

अलङ्कारसञ्चारसम्पन्नसन्तो,
वदान्यो सदा प्राणवो बुद्धिकन्तो ।
अनीदृग् दिनिर्ध्वन्धको चक्रपाणी,
गदाशङ्खछत्रप्रशस्ताङ्कपाणी ॥ ७६

तमोघ्नो द्वितीयो अलीनो नवर्धि-
मितज्ञोऽमितज्ञो निवृत्तिगुणर्धी ।
तथा पूर्वलक्ष्मी सदा पावनात्मा,
सदौचित्यकर्ता विवेकभृतात्मा ॥ ७७

महाऽक्षोभ्य रोगार्तिहा वीतदुष्टो,
सदा वीतमात्सर्यको ज्ञानपुष्टो ।
सुभास्वान् गुणज्येष्ठको गाह्यगोप्ता,
महानन्दसम्वर्धनो पापलोप्ता ॥ ७८

महाकारुणीको जगत्साधनीको,
त्रिलोकेशदेशाधिपो माननीको ।
क्षरद्वाणीगङ्गासरित्पूतविश्वो,
समुत्पत्तिनिष्पत्तिविज्ञातविश्वो ॥ ७९

चलस्वर्णदुर्गत्रयो चङ्गिमाङ्गो,
मृगेन्द्रासनस्थायुको देवरागो ।
जगज्जागरूको दयादारधारी,
सदा निर्मलाङ्गो तथा व्यङ्गधारी ॥ ८०

महादुन्दुभीनिस्वनो योगनिद्रो,
महावार्धिवाक् वारिदो तापसेन्द्रो ।
महापुण्यलिप्तो सुधारूपगात्रं,
दुराशानिवारी जरावेलिदात्रम् ॥ ८१

सदाभोगभामण्डलस्फारशोभी,
असह्यांशुशीतांशु भक्तैकलोभी ।

पराघातकर्मा तपोलब्धिलब्धो,
तथा क्षायिकभावाङ्कितो मोक्षलुब्धो ॥ ८२

लसत् ज्ञानवल्ली(ल)जलं प्रार्थितार्थो,
श्रमाभावहेतुः प्रथाप्तो गुणार्थो ।
जगच्छेखरो पादचारी जयाङ्को,
जगत्सत्प्रशस्ति प्रतिज्ञा शुभाङ्को ॥ ८३

महानामअष्टोत्तरं ए हजारं,
भजो चित्तमां नित्य थइने करारं ।
बहु वर्षना कोटि जो कष्ट कीजे,
फलं नामना जापथी सद्य लीजे ॥ ८४

मुधा कां गमाडो भलो जन्म आले ?
भजो नाममाला भली त्रण काले ।
नथी ए विना ईश को विश्वमांहे,
नमें रातिदीशं सुरा चित्त चाहे ॥ ८५

जिणे राग ने द्वेषनां मान मोड्या,
जिणे दुष्ट दुःकर्मनां बन्ध तोड्या ।
जरा जन्म ने मृत्युनी भीति वारी,
रहे ज्ञाननी लीलमां निर्विकारी ॥ ८६

मते मूढ जे मानुषा एम आखे,
फिरी विश्वना ईशने जन्म भाखे ।
विना पास दीधा यथा रंग नावे,
विना कर्म प्राणी भणी जन्म नावे ॥ ८७

जिणे गर्भना कंदमां दंद कीधा,
करी क्रोध झाझा घणां पाप लीधां ।
जिणे दुर्गुणे बंध बांध्या अनाणे,
कहो छोडवे भक्तने सें प्रमाणे ॥ ८८

महामंदबुद्धि नही ज्ञानलेशं,
कृपानाथने भाखता जन्मवेशं ।
रखे ते कदा कर्णमां वात आवे,
सदा माहरा चित्तमां जैनभावे ॥ ८९

नथी ए विना मंत्र को यंत्र रूडा,
विना एहथी भाव ते सर्व कूडा ।
नथी ए विना बुद्धि ने सिद्धि साची,
जिको ए विना वात ते सर्व काची ॥ ९०

ततो एहना नाममां ध्यान राखी,
करी नाममाळा जिसी देवशाखी ।
सदा जे भणे जे गणे नित्यकालम्,
वसे तेहने मंदिरे लच्छिबालं ॥ ९१

सुधी पुण्यहर्षाभिधानो मुनीशो,
गुणी वाचको ज्ञानहर्षो गणीशो ।
तयोश्चारुपादाब्जसेवासुसक्तो,
मुनिर्जीवहर्षो वदे भावयुक्तो ॥ ९२

पू.आ.श्री सिद्धसेनदिवाकरसूरिविरचितः

# ११. ॥ श्रीवर्धमानशक्रस्तवः ॥

ॐ नमोऽर्हते भगवते परमात्मने परमज्योतिषे परमपरमेष्ठिने परमवेधसे परमयोगिने परमेश्वराय तमसःपरस्तात् सदोदितादित्यवर्णाय समूलोन्मूलितानादिसकलक्लेशाय ॥१॥

ॐ नमोऽर्हते भूर्भुवः स्वस्त्रयीनाथमौलिमन्दार-मालार्चितक्रमाय सकलपुरुषार्थयोनिनिरवद्यविद्याप्रवर्तनैकवीराय नमःस्वस्तिस्वधास्वाहावषडर्थैकान्तशान्तमूर्त्तये भवद्भाविभूत-भावावभासिने कालपाशनाशिने सत्त्वरजस्तमोगुणातीताय अनन्तगुणाय वाङ्मनोऽगोचरचरित्राय पवित्राय करणकारणाय तरणतारणाय सात्त्विकदैवताय तात्त्विकजीविताय निर्ग्रन्थपरम-ब्रह्महृदयाय योगीन्द्रप्राणनाथाय त्रिभुवनभव्यकुलनित्योत्सवाय विज्ञानानन्दपरब्रह्मैकात्म्य-सात्म्यसमाधये हरिहरहिरण्य-गर्भादिदेवतापरिकलितस्वरूपाय सम्यक्श्रद्धेयाय सम्यग्ध्येयाय सम्यक्शरण्याय सुसमाहितसम्यक्स्पृहणीयाय ॥२॥

ॐ नमोऽर्हते भगवते आदिकराय तीर्थङ्कराय स्वयं सम्बुद्धाय पुरुषोत्तमाय पुरुषसिंहाय पुरुषवरपुण्डरीकाय पुरुषवरगन्धहस्तिने लोकोत्तमाय लोकनाथाय लोकहिताय लोकप्रदीपाय लोकप्रद्योतकारिणे अभयदाय दृष्टिदाय मुक्तिदाय मार्गदाय बोधिदाय जीवदाय शरणदाय धर्मदाय धर्मदेशकाय धर्मनायकाय धर्मसारथये धर्मवरचातुरन्तचक्रवर्तिने व्यावृत्तछद्मने अप्रतिहतसम्यग्दर्शनज्ञानसद्मने ॥३॥

ॐ नमोऽर्हते जिनाय जापकाय तीर्णाय तारकाय बुद्धाय बोधकाय मुक्ताय मोचकाय त्रिकालविदे पारङ्गताय कर्माष्टक-निषूदनाय अधीश्वराय शम्भवे जगत्प्रभवे स्वयम्भुवे जिनेश्वराय स्याद्वादवादिने सार्वाय सर्वज्ञाय सर्वदर्शिने सर्वतीर्थोपनिषदे सर्वपाखण्डमोचिने सर्वयज्ञफलात्मने सर्वज्ञकलात्मने सर्वयोगरहस्याय केवलिने देवाधिदेवाय वीतरागाय ॥४॥

ॐ नमोऽर्हते परमात्मने परमाप्ताय परमकारुणिकाय सुगताय तथागताय महाहंसाय हंसराजाय महासत्त्वाय महाशिवाय महाबोधाय महामैत्राय सुनिश्चिताय विगतद्वन्द्वाय गुणाब्धये लोकनाथाय जितमारबलाय ॥५॥

ॐ नमोऽर्हते सनातनाय उत्तमश्लोकाय मुकुन्दाय गोविन्दाय विष्णवे जिष्णवे अनन्ताय अच्युताय श्रीपतये विश्वरूपाय हृषीकेशाय जगन्नाथाय भूर्भुवःस्वःसमुत्ताराय मानञ्जराय कालञ्जराय ध्रुवाय अजाय अजेयाय अजराय अचलाय अव्ययाय विभवे अचिन्त्याय असंख्येयाय आदिसंख्याय आदिकेशवाय आदिशिवाय महाब्रह्मणे परमशिवाय एकानेकानन्तस्वरूपिणे भावाभावविवर्जिताय अस्तिनास्तिद्वयातीताय पुण्यपापविरहिताय सुखदुःखविविक्ताय व्यक्ताव्यक्तस्वरूपाय अनादिमध्यनिधनाय नमोऽस्तु मुक्तीश्वराय मुक्तिस्वरूपाय ॥६॥

ॐ नमोऽर्हते निरातङ्काय निःसङ्गाय निर्भयाय निर्मलाय निर्द्वन्द्वाय निस्तरङ्गाय निरुर्मये निरामयाय निष्कलङ्काय परमदैवताय सदाशिवाय महादेवाय शङ्कराय महेश्वराय महाव्रतिने

महायोगिने महात्मने पञ्चमुखाय मृत्युञ्जयाय अष्टमूर्त्तये भूतनाथाय जगदानन्ददाय जगत्पितामहाय जगद्देवाधिदेवाय जगदीश्वराय जगदादिकन्दाय जगद्भास्वते जगत्कर्मसाक्षिणे जगच्चक्षुषे त्रयीतनवे अमृतकराय शीतकराय ज्योतिश्चक्रचक्रिणे महाज्योतिर्द्योतिताय महातमःपारे सुप्रतिष्ठिताय स्वयंकर्त्रे स्वयंहर्त्रे स्वयंपालकाय आत्मेश्वराय नमो विश्वात्मने ॥७॥

ॐ नमोऽर्हते सर्वदेवमयाय सर्वध्यानमयाय सर्वज्ञानमयाय सर्वतेजोमयाय सर्वमन्त्रमयाय सर्वरहस्यमयाय सर्वभावाभाव-जीवाजीवेश्वराय अरहस्यरहस्याय अस्पृहस्पृहणीयाय अचिन्त्य-चिन्तनीयाय अकामकामधेनवे असङ्कल्पितकल्पद्रुमाय अचिन्त्यचिन्तामणये चतुर्दशरज्ज्वा-त्मकजीवलोकचूडामणये चतुरशी-तिलक्षजीवयोनिप्राणिनाथाय पुरुषार्थनाथाय परमार्थनाथाय अनाथनाथाय जीवनाथाय देवदानवमानवसिद्धसेनाधिनाथाय ॥८॥

ॐ नमोऽर्हते निरञ्जनाय अनन्तकल्याणनिकेतनकीर्तनाय सुगृहीतनामधेयाय महिमामयाय धीरोदात्तधीरोद्धतधीर-शान्तधीरललितपुरुषोत्तमपुण्य-श्लोकशतसहस्रलक्षकोटि-वन्दितपादरविन्दराय सर्वगताय ॥९॥

ॐ नमोऽर्हते सर्वसमर्थाय सर्वप्रदाय सर्वहिताय सर्वाधिनाथाय कस्मैचन क्षेत्राय पात्राय तीर्थाय पावनाय पवित्राय अनुत्तराय उत्तराय योगाचार्याय संप्रक्षालनाय प्रवराय अग्राय वाचस्पतये माङ्गल्याय सर्वात्मनीयाय सर्वार्थनाथाय अमृताय सदोदिताय ब्रह्मचारिणे तायिने दक्षिणीयाय निर्विकाराय

वज्रर्षभनाराचमूर्त्तये तत्त्वदर्शिने पारदर्शिने परमदर्शिने निरुपमज्ञानबलवीर्यतेजः शक्त्यैश्वर्यमयाय आदिपुरुषाय आदिपरमेष्ठिने आदिमहेशाय महाज्योतिःस(स्त)त्त्वाय महार्चिर्धनेश्वराय माहमोहसंहारिणे महासत्त्वाय महाज्ञामहेन्द्राय महालयाय महाशान्तये महायोगीन्द्राय अयोगिने महामहीयसे महाहंसाय महाहंसराजाय महासिद्धये शिवमचलमरुजमनन्त-मक्षयमव्याबाधमपुनरावृत्तिमहानन्दं महोदयं सर्वदुःखक्षयं कैवल्यं अमृतं निर्वाणमक्षरं परब्रह्म निःश्रेयसमपुनर्भवं सिद्धिगतिनामधेयं स्थानं संप्राप्तवते चराचरमवते नमोऽस्तु श्रीमहावीराय नमोनमोनमोऽस्तु त्रिजगन्नाथाय श्रीवर्धमानाय ॥१०॥

ॐ नमोऽर्हते केवलिने परमयोगिने मुक्तिमार्गनियोगिने विशालशासनाय सर्वलब्धिसम्पन्नाय निर्विकल्पाय कल्प-नातीताय कलाकलापकलिताय विस्फुरदुरुशुक्लध्यानाग्निनिर्दग्ध कर्मबीजाय प्राप्तानन्तचतुष्टयाय सौम्याय दान्ताय शान्ताय मङ्गलवरदाय अष्टादशदोषरहिताय संसृतविश्वसमीहिताय स्वाहा ॐ ह्रीँ श्रीँ अर्हं नमः ॥११॥

लोकोत्तमो निस्प्रतिमस्त्वमेव, त्वं शाश्वतं मङ्गल-मप्यधीश!।

त्वामेकमर्हन्! शरणं प्रपद्ये, सिद्धर्षिसद्धर्ममयस्त्वमेव॥१॥

त्वं मे माता पिता नेता, देवो धर्मो गुरुः परः।
प्राणाः स्वर्गोऽपवर्गश्च, सत्त्वं तत्त्वं गतिर्मतिः ॥२॥

जिनो दाता जिनो भोक्ता, जिनः सर्वमिदं जगत्।
जिनो जयति सर्वत्र, यो जिनः सोऽहमेव च ॥३॥

यत्किञ्चित् कुर्महे देव !, सदा सुकृतदुष्कृतम्।
तन्मे निजपदस्थस्य, हुं क्षः क्षपय त्वं जिन! ॥४॥

गुह्यातिगुह्यगोप्ता त्वं, गृहाणास्मत्कृतं जपम् ।
सिद्धिः श्रयति मां येन, त्वत्प्रसादात्त्वयि स्थितम् ॥५॥

इति श्रीवर्धमानजिननाममन्त्रस्तोत्रम् । प्रतिष्ठायां शान्तिकविधौ पठितं महासुखाय स्यात् ।

इति शक्रस्तवः ।

१ इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षणामाणानां भव्यजीवानां चराचरेऽपि (जीवलोके) सद्वस्तु तन्नास्ति यत् करतलप्रणयि न भवतीति । किं च-

२ इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्रशुश्रूषितं भवान्तर-कृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां भवनपतिव्यन्तर-ज्योतिष्क-वैमानिकवासिनो देवाः सदा प्रसीदन्ति व्याधयो विलीयन्ते ।

३ इतीमं पूर्वोक्तमिन्द्रस्तवैकादश मन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां

गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां पृथिव्यप् तेजोवायुगगनानि भवन्त्यनुकूलानि ।

४ इतीमं पूर्वोक्तमिन्द्रस्तवैकादश मन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां सर्वसंपदां मूलं जायते जिनानुरागः।

५ इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्य प्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां साधवः सौमनस्येनानुग्रहपरा जायन्ते।

६ इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां खलाः क्षीयन्ते।

७ इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां

गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां जल-स्थल-गगनचराः क्रुरजन्तवोऽपि मैत्रीमया जायन्ते ।

८ इतीमं पूर्वोक्तमिन्द्रस्तवैकादश मन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां अधमवस्तून्यपि उत्तमवस्तुभावं प्रपद्यन्ते ।

९ इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां धर्मार्थकामा गुणाभिरामा जायन्ते ।

१० इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां ऐहिक्यः सर्वा अपि शुद्धगोत्रकलत्र-पुत्र-मित्र-धन-धान्य-जीवित-यौवन-रूपाऽऽरोग्य-यशः-पुरस्सराः सर्वजनानां संपदः परभागजीवित-शालिन्यः सद्दर्काः सुसंमुखी भवन्ति । किं बहुना ?

११ इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमन्त्रराजोपनिषद्गर्भं अष्टमहासिद्धिप्रदं सर्वपापनिवारणं सर्वपुण्यकारणं सर्वदोषहरं सर्वगुणकरं महाप्रभावं अनेकसम्यग्दृष्टिभद्रकदेवताशत-सहस्त्रशुश्रूषितं भवान्तरकृताऽसंख्यपुण्यप्राप्यं सम्यग् जपतां पठतां गुणयतां शृण्वतां समनुप्रेक्षमाणानां भव्यजीवानां आमुष्मिक्यः सर्वमहिमास्वर्गापवर्गश्रियोऽपि क्रमेण यथेष्टं(च्छं)स्वयं स्वयंवरणोत्सवसमुत्सुका भवन्तीति । सिद्धिः(दः) श्रेयः समुदयः।

यथेन्द्रेण प्रसन्नेन, समादिष्टोऽर्हतां स्तवः ।
तथाऽयं सिद्धसेनेन, प्रपेदे संपदां पदम् ॥१॥
॥ इति श्रीवर्धमानशक्रस्तवः ॥

चिरन्तनाचार्यविरचिता

# १२. ॥ श्रीअर्हन्नमस्कारावलिका ॥

( श्रीअर्हतोऽष्टोत्तरशतगुणवर्णनम् )

नमो चउदसमहासुमिणसंसूइय अवयारकारगाणं अरिहंताणं ॥१

नमो गब्भट्ठियतियनाणसंजुत्ताणं अरिहंताणं ॥ २

नमो गब्भट्ठियचउसट्ठिदेविंदसंथुआणं अरिहंताणं ॥ ३

नमो गब्भट्ठियमहाजोगब्भासीणं अरिहंताणं ॥ ४

नमो तेल्लोक्कदिवायरजम्मोदयसंपत्ताणं अरिहंताणं ॥ ५

नमो सव्वजीवसुहदायगजम्मकल्लाणगसंपत्ताणं अरिहंताणं ॥६

नमो छप्पन्नदिसाकुमारिकयसुइकम्माणं अरिहंताणं ॥ ७

नमो देविंदकरसंपुडसंठिआणं अरिहंताणं ॥ ८

नमो मेरुमत्थयठिअसिंहासणसंनिविट्ठाणं अरिहंताणं ॥ ९

नमो सव्वसुरासुरकयकुसुमंजलिए संपूइआणं अरिहंताणं ॥१०

नमो अट्ठसहसचउसट्ठिपुण्णकलसखीरोदहिन्दविआणं अरिहंताणं ॥

नमो वरपडहभेरिझल्लरिदेवदुंदुहिनिनायपुव्वपूईआणं अरिहंताणं ॥ १२

नमो मघमघंतवरगोसीसचंदणचच्चियाणं अरिहंताणं ॥ १३

नमो जलथलयदिव्वकुसुममहामल्लालइअकंठाणं अरिहंताणं ॥१४

नमो पवरहारद्धहार-कडय-कुंडल-मुउड मंडिआणं अरिहंताणं ॥ १५

नमो वरवेणुवीणामुयंगतालघुघरघुमघुमिअकयनट्टविहीए संपूइआणं अरिहंताणं ॥ १६

नमो जयजयसद्दसमुच्चरिअसुरसमूहेण मायाभवणसमागयाणं अरिहंताणं ॥ १७

नमो सक्कसंठवियअंगुठामयआहारकारगाणं अरिहंताणं ॥ १८

नमो चम्मचक्खूणमदंसिअकयाहार-नीहाराणं अरिहंताणं ॥१९

नमो सेअमलरागेवज्जिअसुहसरीरसंपत्ताणं अरिहंताणं ॥ २०

नमो गोक्खीरधाराधवलमंसरुहिरधारगाणं अरिहंताणं ॥ २१

नमो मंदारपारिजायकुसुमसंजणिअसुरहिसासूसासाणं अरिहंताणं ॥ २२

नमो छत्त-चामर-पडाग-जूव-जवलंछिअकरचरणाणं अरिहंताणं ॥ २३

नमो अट्ठाहिअसहस्सेणं लक्खणगणेणं संसोहिआणं अरिहंताणं ॥ २४

नमो देविंदाइट्ठपंचदेवंगणाहिं कयधाइकम्माणं अरिहंताणं ॥२५

नमो अवरावरसुरकुमारसमं संकीलगाणं अरिहंताणं ॥ २६

नमो बालत्तणम्मि अबालभावाणं अरिहंताणं ॥ २७

नमो सव्वकलाविन्नाणसमूहपारसंपत्ताणं अरिहंताणं ॥ २८

नमो तेलुक्कच्छरिअकारगरूवजुव्वणगुणसंपत्ताणं अरिहंताणं ॥२९

नमो गामायारपरीसहविप्पमुक्कबालबंभयारीणं अरिहंताणं ॥३०

नमो गामायारपरीसहअहिआसगविवाहकंकणमंडिआणं अरिहंताणं ॥ ३१

नमो पंचविहेसु माणुसभोगेसु अमुच्छिआणं अरिहंताणं ॥ ३२

नमो परमनीइए रज्जकरणेणं सव्वपयासुहदायगाणं अरिहंताणं॥

नमो विसुद्धसुहज्झवसायभावणासंपत्ताणं अरिहंताणं ॥ ३४

नमो सयमेव परमवेरग्गसंपप्पसयंसंबुद्धाणं अरिहंताणं ॥ ३५

नमो भत्तिभरनमिरलोगंतिआमरवंदिआणं अरिहंताणं ॥ ३६

नमो वरवरिआघोसपुव्वं संवच्छरिअदाणदायगाणं अरिहंताणं॥३७

नमो सव्वामरवईहिं कयदिक्खाभिसेआणं अरिहंताणं ॥ ३८
नमो सिबिया-विमाणसंनिविट्ठाणं अरिहंताणं ॥ ३९
नमो असोअ-पुन्नग-तिलय-चंपयमंडिअवणसंडसंपत्ताणं अरिहंताणं ॥ ४०
नमो वज्जहरसंठविअसीहासणोवरिसंठिआणं अरिहंताणं ॥४१
नमो वरकडय-कुंडल-हारद्धहार-मउड -मालाविप्पमुक्काणं अरिहंताणं ॥ ४२
नमो अंजणघणसरिसाण केसाण पंचमुट्ठिए लोअकारगाणं अरिहंताणं ॥ ४३
नमो लोगग्गमुवगयसव्वसिद्धाणं नमोक्कारकारगाणं अरिहंताणं ॥ ४४
नमो सव्वसावज्जपावजोगपच्चक्खाणकारगाणं अरिहंताणं ॥४५
नमो नाण-दंसण-चारित्तरयणमालामंडिआणं अरिहंताणं ॥४६
नमो विमलविउलमइ-मणपज्जवनाणसमुप्पनाणं अरिहंताणं ॥४७
नमो समिइ-गुत्तिगुणरयणअलंकिआणं अरिहंताणं ॥ ४८
नमो दसविहसमणधम्मस्स संधारगाणं अरिहंताणं ॥ ४९
नमो पुक्खरपत्त व्व निरुवलेवाणं अरिहंताणं ॥ ५०
नमो जीवो व्व अप्पडिघाइविहारवरकारगाणं अरिहंताणं ॥५१
नमो आयासु व्व निरासयगुणसंसोहिआणं अरिहंताणं ॥ ५२
नमो अक्खलियपवणगुण व्व अप्पडिबद्धाणं अरिहंताणं ॥५३
नमो संगोविअंगोवंगकुम्म व्व गुत्तिंदिआणं अरिहंताणं ॥ ५४
नमो विहंगमो व्व विप्पमुक्कगुणसंपत्ताणं अरिहंताणं ॥ ५५
नमो खग्गिसिंग व्व एगग्गभावमुवगयाणं अरिहंताणं ॥ ५६
नमो भारंडपक्खि व्व अप्पमत्ताणं अरिहंताणं ॥ ५७

नमो लक्खणगुणोवेअरवसहु व्व जाइथामाणं अरिहंताणं ॥५८

नमो कुंजरो व्व सोंडीरगुणसंजुआणं अरिहंताणं ॥ ५९

नमो पंचाणणु व्व निब्भयाणं अरिहंताणं ॥ ६०

नमो सायरवरो व्व गंभीरियगुणमंडिआणं अरिहंताणं ॥ ६१

नमो संपुण्णससहरु व्व सोमसहावाणं अरिहंताणं ॥ ६२

नमो गयणमंडणभाणु व्व दित्ततवतेआणं अरिहंताणं ॥ ६३

नमो पुहवी व्व सव्वंसहगुणसंजुआणं अरिहंताणं ॥ ६४

नमो सारयंबु व्व सच्छमणभावाणं अरिहंताणं ॥ ६५

नमो गामागर-नगर-पट्टणमंड़ियविसयेसु विहरमाणाणं अरिहंताणं ॥ ६६

नमो बहुपुण्णोदयसंजुअभवियजणदारसंपत्ताणं अरिहंताणं ॥६७

नमो बायालीसदोसविरहियाहारगाहगाणं अरिहंताणं ॥ ६८

नमो छट्ठट्ठम-दसम-दुवालस-मासद्ध मासखवणाइतवकारगाणं अरिहंताणं ॥ ६९

नमो वीरासणगाइअणेगासणसंठिआणं अरिहंताणं ॥ ७०

नमो बावीसपरीसहअहिआसगाणं अरिहंताणं ॥ ७१

नमो बज्झभिंतरपरिग्गहविप्पमुक्काणं अरिहंताणं ॥ ७२

नमो महावणम्मि पडिमापडिवन्नाणं अरिहंताणं ॥ ७३

नमो विसुद्धसुहधम्मसुक्कज्झाणसंपत्ताणं अरिहंताणं ॥ ७४

नमो खवगसेढीए संपत्ताणं अरिहंताणं ॥ ७५

नमो मोहमहामल्लक्खयकारणाणं अरिहंताणं ॥ ७६

नमो लोआलोअपयासगकेवलनाणसंपत्ताणं अरिहंताणं ॥ ७७

नमो रुप्प-सुवन्न-रयणमयसालतयसंठिआणं अरिहंताणं ॥७८

नमो नवसुवन्नकमलेसु पायसंठावगाणं अरिहंताणं ॥ ७९
नमो चउमुहचउसीहासणसंठिआणं अरिहंताणं ॥ ८०
नमो पंचदसण्हं छत्तरयणसंसोहिआणं अरिहंताणं ॥ ८१
नमो बारसगुणअसोअवरपायवपूईआणं अरिहंताणं ॥ ८२
नमो मणि-कणगविचित्तदंडमयचारुचामरवीईआणं
अरिहंताणं ॥ ८३
नमो जाणुप्पमाणभरियप्फपयराणं अरिहंताणं ॥ ८४
नमो दिणयरसमतेअधम्मचक्कसंसोहिअअग्गविभागाणं
अरिहंताणं ॥ ८५
नमो निम्मलभामंडलमंडिअपिट्ठविभागाणं अरिहंताणं ॥ ८६
नमो देवदुंदुहिनिनायसंसूइयतिहुअणरायत्तणपत्ताणं अरिहंताणं॥
नमो सुर-नर-तिरिआणं संजणियपडिबोहवाणीगुणसंपत्ताणं
अरिहंताणं ॥ ८८
नमो भविअजणकमलपयासगाणं अरिहंताणं ॥ ८९
नमो चउद्दसपुव्वाणं बीयभूयपयतियदाणदायगाणं अरिहंताणं ॥
नमो चउद्दसपुव्वसुत्तकारगसीसाण गणहरपयसंठावगाणं
अरिहंताणं ॥ ९१
नमो सव्वसुरासुरनमंसिअचउव्विहसमणसंघसंठावगाणं
अरिहंताणं ॥ ९२
नमो सव्वोपाणभूअजीअसत्तकारुण्णभावपत्ताणं अरिहंताणं ॥९३
नमो अमरवइ-चक्कहर-वासुदेव-बलभद्दवंदिआणं
अरिहंताणं ॥ ९४

नमो अणुत्तरविमाणवासिअमरसंदेहअवहारकारगाणं अरिहंताणं ॥ ९५
नमो सुक्कलेसाए तेरसमगुणठाणसंठिआणं अरिहंताणं ॥ ९६
नमो जीवाजीवाइपयत्थपयासगाणं अरिहंताणं ॥ ९७
नमो परोवयारकरणेणं संपूरिअआउकम्माणं अरिहंताणं ॥ ९८
नमो लोगग्गगमणजुग्गखित्तमुवगयाणं अरिहंताणं ॥ ९९
नमो सिद्धसुहदायगंतिमतवकारगाणं अरिहंताणं ॥ १००
नमो चउद्दसमगुणठाणठियसेलेसीकरणमुवगयाणं अरिहंताणं ॥
नमो सव्वसुरासुरविरइयचरमसमवसरणसंठिआणं अरिहंताणं॥
नमो अणाइकम्मसंजोगविप्पमुक्काणं अरिहंताणं ॥ १०३
नमो उरालियतेअकम्मणसरीरपडिमुक्काणं अरिहंताणं ॥ १०४
नमो रागद्दोसजलभरिअसंसारसागरसमुत्तिन्नाणं अरिहंताणं ॥१०५
नमो सरीरतिभागूणघणविरईयजीवपएसाणं अरिहंताणं ॥१०६
नमो पुव्वज्झाणपओगाओसु धणविमुक्क व्व गइपरिणयाणं अरिहंताणं ॥ १०७

(नमो पुव्वज्झाणपओगाओ उसू धणुविमुक्क व्व गइपरिणयाणं अरिहंताणं

नमो पुव्वपओगाओ बंधणविमुक्क (एरण्ड फलं) व्व गइपरिणयाणं अरिहंताणं ।)

नमो सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणरावित्ति-सिद्धिगइनामधेयं ठाणंसंपत्ताणं अरिहंताणं ॥ १०८

चिरन्तनाचार्यविरचिता

# १३. ॥ श्रीसिद्धनमस्कारावलिका ॥

(श्रीसिद्धपरमात्मनोऽष्टोत्तरशतगुणवर्णनम्)

नमो जिणवरिंदपयमणुहविऊण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ १

नमो सामन्नेणं केवलित्तपयंपरिपालिऊण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ २

नमो तित्थयरस्स तित्थे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ३

नमो तित्थं विणा जाईसरणाइणा सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ४

नमो सयंबुद्धभावेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ५

नमो पत्तेयबुद्धभावेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ६

नमो बुद्धबोहियभावेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ७

नमो पुरिसलिंगेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ८

नमो इत्थिलिंगेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ९

नमो नपुंसकलिंगेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ १०

नमो मुणिवरलिंगेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ११

नमो अन्नतित्थियलिंगेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥१२

नमो गिहत्थलिंगेण सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ १३

नमो एगसमए एगजीवसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ १४

नमो एगसमए अणेगजीवसिद्धिमुवगयाणं सव्वसिद्धाणं ॥१५

नमो संपुन्नसुयनाणीसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ १६

नमो परमावहिनाणी सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ १७

नमो मणपज्जवनाणी सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ १८

नमो आयरियपयट्ठियसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ १९
नमो उवज्झायपयट्ठियसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ २०
नमो अंतगडकेवलिसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ २१
नमो पडिमापडिवन्नसाहुसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ २२
नमो जंघाचारणमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ २३
नमो विज्जाचारणमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ २४
नमो आमोसहिलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ २५
नमो खेलोसहिलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ २६
नमो जल्लोसहिलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ २७
नमो सव्वोसहिलद्धिसिद्धसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ २८
नमो पयाणुसारीमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ २९
नमो संभिन्नसोईमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ३०
नमो कुट्ठबुद्धीमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ३१
नमो बीयबुद्धिमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ३२
नमो अक्खीणमहाणसीलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ३३
नमो खीरासवलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं॥
नमो महुआसवलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ३५
नमो आसीविसलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ३६

नमो दिट्ठीविसलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ३७
नमो आगासगामीमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥३८
नमो विपुलमइलद्धिसिद्धसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ३९
नमो पुलायलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥४०
नमो चक्कवट्टिमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ४१
नमो बलदेवमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ४२
नमो गणहरलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥४३
नमो तेअलेसालद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं॥
नमो सीअलेसालद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ४५
नमो आहारगलद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ४६
नमो लहुसरीरकरणमहसिद्धिसंपन्नमुणिवरसिद्धिमुवगाणं ॥४७
नमो तिहुयणवसिकारगमहसिद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ४८
नमो तिहुयणईसरियमहसिद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ४९
नमो जल व्व पुढवीमज्झे थल व्व जलोवरिचंकमणमहसिद्धि-
संपन्नमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ५०
नमो अणु व्व सुहुमसरीरकरणसिद्धिमुवगयाणं सव्वसिद्धाणं॥५१
नमो महसरीरकरणमहसिद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ५२
नमो इच्छाचारणमहसिद्धिसंपन्नमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ५३

नमो भूमित्थजोइसियफासकरणमहसिद्धिसंपन्नमुणिवरसिद्धिमुव
गयाणंसव्वसिद्धाणं ॥ ५४
नमो मेरुपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥५५
नमो निसह–नीलपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ५६
नमो महहिमव–रुप्पिपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ५७
नमो महहिमव–सिहरीपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ५८
नमो वेअड्ढपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥५९
नमो पउमवरवेईयासंठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ६०
नमो गयदंतपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥६१
नमो जमगपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥६२
नमो दिग्गयपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं॥६३
नमो इसुआरपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ६४
नमो वक्खारगिरीसु संठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ६५
नमो वट्टवेयड्ढपव्वयसंठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ६६
नमो रिसहकूट पव्वयट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ६७
नमो अट्ठावयपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ६८

नमो सम्मेयसिहरपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ६९
नमो सेत्तुंजयपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं सव्वसिद्धाणं ॥
नमो उज्जिंतसेलसिहरट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं। ७१
नमो माणुसोत्तरपव्वयट्ठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ७२
नमो पंचसु भरहेसु संठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ७३
नमो पंचसु एरवएसु संठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ७४
नमो पंचसु महाविदेहेसु संठियमुणिवरसिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ७५
नमो समत्थधाईसंडे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ७६
नमो समत्थपुक्खरवरदीवे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥७७
नमो समत्थजंबूदीवे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ७८
नमो लवणसमुद्दमज्झे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ७९
नमो कालोदसमुद्दमज्झे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ८०
नमो सीआ-सीउआनईमज्झे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥८१
नमो नारीकंता-हरिकंतानइमज्झे सिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ८२
नमो नरकांता-हरिसलिलानईमज्झे सिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ८३
नमो रूप्पकूलारोहियानईमज्झे सिद्धिमुवगयाणं सव्वसिद्धाणं॥८४
नमो सुवन्नकूलारोहियानईमज्झे सिद्धिमुवगयाणं
सव्वसिद्धाणं ॥ ८५

नमो रत्ता-रत्तवईनईमज्झे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥८६
नमो गंगा-सिंधूमज्झे सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ८७
नमो अईयकाले सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ८८
नमो संपइ सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ८९
नमो खाइय-पारिणामियभावजुअले संठिआणं सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ९०
नमो अणंतनाणधराणं सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ९१
नमो अणंतदंसणधराणं सिद्धिमुवगयाणं सव्वसिद्धाणं ॥ ९२
नमो अणंतपरमाणंदसुहसंपत्ताणं सव्वसिद्धाणं ॥ ९३
नमो अणंतवीरियभावमुवगयाणं सव्वसिद्धाणं ॥ ९४
नमो साइअणंतठिइसंपत्ताणं सव्वसिद्धाणं ॥ ९५
नमो पंचविहसंठाणपरिमुक्काणं सव्वसिद्धाणं ॥ ९६
नमो पंचविहवन्नविसेसरहियाणं सव्वसिद्धाणं ॥ ९७
नमो दुविहगंधविमुक्काणं सव्वसिद्धाणं ॥ ९८
नमो पंचविहरसविसेसरहिआणं सव्वसिद्धाणं ॥ ९९
नमो अट्ठविहफासविसेसविप्पमुक्काणं सव्वसिद्धाणं ॥ १००
नमो जम्म-जरा-मरणविप्पमुक्काणं सव्वसिद्धाणं ॥ १०१
नमो अविचलपयसंठिआणं सव्वसिद्धाणं ॥ १०२
नमो अट्ठविहकम्मकलंकविप्पमुक्काणं सव्वसिद्धाणं ॥ १०३
नमो सव्वसंजोग-विउओगविप्पमुक्काणं सव्वसिद्धाणं ॥ १०४
नमो पारगयाणं सव्वसिद्धाणं ॥ १०५
नमो परंपरगयाणं सव्वसिद्धाणं ॥ १०६
नमो लोगग्गमुवगयाणं सव्वसिद्धाणं ॥ १०७
नमो अणंताणंतगुणमणिमंडिआणं सव्वसिद्धाणं ॥ १०८

## १४. ॥ श्रीपद्मावतीसहस्त्रनामस्तोत्रम् ॥

(अनुष्टुप्)

प्रणम्य परया भक्त्या देव्याः पादाम्बुजं त्रिधा ।
नामान्यष्टसहस्त्राणि वक्ष्ये तद्भक्तिहेतवे ॥ १

श्रीपार्श्वनाथचरणाम्बुजचञ्चरीका
भव्यान्धनेत्रविमलीकरणे शलाका ।
नागेन्द्रप्राणधरणीधरधारणाभूत्
मां पातु सा भगवती नितरामघेभ्यः ॥ २

पद्मावती पद्मवर्णा पद्महस्तापि पद्मिनी ।
पद्मासना पद्मकर्णा पद्मास्या पद्मलोचना ॥ ३

पद्मा पद्मदलाक्षी च पद्मी पद्मवनस्थिता ।
पद्मालया पद्मगन्धा पद्मरागोपरागिका ॥ ४

पद्मप्रिया पद्मनाभिः पद्माङ्गा पद्मशायिनी ।
पद्मवर्णवती पूता पवित्रा पापनाशिनी ॥ ५

पद्मावती प्रसिद्धा च पार्वती पुरवासिनी ।
प्रज्ञा प्रह्लादिनी प्रीतिः पीताभा परमेश्वरी ॥ ६

पातालवासिनी पूर्णा पद्मयोनिः प्रियंवदा ।
प्रदीप्ता पाशहस्ता च परा पारा परम्परा ॥ ७

पिङ्गला परमा पूरा पिङ्गा प्राची प्रतीचिका ।
परकार्यकरा पृथ्वी पार्थिवी पृथिवी पवी ॥ ८

पल्लवा पानदा पात्रा पवित्राङ्गी च पूतना ।
प्रभा पताकिनी पीता पन्नगाधिपशेखरा ॥ ९

पताका पद्मकटिनी पतिमान्यपराक्रमा ।
पदाम्बुजधरा पुष्टिः परमागमबोधिनी ॥ १०

परमात्मा परानन्दा परमा पात्रपोषिणी ।
पञ्चबाणगतिः पौत्री पाषण्डघ्नी पितामही ॥ ११

प्रहेलिकापि प्रत्यञ्चा पृथुपापौघनाशिनी ।
पूर्णचन्द्रमुखी पुण्या पुलोमा पूर्णिमा तथा ॥ १२

पावनी परमानन्दा पण्डिता पण्डितेडिता ! ।
प्रांशुलभ्या प्रमेया च प्रभा प्राकारवर्तिनी ॥ १३

प्रधाना प्रार्थिता प्रार्थ्या पददा पङ्क्तिवर्जिनी ।
पातालस्येश्वरप्राणप्रेयसी प्रणमामि ताम् ॥

इति पद्मावतीशतम् । १४

महाज्योतिर्मती माता महामाया महासती ।
महादीप्तिमती मित्रा महाचण्डी च मङ्गला ॥ १

महिषी मानुषी मेघा महालक्ष्मीर्मनोहरा ।
महाप्रहारनिम्नाङ्गा मानिनी मानशालिनी ॥ २

मार्गदात्री मुर्हूर्ता च माध्वी मधुमती मही ।
महेश्वरी महेज्या च मुक्ताहारविभूषणा ॥ ३

महामुद्रा मनोज्ञा च महाश्वेतातिमोहिनी ।
मधुप्रिया मतिर्माया मोहघ्नी च मनस्विनी ॥ ४

माहिष्मती महावेगा मानदा मानहारिणी ।
महाप्रभा च मदना मन्त्रवश्या मुनिप्रिया ॥ ५

मन्त्ररूपा च मन्त्रज्ञा मन्त्रदा मन्त्रसागरा ।
मधुप्रिया महाकाया महाशीला महाभुजा ॥ ६

महासना महारम्या मनोभेदा महासमा ।
महाकान्तिधरा मुक्तिर्महाव्रतसहायिनी ॥ ७

मधुश्रवा मूर्छना च मृगाक्षी च मृगावती ।
मृणालिनी मनः पुष्टिर्महाशक्तिर्महार्थदा ॥ ८

मूलाधारा मृडानी च मत्तमातङ्गगामिनी ।
मन्दाकिनी महाविद्या मर्यादा मेघमालिनी ॥ ९

मातामही मन्दगतिः महाकेशी महीधरा ।
महोत्साहा महादेवी महिला मानवर्द्धिनी ॥ १०

महाग्रहहरा मारी मोक्षमार्गप्रकाशिनी ।
मान्या मानवती मानी मणिनूपुरशेखरा (शोभिनी) ॥ ११

मणिकाञ्चीधरा माना महामतिप्रकाशिनी ।
ईडेश्वरी दिज्येच्छेखे खेन्द्राणी कालरूपिणी ॥ १२

इति महाज्योतिर्मतीशतम् ।

जिनमाता जिनेन्द्रा च जयन्ती जगदीश्वरी ।
जया जयवती जाया जननी जनपालिनी ॥ १

जगन्माता जगन्माया जगज्जैत्री जगज्जिता ।
जगरा जर्जरा जैत्री यमुनाजलभासिनी ॥ २

योगिनी योगमूला च जगद्धात्री जलन्धरा ।
योगपट्टधरा ज्वाला ज्योतीरूपा च जालिनी ॥ ३

ज्वालामुखी ज्वालमाला ज्वलिनी च जगद्धिता ।
जैनेश्वरी जिनाधारा जीवनी यशपालिनी ॥ ४

यशोदा ज्यायसी जीर्णा जर्जरा ज्वरनाशिनी ।
ज्वररूपा जरा जीर्णा जाङ्गुलाऽऽमयतर्जिनी ॥ ५

युगभारा जगन्मित्रा यन्त्रिणी जन्मभूषिणी ।
योगेश्वरी च योगाङ्गा योगयुक्ता युगादिजा ॥ ६

यथार्थवादिनी जाम्बूनदकान्तिधरा जया ।
नारायणी नर्मदा च निमेषा नर्त्तिनी नरी ॥ ७

नीलानन्ता निराकारा निराधारा निराश्रया ।
नृपवश्या निरामान्या निःसङ्गा नृपनन्दिनी ॥ ८

नृपधर्ममयी नीतिः तोतला नरपालिनी ।
नन्दा नन्दिवती निष्ठा नीरदा नागवल्लभा ॥ ९

नृत्यप्रिया नन्दिनी च नित्या नेका निरामिषा ।
नागपाशधरा नौका निष्कलङ्का निरागसा ॥ १०

नागवल्ली नागकन्या नागिनी नागकुण्डली ।
निद्रा च नागदमनी नेत्रा नाराचवर्षिणी ॥ ११

निर्विकारा च निर्वैरा नागनाथेशवल्लभा ।
निर्लोभा च नमस्तुभ्यं नित्यानन्दविधायिनी ॥ १२

इति जिनमाताशतम् ।

वज्रहस्ता च वरदा वज्रशीला वरूथिनी ।
वज्रा वज्रायुधा वाणी विजया विश्वव्यापिनी ॥ १

वसुदा वलदा वीरा विषया विषवर्द्धिनी ।
वसुन्धरा वरा विश्वा वर्णिनी वायुगामिनी ॥ २

बहुवर्णा बीजवती विद्या बुद्धिमती विभा ।
वेद्या वामवती वामा विनिद्रा वंशभूषणा ॥ ३

वरारोहा विशोका च वेदरूपा विभूषणा ।
विशाला वारुणीकल्पा बालिका बालकप्रिया ॥ ४

वर्तिनी विषहा बाला विविक्ता वनवासिनी ।
वन्द्या विधिसुता वाला विश्वयोनिर्बुधप्रिया ॥ ५

बलदा वीरमाता च वस्तुदा वीरनन्दिनी ।
वरायुधधरा वेषी वारिदा बलशालिनी ॥ ६

बुधमाता वैद्यमाता बन्धुरा बन्धुरूपिणी ।
विद्यावती विशालाक्षी वेदमाता विभास्वरी ॥ ७

वात्याली विषमा वेषा वेदवेदाङ्गधारिणी ।
वेदमार्गरता व्यक्ता विलोमा वेदशालिनी ॥ ८

विश्वमाता विकम्पा च वंशजा विश्वदीपिका ।
वसन्तरूपिणी वर्षा विमला विविधायुधा ॥ ९

विज्ञानिनी पवित्रा च विपञ्चो बन्धमोक्षिणी ।
विषरूपवती वर्द्धा विनीता विशिखा विभा ॥ १०

व्यालिनी व्याललीला च व्याप्ता व्याधिविनाशिनी ।
विमोहा बाणसन्दोहा वर्द्धिनी वर्द्धमानका ॥ ११

ईशानी तोतरा भिद्रा वरदायी नमोऽस्तु ते ।
व्यालेश्वरी प्रियप्राणा प्रेयसी वसुदायिनी ॥ १२

इति वज्रहस्ताशतम् ।

कामदा कमला काम्या कामाङ्गा कामसाधिनी ।
कलावती कलापूर्णा कलाधारा कनीयसी ॥ १

कामिनी कमनीयाङ्गा क्वणत्काञ्चनसन्निभा ।
कात्यायनी कान्तिदा च कमला कामरूपिणी ॥ २

कामिनी कमलामोदा कम्रा कान्तिकरी प्रिया ।
कायस्था कालिका काली कुमारी कालरूपिणी ॥ ३

कालाकारा कामधेनुः काशी कमललोचना ।
कुन्तला कनकाभा च काश्मीरा कुङ्कुमप्रिया ॥ ४

कृपावती कुण्डलिनी कुण्डलाकारशायिनी ।
कर्कशा कोमला काली कौलिली कुलबालिका ॥ ५

कालचक्रधरा कल्पा कालिका काव्यकारिका ।
कविप्रिया च कौशाम्बी कारिणी कोशवर्द्धिनी ॥ ६

कुशावती किरालाभा कोशस्था कान्तिवर्द्धिनी ।
कादम्बरी कठोरस्था कौशाम्बा कोशवासिनी ॥ ७

कालघ्नी कालहननी कुमारजननी कृतिः ।
कैवल्यदायिनी केका कर्महा कालवर्जिनी ॥ ८

कलङ्करहिता कन्या करुणालयवासिनी ।
कर्पूरामोदिनिःश्वासा कामबीजवती करा ॥ ९

कुलीना कुन्दपुष्पाभा कुर्कुटोरगवाहिनी ।
कलिप्रिया कामबाणा कमठोपरिशायिनी ॥ १०

कठोरा कठिना क्रूरा कन्दला कदलीप्रिया ।
क्रोधिनी क्रोधरूपा च चक्रहूङ्कारवर्तिनी ॥ ११

कम्बोजिनी काण्डरूपा कोदण्डकरधारिणी ।
कुहू क्रीडवती क्रीडा कुमारानन्ददायिनी ॥ १२

कमलासना केतकी च केतुरूपा कुतूहला ।
कोपिनी कोपरूपा च कुसुमावासवासिनी ॥ १३

इति कामदाशतम् ।

सरस्वती शरण्या च सहस्राक्षी सरोजगा ।
शिवा सती सुधारूपा शिवमाया सुता शुभा ॥ १

सुमेघा सुमुखी शान्ता सावित्री सायगामिनी ।
सुरोत्तमा सुवर्णा च श्रीरूपा शास्त्रशालिनी ॥ २

शान्ता सुलोचना साध्वी सिद्धा साध्या सुधात्मिका ।
सारदा सरला सारा सुवेषा जशवर्द्धिनी ॥ ३

शङ्करी शमिता शुद्धा शक्रमान्या शुभङ्करी ।
शुद्धाहाररता श्यामा शीमा शीलवती शरा ॥ ४

शीतला सुभगा सर्वा सुकेशी शैलवासिनी ।
शालिनी साक्षिणी सीता सुभिक्षा शिवप्रेयसी ॥ ५

सुवर्णा शोणवर्णा च सुन्दरी सुरसुन्दरी ।
शक्तिस्तुषा सारिका च सेव्या श्रीः सुजनार्चिता ॥ ६

शिवदूती श्वेतवर्णा शुभ्राभा शुभनाशिकी ।
सिंहिका सकला शोभा स्वामिनी शिवपोषिणी ॥ ७

श्रेयस्करी श्रेयसी च शौरिः सौदामनी शुचिः ।
सौभागिनी शोषणी च सुगन्धा सुमनःप्रिया ॥ ८

सौरभेयी सुसुरभी श्वेतातपत्रधारिणी ।
शृङ्गारिणी सत्यवक्ता सिद्धार्था शीलभूषणा ॥ ९

सत्यार्थिनी च सन्ध्याभा सची सङ्क्रान्तिसिद्धिदा ।
संहारकारिणी सिंही सप्तर्चिः सफलार्थदा ॥ १०

सत्या सिन्दूरवर्णाभा सिन्दूरतिलकप्रिया ।
सारङ्गा सुतरा तुभ्यं ते नभोऽस्तु सुयोगिनी ॥ ११

इति श्रीसरस्वतीशतम् ।

भवनेश्वरी भूषणा च भुवना भूमिपप्रिया ।
भूमिगर्भा भूपवन्द्या भुजङ्गेशप्रिया भगा ॥ १

भुजङ्गभूषणाभोगा भुजङ्गाकारशायिनी ।
भवभीतिहरा भीमा भूमिर्भीमाट्टहासिनी ॥ २

भारती भवती भोगा भगिनी भोगमन्दिरा ।
भद्रिका भद्ररूपा च भूतात्मा भूतभञ्जिनी ॥ ३

भवानी भैरवी भीमा भामिनी भ्रमनाशिनी ।
भुजङ्गिनी भ्रुसुण्डी च भेदिनी भूमिभूषणा ॥ ४

भिन्ना भाग्यवती भासा भोगिनी भोगवल्लभा ।
भुक्तिदा भक्तिग्राह्या च भवसागरतारणी ॥ ५

भास्वती भास्वरा भूतिर्भूतिदा भूतिवर्द्धिनी ।
भाग्यदा भोग्यदा भोग्या भाविनी भवनाशिनी ॥ ६

भीक्ष्णा भट्टारका भीरुर्भ्रामरी भ्रमरी भवा ।
भट्टिनी भाण्डदा भाण्डा भल्लाकी भूरिभञ्जिनी ॥ ७

भूमिगा भूमिदा भाषा भक्षिणी भृगुभञ्जिनी ।
भाराक्रान्ताभिनन्दा च भजिनी भूमिपालिनी ॥ ८

भद्रा भगवती भर्गा वत्सला भगशालिनी ।
खेचरी खड्गहस्ता च खण्डिनी खलमर्दिनी ॥ ९

खट्वाङ्गधारिणी खड्वा खडङ्गा खगवाहिनी ।
षट्चक्रभेदविख्याता खगपूज्या खगेश्वरी ॥ १०

लाङ्गली ललना लेखा लेखिनी ललना लता ।
लक्ष्मीर्लक्ष्मवती लक्ष्या लाभदा लोभवर्जिता ॥ ११

इति भवनेश्वरीशतम् ।

लीलावती ललामाभा लोहमुद्रा लिपिप्रिया ।
लोकेश्वरी च लोकाङ्गा लब्धिर्लोकान्तपालिनी ॥ १

लीला लीलाङ्गदा लोला लावण्या ललितार्थिनी ।
लोभहा लम्बनिर्लङ्का लक्षणा लक्ष्यवर्जिता ॥ २

उमोर्वसी उदीची च उद्योतोद्द्योतकारिणी ।
उद्धारण्या धरोदक्यो दिव्योदकनिवासिनी ॥ ३

उदाहारोत्तमातंसा औषध्युदधितारणी ।
उत्तरोत्तरवादिभ्यो धराधरनिवासिनी ॥ ४

उत्कीलिन्युत्कीलिनी च उत्कीर्णौंकाररूपिणी ।
ॐकाराकाररूपा च अम्बिकाऽम्बरचारिणी ॥ ५

आमोघा सा पुरी चान्ताऽणिमादिगुणसंयुता ।
अनादिनिधनाऽनन्ता चातुलाटाऽट्टहासिनी ॥ ६

अपर्णार्धबिन्दुधरा लोकालल्यालिवाङ्गना ।
आनन्दानन्ददा लोका राष्ट्रसिद्धिप्रदानका ॥ ७

अव्यक्तास्त्रमयी मूर्त्तिरजीर्णा जीर्णहारिणी ।
अहिकृत्य रजाजारा हुङ्काररातिरन्तिदा ॥ ८

अनुरूपाथ मूर्तिघ्नी क्रीडा कैरवपालिनी ।
अनोकहाशुगा भेद्या छेद्या चाकाशगामिनी ॥ ९

अनन्तरा साधिकारा त्वाङ्गा अन्तरनाशिनी ।
अलका यवना लङ्घ्या सीता शिखरधारिणी ॥ १०

अहिनाथप्रियप्राणा नमस्तुभ्यं महेश्वरी ।
आकर्षण्याधरा रागा मन्दा मोदावधारिणी ॥ ११

इति लीलावतीशतम् ।

त्रिनेत्रा त्र्यम्बिका तन्त्री त्रिपुरा त्रिपुरभैरवी ।
त्रिपुष्टा त्रिफणा तारा तोतला त्वरिता तुला ॥ १

तपप्रिया तापसी च तपोनिष्ठा तपस्विनी ।
त्रैलोक्यदीपका त्रेधा त्रिसन्ध्या त्रिपदाश्रया ॥ २

त्रिरूपा त्रिपदा त्राणा तारा त्रिपुरसुन्दरी ।
त्रिलोचना त्रिपथगा तारा मानविमर्दिनी ॥ ३

धर्मप्रिया धर्मदा च धर्मिणी धर्मपालिनी ।
धाराधरधराधारा धात्री धर्माङ्गपालिनी ॥ ४

धौता धृतिधुरा धीरा धुनुनी च धनुर्धरा ।
ब्रह्माणी ब्रह्मगोत्रा च ब्राह्मणी ब्रह्मपालिनी ॥ ५

गङ्गा गोदावरी गौगा गायत्री गणपालिनी ।
गोचरी गोमती गुर्वाऽगाधा गान्धारिणी गुहा ॥ ६

ब्राह्मी विद्युत्प्रभा वीरा वीणावासवपूजिता ।
गीतप्रिया गर्भधरा गायिनी गजगामिनी ॥ ७

गरीयसी गुणोपेता गरिष्ठा गरमर्दिनी ।
गम्भीरा गुरुरूपा च गीता गर्वापहारिणी ॥ ८

ग्रहिणी ग्राहिणी गौरी गन्धारी गन्धवासना ।
गारुडी ग्रसिनी गूढा गौहनी गुणहायनी ॥ ९

चक्रमध्या चक्रधरा चित्रणी चित्ररूपिणी ।
चर्चरी चतुरा चित्रा चित्रमाया चतुर्भुजा ॥ १०

चन्द्राभा चन्द्रवर्णा च चक्रिणी चक्रधारिणी ।
चक्रायुधा करधरा चण्डी चण्डपराक्रमा ॥ ११

इति त्रिनेत्राशतम् ।

चक्रेश्वरी चमूश्चिन्ता चापिनी चञ्चलात्मिका ।
चन्द्रलेखा चन्द्रभागा चन्द्रिका चन्द्रमण्डला ॥ १

चन्द्रकान्तिश्चन्द्रमश्रीश्चन्द्रमण्डलवर्तिनी ।
चतुःसमुद्रपारान्ता चतुराश्रमवासिनी ॥ २

चतुर्मुखी चन्द्रमुखी चतुर्वर्णफलप्रदा ।
चित्स्वरूपा चिदानन्दा चिराश्चिन्तामणिः पिता ॥ ३

चन्द्रहासा च चामुण्डा चिन्तना चौरवर्जिनी ।
चैत्यप्रिया चैत्यलीला चिन्तितार्थफलप्रदा ॥ ४

ह्रींरूपा हंसगमनी हाकिनी हिङ्गुलाहिना ।
हालाहलधरा हारा हंसवर्णा च हर्षदा ॥ ५

हिमानी हरिता हीरा हर्षिणी हरिमर्दिनी ।
गोपिनी गौरगीता च दुर्गा दुर्ललिता धरा ॥ ६

दामिनी दीर्घिका दुग्धा दुर्गमा दुर्लभोदया ।
द्वारिका दक्षिणा दीक्षा दक्षा दक्षातिपूजिता ॥ ७

दमयन्ती दानवती द्युतिदीप्ता दिवागतिः ।
दरिद्रहा वैरिदूरा दारा दुर्गतिनाशिनी ॥ ८

दर्पहा दैत्यदासा च दर्शिनी दर्शनप्रिया ।
वृषप्रिया च वृषभा वृषारूढा प्रबोधिनी ॥ ९

सूक्ष्मा सूक्ष्मगतिः श्लक्ष्णा घनमाला घनद्युतिः ।
छाया छात्रच्छविच्छिरक्षीरदा क्षेत्ररक्षिणी ॥ १०

अमरी रतिरात्रिश्च रङ्गिनी रतिदा रुषा ।
स्थूला स्थूलतरा स्थूला स्थण्डिलाशयवासिनी ॥ ११

स्थिरा स्थानवती देवी घनघोरनिनादिनी ।
क्षेमङ्करी क्षेमवती क्षेमदा क्षेमवर्द्धिनी ॥ १२

शेलूषरूपिणी शिष्टा संसारार्णवतारिणी ।
सदा सहायिनी तुभ्यं नमस्तुभ्यं महेश्वरी ॥ १३

इति चक्रेश्वरीशतम् ।

नित्यं पुमान् पठति यो नितरां त्रिशुद्ध्या
शौचं विधाय विमलं फणिशेखरायाः ।
स्तोत्रं द्युनाथ उदिते सुसहस्रनाम
चाष्टोत्तरं भवति सो भुवनाधिराजः ॥ (वसन्ततिलका) १

तत्कालजातवरगोमयलिप्तभूमौ
कुर्याद् दृढासनमतीन्द्रियपद्मकाख्यम् ।
धूपं विधाय वरगुग्गुलुमाज्ययुक्तं
रक्ताम्बरं वपुषि भूष्य मनः प्रशस्तः ॥ (वसन्ततिलका) २

न तस्य रात्रौ भयमस्ति किञ्चिन्न शोकरोगोद्भवदुःखजालम् ।
न राजपीडा न च दुर्जनस्य पद्मावतीस्तोत्र निशम्यतां वै ॥ ३

न बन्धनं तस्य न वह्निजातं भयं न चोरैर्नृपतोऽपि किञ्चित् ।
न मत्तनागस्य न केशरीभयं यो नित्यपाठी स्तवनस्य पद्मे ! ॥४

न सङ्गरे शस्त्रचयाभिघातः
न व्याघ्रभीतिर्भुवि भीतिभीतिः ।
पिशाचिनीनां न च डाकिनीनां
स्तोत्रं रमायाः पठतीति यो वै ॥ (उपजाति) ५

न राक्षसानां न च शाकिनीनां
न चापदा नैव दरिद्रता च ।
न चास्य मृत्योर्भयमस्ति किञ्चित्
पद्मावतीस्तोत्र निशम्यतां वै ॥ (उपजाति) ६

स्नानं विधाय विधिवद् भुवि पार्श्वभर्तुः
पूजां करोति शुचिद्रव्यचयैर्विधिज्ञः ।
पद्मावती फलति तस्य मनोऽभिलाषं
नानाविधं भवभवं सुखसारभूतम् ॥ (वसन्ततिलका) ७

सुपूर्वाह्णमध्याह्नसन्ध्यासु पाठं
तथैवावकाशं भवेदेकचित्तः ।
भवेत्तस्य लाभार्थ आदित्यवारे
करोतीह भक्तिं सदा पार्श्वभर्तुः ॥ (भुजङ्गप्रयात) ८

शुभापत्यलक्ष्मीर्नु वाजीन्द्रयूथा
गृहे तस्य नित्यं सदा सञ्चरन्ति ।
नवीनाङ्गनानां गणास्तस्य नित्यं
शिवायाः सुनामावलि यस्य चित्ते ॥ (भुजङ्गप्रयात) ९

ममाल्पबुद्ध्या स्तवनं विधाय करोमि भक्तिं फणिशेखरायाः ।
यदर्थमन्त्राक्षरव्यञ्जनच्युतं,
विशोधनीयं कृपया हि सद्भिः ॥ (उपजाति) १०

भो देवि ! भो मात ! ममापराधं, सङ्क्षम्यतां तत्स्तवनाभिधाने।
माता यथापत्यकृतापराधं
सङ्क्षम्यति प्रीत्यपलायनैक्यम् ॥ (इन्द्रवज्रा) ११

(१) ॐ ह्रीँ श्रीँ क्लीँ ब्लौँ कलिकुण्डस्वामिन् ! सिद्धिश्रियं जगद् वश्यमानय आनय स्वाहा ॥
(२) ॐ ह्रीँ ऐँ श्रीँ श्रीगौतमगणराजाय स्वाहा ॥
(३)ॐ नमो चालिदेवि ! पद्मावति ! आकृष्टिकरणि ! कामचारि, मोहचारि, अबोलु बौलावि, अदयनुं दिवारि, आणि पासि घालि दासु ॐ फट् स्वाहा ॥
(४)ॐ आँ एँ क्रौँ ह्रीँ हंसरूपे ! सर्ववश्ये ! श्रीँ सोहं पद्मावत्यै ह्रीँ नमः ॥

पू.आ.श्री जिनसेनसूरिविरचितम्

## १५. ॥ श्री सूर्यसहस्त्रनामस्तोत्रम् ॥

प्रसिद्धाष्टसहस्त्रे द्वे, लक्षणाङ्गं गिरांपतिम् ।
नाम्नामष्टसहस्त्रेणाभिष्टुमोऽभीष्टसिद्धये ॥ १

श्रीमान् स्वयंभूर्वृषभः, शम्भवः शम्भूरात्मभूः ।
स्वयंप्रभः प्रभुर्भोक्ता, विश्वभूरपुनर्भवः ॥ २

विश्वात्मा विश्वलोकेशो, विश्वतश्चक्षुरक्षरः ।
विश्वविद् विश्वविद्येशो विश्वयोनिरनश्वरः ॥ ३

विश्वदृश्वा विभुर्ध्याता, विश्वेशो विश्वलोचनः ।
विश्वव्यापी विधुर्वेधा शाश्वतो विश्वतोमुखः ॥ ४

विश्वकर्ता जगज्ज्येष्ठो, विश्वमूर्तिर्जिनेश्वरः ।
विश्वदृग् विश्वभूतेशो, विश्वज्योतिरनीश्वरः ॥ ५

जिनो जिष्णुर... विष्णुरीशो जगत्पतिः ।
अनन्तजिदचिन्त्यात्मा, भव्यबन्धुरबन्धनः ॥ ६

युगादिपुरुषो ब्रह्मा पञ्चब्रह्ममयः शिवः ।
परापरतरः सूक्ष्मः, परमेष्ठी सनातनः ॥ ७

स्वयंज्योतिरजोऽजन्मा, ब्रह्मयोनिरयोनिजः ।
मोहारिविजयी जेता, धर्मचक्री दयाध्वजः ॥ ८

प्रशान्तारिरनन्तात्मा, योगी योगेश्वरार्चितः ।
ब्रह्मविद् ब्रह्मतत्त्वज्ञो, ब्रह्मेशो विद्युतीश्वरः ॥ ९

शुद्धो बुद्धः प्रबुद्धात्मा, सिद्धार्थः सिद्धशासनः ।
सिद्धान्तविदुरध्येयो सिद्धसाध्यो जगद्धितः ॥ १०

सहिष्णुरच्युतोऽनन्तप्रभो विष्णुर्भवोद्भवः ।
प्रभूष्णुरजरोऽजय्यो, भ्राजिष्णुर्धीश्वरोऽव्ययः ॥ ११

विभावसुरसम्भूष्णुः, स्वयंभूष्णुः पुरातनः ।
परमात्मा परंज्योतिस्त्रिजगत्परमेश्वरः ॥ १२

दिव्यभाषापतिर्दिव्यः पूतवाक् पूतशासनः ।
पूतात्मा परमज्योतिर्धर्माध्यक्षो दमीश्वरः ॥ १३

श्रीपतिर्भगवानर्हन्नरुजो विरजाः शुचिः ।
तीर्थकृत् केवलीशानः, पूजार्हः स्नातकोऽमलः ॥ १४

अनन्तदीप्तिर्ज्ञानात्मा, स्वयंबुद्धः प्रजापतिः ।
मुक्तः शक्तो निराबाधो, निःकलो भुवनेश्वरः ॥ १५

निरञ्जनो जगज्ज्योतिर्निरुक्तोक्तिर्निरामयः ।
अचलस्थितिरक्षोभ्यः, कूटस्थः स्थाणुरक्षयः ॥ १६

अग्रणीर्ग्रामणीर्नेता, प्रणेता न्यायशास्त्रकृत् ।
शास्ता धर्मपतिर्धर्म्यो, धर्मात्मा धर्मतीर्थकृत् ॥ १७

वृषध्वजो वृषाधीशो, वृषकेतुर्वृषायुषः ।
वृषो वृषपतिर्भर्ता, वृषभाङ्को वृषोद्भवः ॥ १८

हिरण्यनाभिर्भूतात्मा, भूतभृद् भूतभावनः ।
प्रभवो विभवो भास्वान्, भवो भव्यो भवान्तकः ॥ १९

हिरण्यगर्भः श्रीगर्भः प्रभूतविभवो भवः ।
स्वयंप्रभुः प्रभूतात्मा, भूतनाथो जगत्प्रभुः ॥ २०

सर्वादिः सर्वदृक् सार्वः, सर्वज्ञः सर्वदर्शनः ।
सर्वात्मा सर्वलोकेशः, सर्ववित् सर्वलोकजित् ॥ २१

सुगतिः सुश्रुतः संश्रुत्, सुवाक् सूरिर्बहुश्रुतः ।
विश्रुतो विश्वतः पादो, विश्वतूर्ण्यः सुविश्रवाः ॥ २२

सहस्रशीर्षः क्षेत्रज्ञः सहस्राक्षः सहस्रपात् ।
भूतभव्यभवद्भर्ता, विश्वविद्यो महेश्वरः ॥ २३

स्थविष्ठः स्थविरो ज्येष्ठ, प्रष्ट, श्रेष्ठो वरिष्ठधीः ।
स्थेष्ठो गरिष्ठो वन्दिष्ठः, श्रेष्ठो निष्ठो गरिष्ठगीः ॥ २४

विश्वभूद् विश्वसृड् विश्वेड्, विश्वभूग् विश्वनायकः ।
विश्वाशीर्विश्वात्मा विश्वजिद् विजितातङ्कः ॥ २५

विभवो विभथो वीरो, विशोको विजरो जरन् ।
विरागो विरतोऽसङ्गो, विवक्तो वीतमच्छरः ॥ २६

विनेयजनताबन्धुर्विलीनाशेषकल्मषः ।
वियोगे योगविद् विद्वान्, विधाता सुविधिः सुधीः ॥ २७

क्षान्तिभाक् पृथिवीमूर्तिः, शान्तिभाक् सलिलात्मकः ।
वायुमूर्तिरसङ्गात्मा, वह्निमूर्तिरधर्मधक् ॥ २८

सुयज्वा यजमानात्मा, सुत्त्वा सुत्रामपूजितः ।
ऋत्विग् यज्ञपतिर्यज्वा, यज्ञाङ्गममृतं हविः ॥ २९

व्योममूर्तिरमूर्तात्मा निर्लेपो निर्मलोऽचलः ।
सोममूर्तिः सुसौम्यात्मा सूर्यमूर्तिर्महाप्रभुः ॥ ३०

मन्त्रविन्मन्त्रकृन्मन्त्री मन्त्रमूर्तिरनन्तकः ।
स्वतन्त्रस्तन्त्रकृत् स्वान्तः कृतान्तः कृततान्तकृत् ॥ ३१

कृती कृतार्थः सत्कृत्यः कृतकृत्यः कृतक्रतुः ।
नित्यो मृत्युञ्जयोऽमृत्युरमृतात्माऽमृतोद्भवः ॥ ३२

ब्रह्मा निष्ठः परंब्रह्म, ब्रह्मात्मा ब्रह्मसम्भवः ।
महाब्रह्मपतिर्ब्रह्मेड् महाब्रह्मपदेश्वरः ॥ ३३

सुप्रसन्नः प्रसन्नात्मा ज्ञानधर्मदमप्रभुः ।
प्रशमात्मा प्रशान्तात्मा पुराणः पुरुषोत्तमः ॥ ३४

महाऽशोकध्वजोऽशोकः कुस्त्रष्टा पद्मविष्टरः ।
पद्मेशः पद्मसम्भूतिः, पद्मनाभिरनुत्तरः ॥ ३५

पद्मयोनिर्जगद्योनिरिभ्यस्तुत्यस्तुतीश्वरः ।
स्तवनार्हो हृषीकेशो, जितजेयः कृतक्रियः ॥ ३६

गणाधिपो गणज्येष्ठो, गण्यः पुण्यो गणाग्रणीः ।
गुणाकरो गुणाम्भोधिर्गुणज्ञो गुणनायकः ॥ ३७

अगण्यः पुण्यधीर्गुण्यः, पुण्यकृत् पुण्यशासनः ।
धर्मारामो गुणग्रामः पुण्यापुण्यनिरोधकः ॥ ३८

पापापेतो विपापात्मा, पापात्मा वीतकल्मषः ।
निर्बन्धो निर्मदः सान्तो, निर्मोहो निरुपद्रवः ॥ ३९

निर्निमेषो निराहारो, निःक्रियो निरुपप्लवः ।
निःकलङ्को निरास्तेनो, निर्द्धूतागा निराश्रयः ॥ ४०

विशालो विपुलज्योतिरतुलोऽचिन्त्यवैभवः ।
सुवृतः सुगुप्तात्मा, सुभुक् सुनयतत्ववित् ॥ ४१

एकविद्यो महाविद्यो, मुनिः परिवृढः पतिः ।
धीशो विद्यानिधिः साक्षी, विनेताविहतान्तकः ॥ ४२

पिता पितामहः पाता, पवित्रः पावनो गतिः ।
त्राता भिषक्वरो वर्यो, वरदः परमः पुमान् ॥ ४३

कविः पुराणपुरुषो, वर्षीयान् वृषभः परः ।
प्रतिष्ठाप्रसवो हेतुर्भुवनैकपितामहः ॥ ४४

श्रीवृक्षलक्षणः श्लक्ष्णो, लक्षण्यः शुभलक्षणः ।
निरक्षः पुण्डरीकाक्षः पुष्कलः पुष्कलेक्षणः ॥ ४५

सिद्धिदः सिद्धिसङ्कल्पः सिद्धात्मा सिद्धसाधनः ।
बुद्धबोध्यो महाबोधिर्वर्धमानो महर्द्धिकः ॥ ४६

वेदाङ्गो वेदविद् वेद्यो, जागरूको विदांवरः ।
वेदवेद्यः स्वसंवेद्यौ वेद्यो वदतांवरः ॥ ४७

अनादिनिधनोऽव्यक्तो, व्यक्तवाग् व्यक्तशासनः ।
युगादिकृत् युगाधारो, युगादिर्जगदादिजः ॥ ४८

अतीन्द्रोऽतीन्द्रियो धीन्द्रो, महेन्द्रोऽतीन्द्रियार्थदृक् ।
अनिन्द्रियोऽहमिन्द्राच्र्यो, महेन्द्रमहितो महान् ॥ ४९

उद्भवः कारणं कर्ता, पारगो भवतारकः ।
अगाह्यो गहनगुह्यं परार्घ्यः परमेश्वरः ॥ ५०

अनन्तर्द्धिरमेयर्द्धिरचिन्त्यर्द्धिः समग्रधीः ।
प्राज्ञः प्राज्ञहरोऽभ्यग्रहः प्रत्यग्रोऽग्र्योऽग्रिमोऽग्रजः ॥ ५१

महातपा महातेजा महोदर्को महोदयः ।
महायशा महाधीमान्, महासत्त्वो महाद्युतिः ॥ ५२

महामतिर्महानीतिर्महाक्षान्तिर्महाकृतिः ।
महाप्रज्ञो महाभागो, महानन्दो महाकविः ॥ ५३

महामहो महाकीर्तिर्महाकान्तिर्महावपुः ।
महादानो महाज्ञानो, महायोगो महागुणः ॥ ५४

महामहःपतिः प्राप्तमहाकल्याणपञ्चकः ।
महाप्रभुर्महाप्रातिहार्याधीशो महेश्वरः ॥ ५५

महामुनिर्महामौनी, महाध्यानी महादमः ।
महाक्षामा महाशीलो, महायज्ञो महामखः ॥ ५६

महाव्रतपतिर्मह्यो, महाकान्तिधरोऽधिपः ।
महामैत्रीमयोऽमेयो, महोपायो महोमयः ॥ ५७

महाकारुण्यको मन्ता महामन्त्रो महायतिः ।
महानादो महाघोषो, महेद्यो महसांपतिः ॥ ५८

महाध्वरधरो धुर्यो, महौदार्यो महिष्टवाक् ।
महात्मा महसांधाम, महर्षिर्महितोदयः ॥ ५९

महाक्लेशाङ्कुशः शूरो, महाभूतपतिर्गुरुः ।
महापराक्रमोऽनन्तो, महाक्रोधरिपुर्वशी ॥ ६०

महाभवाब्धिसंसारो, महामोहाद्रिसूदनः ।
महागुणाकरः क्षान्तो, महायोगीश्वरः शमी ॥ ६१

महाध्यानपतिर्ध्याता, महाधर्मा महाव्रतः ।
महाकर्मारिहाऽऽत्मज्ञो महादेवो महेशिता ॥ ६२

सर्वक्लेशापहः साधुः सर्वदोषहरो हरः ।
असङ्ख्येयोऽप्रमेयात्मा, शमात्मा प्रशमाकरः ॥ ६३

सर्वयोगीश्वरोऽचिन्त्यः, श्रुतात्मा विष्टरश्रवाः ।
दान्तात्मा दमतीर्थेशो, योगात्मा ज्ञानसर्वगः ॥ ६४

प्रधानमात्मा प्रकृतिः, परमः परमोदयः ।
प्रक्षीणबन्धकर्मारि, क्रोधकृत् क्षेमशासनः ॥ ६५

प्रणवः प्रणयः प्राणः, प्राणदः प्राणतेश्वरः ।
प्रमाणप्रणिधिर्दक्षो दक्षिणो ध्वर्युरध्वरः ॥ ६६

आनन्दो नन्दनो नन्दो, वन्द्योऽनिन्द्योऽभिनन्दनः ।
कामहा कामदः काम्यः, कामधेनुररिञ्जयः ॥ ६७

असंस्कृतसुसंस्कारो प्राकृतो वै कृतान्तकृत् ।
अन्तकृत् कान्तगुः कान्तश्चिन्तामणिरभीष्टदः ॥ ६८

अजितो जितकामारिरमितोऽमितशासनः ।
जितक्रोधो जितामित्रो, जितक्लेशो जितान्तकः ॥ ६९

जिनेन्द्रः परमानन्दो, मुनीन्द्रो दुन्दुभिस्वनः ।
महेन्द्रवन्द्यो योगीन्द्रो, यतीन्द्रो नाभिनन्दनः ॥ ७०

नाभेयो नाभिजो जातः, सुव्रतो मनुरुत्तमः ।
अभेद्योऽनत्ययो नाश्वानधिकोऽधिगुरुः सुधीः ॥ ७१

सुमेधा विक्रमी स्वामी, दुराधर्षो निरुत्सकः ।
विशिष्टोऽशिष्टभुक् शिष्टः, प्रत्ययः कमनोऽनघः ॥ ७२

क्षेमी क्षेमङ्करोऽक्षय्यः, क्षेमधर्मपतिः क्षमी ।
अग्राह्यो ज्ञाननिग्राह्यो ज्ञानगम्यो निरुत्तारः ॥ ७३

सुकृती धातुरिज्यार्हः सुनयश्चतुराननः ।
श्रीनिवासश्चतुर्वक्त्रश्चतुरास्यश्चतुर्मुखः ॥ ७४

सत्यात्मा सत्यविज्ञानः सत्यवाक् सत्यशासनः ।
सत्याशीः सत्यसन्धानः, सत्यः सत्यपरायणः ॥ ७५

स्थेयान् स्थवीयान् नेदीयान्, दवीयान् दूरदर्शनः ।
अणोरणीयाननणुर्गुरुराद्यो गरीयसाम् ॥ ७६

सदायोगः सदाभोगः सदाश्रेष्ठः सदाशिवः ।
सदागतिः सदासौख्यः, सदाविद्यः सदोदयः ॥ ७७

सुघोषः सुमुखः सौम्यः, सुखदः सुहितः सुहृत् ।
सुगुप्तो गुप्तिभृद् गोप्ता लोकाध्यक्षो दमेश्वरः ॥ ७८

बृहन् बृहस्पतिर्वाग्मी, वाचस्पतिरुदारधीः ।
मनीषी धिषणो धीमान्, समुखीशो गिरांपतिः ॥ ७९

नैकरूपो नयोत्तुङ्गो, नैकात्मा नैकधर्मकृत् ।
अविज्ञेयो प्रतर्कात्मा, कृतज्ञः कृतलक्षणः ॥ ८०

ज्ञानगर्भोदयागर्भो, रत्नगर्भः प्रभास्वरः ।
पद्मगर्भो जगद्गर्भो हेमगर्भः सुदर्शनः ॥ ८१

लक्ष्मीवांस्त्रिदशाध्यक्षो दृढीयातिनईशिता ।
मनोहरो मनोज्ञाङ्गो, धीरो गम्भीरशासनः ॥ ८२

धर्मयूपो दयायोगो, धर्मनेमिर्मुनीश्वरः ।
धर्मचक्रायुधो देवः, कर्महा धर्मघोषणः ॥ ८३

अमोघवागमोघज्ञो, निर्मलामोघशासनः ।
सुरूपः सुभगस्त्यागी, समयज्ञः समाहितः ॥ ८४

सुस्थितः स्वास्थ्यभाक् सुस्थो नीरजस्को निरुद्धतः ।
अलेपो निःकलङ्कात्मा वीतरागो गतस्पृहः ॥ ८५

वश्येन्द्रियो विमुक्तात्मा, निःसपत्नो यतेन्द्रियः ।
प्रशान्तोऽनन्तधामर्षि मङ्गलं मलहानघः ॥ ८६

अनीदृगुपमाभूतो, तुष्टिर्दैवमगोचरः ।
अमूर्तो मूर्तिमानेको, नैको नानैकतत्त्वदृक् ॥ ८७

अध्यात्मगम्यो गम्यात्मा योगविद्यो योगिवन्दितः ।
सर्वत्रगः सदाभावी त्रिकालविषयार्थदृक् ॥ ८८

शङ्करः शंवदो दान्तो दमी क्षान्तिपरायणः ।
अधिपः परमाणन्दः परात्मज्ञः परावरः ॥ ८९

त्रिजगद्वल्लभोऽभ्यर्च्यस्त्रिजगन्मङ्गलोदयः ।
त्रिजगत्पतिपूज्यांह्रिस्त्रिलोकाग्रशिखामणिः ॥ ९०

त्रिकालदर्शी लोकेशो, लोकधाता दृढव्रतः ।
सर्वलोकातिगः पूज्यः सर्वलोकैकसारथिः ॥ ९१

पुराणपुरुषः पूर्वः, कृतपूर्वाङ्गविस्तरः ।
आदिदेवः पुराणाद्यः, पुरादेवोऽधिदेवता ॥ ९२

युगमुख्यो युगज्येष्ठो, युगादिस्थितिदेशकः ।
कल्याणवर्णः कल्याणकल्पः कल्याणलक्षणः ॥ ९३

कल्याणप्रकृतिर्दीप्रः कल्याणात्मा विकल्मषः ।
विकलङ्कः कलातीतः कलिविघ्नकलाधरः ॥ ९४

देवदेवो जगन्नाथो, जगद्बन्धुर्जगद्विभुः ।
जगद्धितैषी लोकज्ञः, सर्वगो जगदग्रगः ॥ ९५

चराचरगुरुर्गोप्यो, गूढात्मा गूढगोचरः ।
सद्योजातः प्रकाशात्मा, ज्वलज्ज्वलनः सुप्रभः ॥ ९६

आदित्यवर्णो भर्गाभः, सुप्रभः कनकप्रभः ।
सुवर्णवर्णो रुक्माभः, सूर्यकोटिसमप्रभः ॥ ९७

तपनीयनिभस्तुङ्गो, बालर्काभोऽनलप्रभः ।
सन्ध्याभ्रबभ्रूर्हेमाभस्तप्तचामीकरच्छविः ॥ ९८

...कनकच्छायः, कनत्काञ्चनसन्निभः ।
हिरण्यवर्णः स्वर्णाभः शातकुम्भनिभप्रभः ॥ ९९

द्युम्नाभो जातरूपाभो, दीप्तजाम्बूनदद्युतिः ।
सुधौतकलधौतश्रीः, प्रदीप्तो हाटकद्युतिः ॥ १००

शिष्टेष्टः पुष्टिदः पुष्टः, स्पष्टः स्पष्टाक्षरः क्षमः ।
शत्रुघ्न-प्रतिघोऽमोघः, प्रशास्ता शासितास्वकः ॥ १०१

शान्तिनिष्ट मुनिज्येष्ठः, शिवतातिः शिवप्रदः ।
शान्तिदः शान्तिकृत् शान्तिः, कान्तिमान् कामितप्रदः ॥ १०२

श्रियांनिधिरधिष्टानमप्रतिष्टप्रतिष्ठितः ।
सुस्थिदः स्थावरः स्थाष्णुः, प्रथीयान् प्रथितप्रथुः ॥ १०३

दिग्वासा वातर शनो, निर्ग्रन्थेशो दिगम्बरः ।
निष्कञ्चनो निराशंसो, ज्ञानचक्षुरमोमुहः ॥ १०४

तेजोराशिरनन्तौजा, ज्ञानाब्धिः शीलसागरः ।
तेजोमयोऽमितज्योतिर्ज्योतिमूर्तिस्तमोपहः ॥ १०५

जगच्चूडामणिर्दीप्तः शंवान् विघ्नविनायकः ।
कलिघ्नः कर्मशत्रुघ्नो, लोकालोकप्रकाशकः ॥ १०६

अनिद्रालुरतन्द्रालुर्जागरूकः प्रमामयः ।
लक्ष्मीपतिर्जगज्ज्योतिर्धर्मराजः प्रजाहितः ॥ १०७

मुमुक्षुर्बन्धमोक्षज्ञो, जिताक्षो जितमन्मथः ।
प्रशान्तरसशीलूषो, मध्यपेटकनायकः ॥ १०८

मूलकर्ता-ऽखिलज्योतिर्मलघ्नो मूलकारणम् ।
आप्तो वागीश्वराः श्रेयान्, श्रीयसोक्तिर्निरुक्तवाक् ॥ १०९

प्रवक्ता वचसामीशो, मारजिद् विश्वभाववित् ।
सुतनुसूनुर्निर्मुक्तः, सुगतो हतदुर्णयः ॥ ११०

श्रीशः श्रीश्रितपादाब्जो, वीतभीरभयङ्करः ।
उच्छन्नदोषो निर्विघ्नो, निश्चलो लोकवत्सलः ॥ १११

लोकोत्तारो लोकपतिर्लोकचक्षुरपारधीः ।
धीरधीबुद्धसन्मार्गः, शुद्धसूनृतपूतवाक् ॥ ११२

प्रजापारमितः प्राज्ञो यतिर्नियमतेन्द्रियः ।
भदन्तो भद्रकृद् भद्रः, कल्पवृक्षो वरप्रदः ॥ ११३

समुन्मूलितकर्मारिः, कर्मकाष्ठाशुशुक्षणिः ।
कर्मण्यः कर्मठः प्रांशुर्हेयादेयविचक्षणः ॥ ११४

अनन्तशक्तिरच्छेद्यस्त्रिपुरारिस्त्रिलोचनः ।
त्रिनेत्रस्त्र्यम्बकस्त्र्यक्षः, केवलज्ञानवीक्षणः ॥ ११५

समन्तभद्र-शान्तारिर्धर्माचार्यो दयानिधिः ।
सूक्ष्मदर्शी जितानङ्गः, कृपालुर्धर्मदेशकः ॥ ११६

शुभंयुः सुखसाद्भूतः, पुण्यराशिरनामयः ।
धर्मपालो जगत्पालो, धर्मसाम्राज्यनायकः ॥ ११७

नाम्नां पठेत् वाऽमूनि नामान्यागमकोविदैः ।
समुच्चितान्यनुध्यायपुमान् पूतस्मृतिर्भवेत् ॥ ११८

गोचरोऽपि गिरामासां, त्वमवागगोचरो मतः ।
स्तोता तथाप्यसन्दिग्धं त्वतोऽभीष्टफलं भजेत् ॥ ११९

त्वमतोऽसि जगद्बन्धुस्त्वमतोऽसि जगद्भिषक् ।
त्वमतोऽसि जगत्त्राता, त्वमतोऽसि जगद्धितः ॥ १२०

त्वमेकं जगतां ज्योतिस्त्वं विरूपोपयोगभाक् ।
त्वं त्रिरूपैकमुक्त्यङ्गं, स्वोत्थानन्तचतुष्टयः ॥ १२१

त्वं पञ्चब्रह्मतत्त्वात्मा, पञ्चकल्याणनायकः ।
षट्भेदभावतत्वज्ञस्त्वं सप्तनयसङ्ग्रहः ॥ १२२

दिव्याष्टगुणमूर्तिस्त्वं, नवकेवललब्धिकः ।
दशावतारनिर्धार्यो, मां पाहि परमेश्वरः ॥ १२३

युष्मन्नामावलीदृब्धविलसत्स्तोत्रमालया ।
भवन्तं वरिवस्यामः प्रसीदानुगृहाण नः ॥ १२४

इदं स्तोत्रमनुस्मृत्य, पूतो भवति भाक्तिकः ।
यः सम्पाठं पठत्येनं, स स्यात् कल्याणभाजनम् ॥ १२५

ततः सदेहं पुण्यार्थी, पुमान् पठतु पुण्यधीः ।
पौरहूतिं श्रियं प्राप्तुं, परमामभिलाषुकः ॥ १२६

॥ इति श्रीजिनसेनाचार्यकृतः श्रीसूर्यसहस्रनामस्तोत्रम् ॥

पू. मु. श्री हेमविजयगणिविरचितः

## १६. ॥ श्रीसूर्यसहस्रनामसङ्ग्रहः ॥

(अनुष्टुप्)

सिद्धार्थजातो भगवान्, जगच्चक्षुः श्रियेऽस्तु वः ।
पन्थाः प्रकाश्यते दीप्रैर्यद् गवां निवहैः शिवः ॥ १

कलयामासुरुल्लासं, यतः सुमनसां व्रजाः ।
स समस्तं तमःस्तोमं, हन्तु मित्रोदयः सदा ॥ २

भास्वान् रविरिनः सूर्यः सूरः शूरः शुचिः खगः ।
हेलिर्हंसो हरिर्भानुश्चित्रभानुरहर्पतिः ॥ ३

तपनस्तरणिस्त्वष्टा, तापनः सविताऽर्यमा ।
अरुणः किरणस्तिग्मकिरणः कान्तिमान् भगः ॥ ४

दिवसेशो दिनाधीशो, दिवामणिरहर्मणिः ।
दिननाथो दिनस्वामी, दिनेशिता दिनेश्वरः ॥ ५

दिनरत्नं दिवारत्नमभ्ररत्नं नभोमणिः ।
व्योमरत्नं नभोरत्नं, घस्ररत्नं वियन्मणिः ॥ ६

विहायोरत्नमुष्णांशुर्विहायोमणिरुष्णभाः ।
महाधैर्यो महाखेशो, गभस्तिर्गगनध्वजः ॥ ७

वियत्केतुर्नभः केतुरंशुमानंशुरंशुराट् ।
खररश्मिरशीतांशुरशीतार्चिर्विरोचनः ॥ ८

तमोरिपुस्तमोध्वंसी, तमःशत्रुस्तमोऽसुहृत् ।
मित्र-मार्ताण्डि-मार्तण्ड-तमोराति-तमोऽहिताः ॥ ९

भानुमाली महोमाली, रश्मिमाली खरद्युतिः ।
खरार्चिः खररुग् घर्मरश्मिः सहस्रदीधितिः ॥ १०

दिनबन्धुर्दिवाबन्धुर्दिनमित्रं दिवासुहृत् ।
दिवामित्रमहर्बन्धुरहर्मित्रमशीतगुः ॥ ११

खरपादः खरज्योतिः, खरभानुः खरप्रभः ।
खररोचिः खरपृश्निः, खरधामा खरच्छविः ॥ १२

खरदीप्तिः खराभीशुः, खरोस्रः खरदीधितिः ।
खरकेतुः खरकान्तिः, खरभा भास्करः कपिः ॥ १३

॥ इति सूर्यसहस्रनामसङ्ग्रहे प्रथमः प्रकाशः ॥

आदित्यो दीप्तिमानर्कः, पपीः पीथः सदागतिः ।
विभावानुस्रवान् ब्रध्नः, पादवानहिमद्युतिः ॥ १

रोचिष्मान् रूचिमान् पूषा, शोचिष्मानुष्णदीधितिः ।
ज्योतिष्मान् शुचिमान् गोमानर्चिष्मानहिमच्छविः ॥ २

केतुमान् घृणिमान् घर्ममरीचिर्वासरेश्वरः ।
मरीचिमानुष्णभानुः, प्रग्रहवानभीशुमान् ॥ ३

रश्मिमान् पृश्निमानुष्णकान्तिर्वासरनायकः ।
दीधितिमानशीतत्विड्, द्युतिमानहिमत्विषिः ॥ ४

छविमांस्त्विषिमान् भावान्, प्रभावान् भानुकेसरः ।
वास्रराड् वसुमान् गोराड्, गभस्तिमान् मयूखवान् ॥ ५

तीव्रभानुरुष्णदीप्तिरुष्णोपधृतिरुष्णरुक् ।
उष्णरोचिरुष्णशोचिरुष्णपृश्निः सहस्रभः ॥ ६

शीतेतरांशुरुष्णद्युदुष्णकेतु र्द्युकेतन ।
उष्णच्छविरुष्णधामा, घर्मधामा विभावसुः ॥ ७

भानेमिः कर्णसूर्ब्रह्मा, घर्मदीधितिरुष्णभः ।
घर्मरोचिर्घर्मशोचिरहस्करो-ऽम्बुतस्करः ॥ ८

घर्मोस्त्रो घर्मकिरणो, घर्मकेतुर्दिवाकरः ।
द्वादशात्मा घर्मघृणिर्घर्मांशुरहिमप्रभः ॥ ९

घर्माभीशुर्घर्मभानुर्घर्मपादः प्रभाकरः ।
घर्मच्छविर्घर्मदीप्तिर्घर्मपृश्निर्विभाकरः ॥ १०

घर्मज्योतिर्घर्मकान्तिर्घर्मद्युतिरशीतरुक् ।
घर्मत्विषिर्घर्मतेजाः घर्मार्चिस्तिग्मदीधितिः ॥ ११

विनतातनुभूसूतो, विनतासुतसारथिः ।
विनतागात्रसम्भूतो, विनतात्मजसारथिः ॥ १२

॥ इति सूर्यसहस्रनामसङ्ग्रहे द्वितीयः प्रकाशः ॥

जगच्चक्षुर्जगद्दीपो, जगत्साक्षी, विकर्तनः ।
त्रयीतनुः कर्मसाक्षी, मिहिरोऽरुणसारथिः ॥ १

खतिलकः सहस्रांशुर्लोकबन्धुर्नभोध्वजः ।
संवत्सररथो वेदोदयः सूनुः सुरावृतः ॥ २

लोकप्रकाशनः पीतुः सहस्राङ्कः सहसभाः ।
प्रत्यूषाण्डं दिवापुष्टो, दृशानो रात्रिनाशनः ॥ ३

विवस्वान् कालभृद् वाजी, बहुरूपो हरिद्हरिः ।
हरिदश्वो हरित्सप्तिर्हरिद्वाजी हरिद्हयः ॥ ४

हरिदर्वा हरिद्वातिर्हरित्ताक्ष्यो दिनाधिपः ।
तिग्मरोचिस्तिग्मशोचिस्तिग्मभानुर्नभोध्वजः ॥ ५

तिग्मांशुस्तिग्मरुक् तिग्मज्योतिस्तिग्ममहाअविः ।
तिग्मोस्त्रस्तिग्मभास्तिग्मकेतुः कमलबान्धवः ॥ ६

तिग्मार्चिस्तिग्मगुस्तिग्ममयूखः कजबान्धवः ।
तिग्मपादस्तिग्मरश्मिस्तिग्मत्विट् पद्मबान्धवः ॥ ७

तिग्मोपधृतिरर्चीराट् तिग्माभीशुर्महः पतिः ।
प्रद्योतनः पतङ्गः कस्तिग्मद्युत् पद्मिनीसुहृत् ॥ ८

तीव्रगुस्तिग्मभस्तिग्मदीप्तिस्तमःपरः ।
तिग्मतेजास्तिग्मधामा, तिग्मपृष्णिस्तमोद्विषन् ॥ ९

तिग्मकरस्तीव्रपादस्तिग्मद्युतिरहःप्रभुः ।
तिग्मत्विषिस्तिग्मवसुस्तिग्मच्छविरहः प्रियः ॥ १०

तिग्मप्रभस्तिग्मघृणिः खमणिर्गगनाध्वगः ।
व्योमाध्वगो वियत्पान्थो द्युमणिर्द्युपतिर्द्युराट् ॥ ११

नभोऽध्वन्यो नभःपान्थो, व्योमकेतुरहःसखः ।
अभ्राध्वन्यो–ऽभ्रपथिको, खाध्वनीनो–ऽंशुनायकः ॥ १२

॥ इति सूर्यसहस्रनामसङ्ग्रहे तृतीयः प्रकाशः ॥

सहस्रोस्रः सहस्रद्युत्, सहस्रार्चिः सहस्रगुः ।
अहिमदीधितिरिन्द्रः, सहस्रत्विट् सहस्ररुक् ॥ १

द्युरत्नं दिवसपतिर्व्योमध्वजो–ऽम्बराध्वगः ।
व्योमपान्थो–ऽम्बरमणिर्व्योमाध्वन्यो दिनाधिशः ॥ २

अभ्रकेतुरभ्रपान्थो, द्युराजो-ऽम्बरकेतनः ।
अभ्रध्वजो-ऽम्बराध्वन्यो, द्युनायको वियद्ध्वजः ॥ ३

नभोध्वनीनो द्युस्वामी, खपान्थो-ऽभ्रपथध्वजः ।
दिवास्वामी दिवाभर्ता, दिवासूर्यो दिवापतिः ॥ ४

दिवानेता दिवाराजो दिवाधिपो दिवाप्रभुः ।
दिवानाथो दिवाधीशो दिवाधिभूर्दिवाविभुः ॥ ५

वासरेन्द्रो दिनमणिर्वासरेशो दिनप्रभुः ।
दिनराड् गगनाध्वन्यो दिवाराड् व्योमकेतनः ॥ ६

दिवस्वामी दिवमणिर्दिवनाथो दिवप्रभुः ।
दिवनेता दिवभर्ता दिवेशोऽभ्रमपथाध्वगः ॥ ७

दिवरत्नं वियद्ररत्नं, द्योरत्नं दिवसप्रभुः ।
द्योपान्थो दिवसस्वामी, द्योकेतुर्दिननायकः ॥ ८

दिनेन्द्रो दिवसाधीशो, दिवेन्द्रो दिवसाधिपः ।
द्योमणिर्गगनरत्नं, दिवेनो वियदध्वगः ॥ ९

द्योदेशिका द्योपथिको, द्योध्वजोऽभ्रपथाध्वगः ।
दिवेशिता द्युपथिको, द्योध्वनीनो दिवेश्वरः ॥ १०

आकाशकेतुर्घस्त्रेशो-ऽम्बररत्नं महर्विभुः ।
अनन्तकेतुर्घस्त्रेन्द्रो-ऽम्बरकेतुर्दिनाधिभूः ॥ ११

घस्त्रेश्वरो घस्त्रराजो, घस्त्रभर्ता दिवाधिराट् ।
घस्त्रनेता घस्त्रपतिर्घस्त्रेनो घस्त्रनायकः ॥ १२

घस्रेशिता घस्रविभुर्घस्रस्वामी खकेतनः ।
घस्राधिपो घस्रमिणिर्घस्रनाथो हरीश्वरः ॥ १३

सुधाशनपथाध्वन्यो, नक्षत्रसरणिध्वजः ।
कलिन्दनन्दनातातः, कलिन्दतनयापिता ॥ १४

॥ इति सूर्यसहस्रनामसङ्ग्रहे चतुर्थः प्रकाशः ॥

अगो दशशतज्योतिर्भेशो दशशतद्युतिः ।
सहस्रधामाऽ-र्चिरीशः, सहस्रकेतुरंशुपः ॥ १

प्रजापतिः प्रभामाली, धर्मतातो यमीपिता ।
धर्मवप्ता विश्वकर्मा, धर्मबप्पो हरिद्विभुः ॥ २

धर्मबीजी यमीबीजी, हरिबीजी हरिप्रभुः ।
हरितातो धर्मपिता, हरिसूः सूर्यजापिता ॥ ३

हरिबप्पो हरिन्नेता, धर्मसूर्यमुनापिता ।
यमीसूर्हरितान्नाथो, हरिद्भर्ता रुचाम्पतिः ॥ ४

दण्डयामपतिश्चित्ररथ-पुष्करबान्धवः ।
वास्त्ररत्नं वास्त्रमणिर्वास्त्ररजो-ऽर्कभूपिता ॥ ५

तमोदस्युस्तमोद्वेषी, तमोवैरी तमोन्तकृत् ।
ध्वान्तारिस्तिमिरारातिर्ध्वान्तध्वंसी तमोऽप्रियः ॥ ६

ध्वान्तशत्रुस्तमोदुर्हृत्, ध्वान्तद्विट् तिमिरासुहृत् ।
ध्वान्तद्वेषी तमिस्रारिर्ध्वान्तदस्युस्तमोन्तकः ॥ ७

ध्वान्तजिद् ध्वान्तमथनस्तमोभित्तिमिरान्तकः ।
ध्वान्तारातिस्तमोऽमित्रस्तमोद्विट् तिमिराहितः ॥ ८

ध्वान्तभिद् धर्मजनको, वास्रेशो हरिदीश्वरः ।
ध्वान्तघाती ध्वान्तदुर्हृत्, तमोहृत् तिमिरद्विषत् ॥ ९

दण्डयाममणिर्दण्डिजनको वास्रनायकः ।
दण्डयामाधिपो वास्राधिपतिस्तिमिरान्तकृत् ॥ १०

द्युतिमाली विभामाली, गोर्मालीहरितामिनः ।
कान्तिमाली केतुमाली, दिनकृद् हरिताम्प्रभुः ॥ ११

शुचिमाली दिनकरस्त्विड्माली हरितांविभुः ।
घृणिमाली दिवकरो, द्युन्माली हरिताम्पतिः ॥ १२

अंशुमाली पृश्निमाली, रुग्माली दिवबान्धवः ।
पृष्णिमाली वृष्णिमाली नलिनीजीवितेश्वरः ॥ १३

॥ इति सूर्यसहस्रनामसङ्ग्रहे पञ्चमः प्रकाशः ॥

ग्रहनाथो ग्रहस्वामी, ग्रहेशो ग्रहनायकः ।
ग्रहनेता ग्रहपतिर्ग्रहभर्ता ग्रहेशिता ॥ १

ग्रहेश्वरो ग्रहविभुर्ग्रहार्यो ग्रहपुङ्गवः ।
ग्रहाधिपो ग्रहपुषो ग्रहाधिभूर्ग्रहप्रभुः ॥ २

ग्रहराजो ग्रहाधीशो, ग्रहेन्द्रो दिनबान्धवः ।
रोचिःपतिः शुचिस्वामी, शोचिरीशोऽर्चिरीश्वरः ॥ ३

उस्रस्वामी रुचिस्वामी, रुचिभर्ता रुचीश्वरः ।
रुचिनेता रुचिप्रेयान् रुचिराजो रुचिप्रभुः ॥ ४

रुचिकान्तो रुचामीशो, रुचान्नाथो रुचांविभुः ।
रुचाम्भर्ता रुचान्नेता, रुचामिन्द्रो रुचामिनः ॥ ५

रुचांस्वामी रुचाम्प्रेयान्, रुचाङ्कान्तो रुचाम्प्रभुः ।
रुचीशिता रुचांराजो, रुक्प्रेयान् रुचिवल्लभः ॥ ६

रुचीशो रुचिरमणो, रुग्भर्ता रुचिनायकः ।
उस्रेशः शौचिषान्नाथः, शुचीशो रोचिषाम्पतिः ॥ ७

गोस्वामी गोःपतिः कान्तिप्रणयी ज्योतिषाम्पतिः ।
ज्योतिरीशो गवामीशो, गवांस्वामी गवाम्पतिः ॥ ८

अंशुस्वामी करस्वामी, कराधीशः करप्रभुः ।
अर्चिनाथोऽर्चिषान्नाथः, शुचिनाथः शुचिप्रियः ॥ ९

धामेशो महसामीशो, दीप्तीशो दीप्तिवल्लभः ।
घृणिप्रेयान् घृणिस्वामी, घृणिनाथो घृणिप्रियः ॥ १०

घृणीशो घृणिरमणस्त्वि(स्तिवि)षीशः प्रग्रहप्रभुः ।
द्युतीशः प्रग्रहस्वामी, प्रभेशः प्रग्रहाधिपः ॥ ११

विभेन्द्रः प्रग्रहाधीशो, गवीशः प्रग्रहेश्वरः ।
गभस्तीशस्त्विषामीशो मरीचीशस्त्विषाम्पतिः ॥ १२

कलिन्दपुत्री सविता पवमानपथध्वजः ।
अब्जिनीजीविताधीशः, सरसीरुहबान्धवः ॥ १३

॥ इति सूर्यसहस्रनामसङ्ग्रहे षष्ठः प्रकाशः ॥

पृष्ठिमान् हरितामर्यः, पृष्टिराट् पृष्णिवल्लभः ।
पृष्णीशो हरितांस्वामी पृष्णियो वास्रबान्धवः ॥ १

हेतिमानर्चिषामीशो, हेतिनाथोऽर्चिषाम्पतिः ।
घर्महेतिर्द्युतामीशः, खरहेतिर्द्युतामिनः ॥ २

उष्णहेतिश्छविस्वामी, हेतिराजोऽर्चिषाम्प्रभुः ।
उष्णभासो धर्मभासो, भासेशो भासवल्लभः ॥ ३

भासाम्भर्ता त्विषान्नेता, भासान्नाथो महोऽधिभूः ।
भासाम्प्रेयांस्त्विषाम्प्रेयान्, भासाङ्कान्तत्विषामिनः ॥ ४

वृष्णिमांस्तेजासामीशो, वृष्णिराट् तेजसाम्पतिः ।
वृष्णीशस्तेजसांस्वामी वृष्णीन्द्रस्तेजसाम्प्रभुः ॥ ५

तेजोधिपश्छविप्रेयांस्तेजोनाथश्छवीशिता ।
तेजोधीशस्त्विषाङ्कान्तस्तेजोभर्ता छवीश्वरः ॥ ६

द्युतांस्वामी द्युताम्भर्ता, द्युताम्प्रेयान् द्युताम्पतिः ।
द्युतान्नेता द्युतामर्यो, द्युतांराजो द्युतांविभुः ॥ ७

रश्मीशो दीधितिस्वामी, रश्मीन्द्रो दीधितिप्रभुः ।
धामराट् किरणस्वामी, धामार्यः किरणाधिपः ॥ ८

विभेशः किरणाधीशो, विभाप्रेयान् कराधिपः ।
विभाभर्ता करकान्तो, विभाकान्तः करेश्वरः ॥ ९

विभानेता विभाराजः, प्रभाप्रेयान् प्रभाप्रियः ।
प्रभार्यः किरणपतिः, प्रभाकान्तः प्रभापतिः ॥ १०

प्रभाभर्ता प्रभास्वामी, प्रभाराट् किरणेश्वरः ।
प्रभानेता प्रभाधीशः, प्रभेनः केतुनायकः ॥ ११

छविकान्तो महःस्वामी, द्युताङ्कान्तो द्युताम्प्रभुः ।
पादाधीशः करभर्ता, करराजः करेशिता ॥ १२

सरसीरुहिणीप्रेयान्, शिशिरेतरदीधितिः ।
सुपर्वपदवीपान्थो, नक्षत्रनिगमध्वजः ॥ १३

॥ इति सूर्यसहस्रनामसङ्ग्रहे सप्तमः प्रकाशः ॥

सप्तसप्तिरयुक्सप्तिः, सप्तवाहः कुमुद्रिपुः ।
सप्तवींतिरयुग्वाजी, सप्तवाजी कुमुत्परः ॥ १

सप्ताश्वः कुमुदारातिः, सप्तताक्ष्यः कुमुद्द्विषत् ।
सप्तार्वा कुमुदद्वेषी, सप्तहेषी दिवासखः ॥ २

कुमुच्छत्रुरयुग्वाहः, कुमुद्दस्युरयुग्हयः ।
कुमुद्द्विट् सप्ततुरगोऽसमाश्वः सप्तपाकलः ॥ ३

अयुग्हरिरयुक्कुण्डी, शुष्मं सप्तप्रकीर्णकः ।
सप्तहंसः कुमुद्वैरी, सप्तकिण्वी महःशयः ॥ ४

अयुग्हंसो दिनस्निग्धो, महेशः सप्तकेशरी ।
सप्तप्रोथी दिवस्निग्धोऽ-समसप्तिर्महोधिपः ॥ ५

अयुग्वीतिरयुक्प्रोथी, द्युसखोऽसमकेसरी ।
अयुक्केसर्यहस्निग्धोऽसमार्वाऽसमपाकलः ॥ ६

सप्तकुण्डी दिवास्निग्धोऽ-समकिण्वी महाधिभूः ।
अयुगश्वोऽम्बुरुट्स्निग्धोसमवाहो महेशिता ॥ ७

अयुगर्वा द्युवयस्यो समवीतिर्महेश्वरः ।
अयुग्हेषी महाधीशोऽसमहंसो महःशमः ॥ ८

अयुक्किण्वी दिनसखोऽसमप्रोथी विभाशमः ।
अयुक्ताक्ष्र्यो महनेता, समताक्ष्र्यो महःप्रभुः ॥ ९

अयुगेकशफः सप्ततुरङ्गो शिशिरद्युतिः ।
महेन्द्रोऽसमतुरगो समवाजी महःप्रभुः ॥ १०

असमैकशफः सप्तहयोऽसमतुरङ्गमः ।
शोचिःकरः प्रभापाणिरुस्रपाणिर्घृणीश्वरः ॥ ११

शोचिःपाणिरंशुहस्तो, रोचिःपाणिर्द्युबान्धवः ।
धामहस्तः प्रभाहस्तः केतुहस्तः पटुप्रभः ॥ १२

समेतरहरिः सप्तहरिः सप्ततुरङ्गमः ।
अद्रिरम्भोजिनीनाथोऽम्भोजिनीशोऽब्जिनीप्रियः ॥ १३

॥ इति सूर्यसहस्रनामसङ्ग्रहे अष्टमः प्रकाशः ॥

गोहस्तः किरणकरः, केतुपाणिर्दिवध्वजः ।
गोपाणिः किरणपाणिरंशुपाणिर्दिवाध्वगः ॥ १

ज्योतिःकरो दिवाध्वन्यो ज्योतिर्हस्तोऽब्जबान्धवः ।
ज्योतिपाणिर्विभापाणिरर्चिर्हस्तोऽब्जिनीपतिः ॥ २

घृणिपाणिघृणिहस्तः पृश्निपाणिर्मयूखराट् ।
पृश्निहस्तः पृष्णिकरः, पृष्णिपाणिरहःसुहृत् ॥ ३

पृष्णिहस्तः पृष्णिकरो, वृष्णिपाणिरशीतनः ।
वृष्णिहस्तो वृष्णिकरो, रश्मिहस्तोऽजडद्युतिः ॥ ४

रश्मिपाणी रश्मिकरस्त्विट्करः पद्मिनीप्रियः ।
द्युतिपाणिर्द्यूतिकरो, द्युतिहस्तो जडत्विषिः ॥ ५

भानुपाणिर्भानुकरो, भानुहस्तो जडप्रभः ।
चण्डशोचिश्चण्डरोचिश्चण्डोस्रश्चण्डदीधितिः ॥ ६

................................ ।

...................................... ॥ ७

चण्डांशुश्चण्डकिरणश्चण्डार्चिश्चण्डभाः ।

.......................... कोकबान्धवः ॥ ८

चण्डद्युतिश्चण्डकेतुश्चण्डद्युत् पद्मिनीधवः ।
चण्डत्विषश्चण्डभासश्चण्डत्विड् नलिनीप्रियः ॥ ९

चण्डच्छविश्चण्डवसुश्चण्डभोऽम्बुजबान्धवः ।
चण्डतेजाश्चण्डप्रभोऽब्जिनीधवः ॥ १०

चण्डहेतिश्चण्डकान्तिः, सुरपद्धतिकेतनः ।
बहुकोज्योतिरम्भोजबन्धुरम्भोजिनीधवः ॥ ११

तीक्ष्णांशुस्तीक्ष्णकिरणस्तिक्ष्णार्चिस्तीक्ष्णदीधितिः ।
तीक्ष्णधामा, तीक्ष्णतेजास्तीक्ष्णोस्रस्तीक्ष्णप्रग्रहः ॥ १२

धरणोऽंभोजिनीप्रेयान् दिविषत्पदवीमणिः ।
समीरपदवीरत्नं, समीरपथकेतनः ॥ १३

॥ इति सूर्यसहस्रनामसङ्ग्रहे नवमः प्रकाशः ॥

निर्मोकमणिरम्भोजसवयास्तीव्रदीधितिः ।
पद्ममित्र–पद्मबन्धुः, सरसीरुहिणीप्रियः ॥ १

सरोजमित्रमम्भोजपाणिः पङ्कजिनीप्रियः ।
सरोरुहकरः पद्मकरः पुष्करिणीप्रियः ॥ २

तमोनुत्तिमिरध्वंसी नलिनीप्राणवल्लभः ।
वरुणः किरणप्रेयान् पद्मिनीहृदयेश्वरः ॥ ३

निर्मोकरत्नमम्भोजकरः कमलिनीश्वरः ।
कोकबन्धुः सरोजन्मबन्धुः पङ्कजबान्धवः ॥ ४

चक्रबन्धुः पयोजन्मबन्धुश्चक्राङ्गबान्धवः ।
आशुगः सरसीजन्ममित्रमम्भोजबान्धवः ॥ ५

भासन्तः पद्मिनीप्राणप्रियः पङ्कजिनीपतिः ।
कोकमित्रं सरोजातमित्रं पाथोजिनीप्रियः ॥ ६

पद्मिनीप्रणयी पद्मसुहृद् वारिजिनीप्रियः ।
असुरः सरसीजातमित्रं नीरजिनीवरः ॥ ७

कञ्जारोम्भोजिनीभर्ता किशोरोम्बुजिनीपतिः ।
पानीयरुहवयस्यः सुपर्णाग्रजसारथिः ॥ ८

पद्मिनीरमणः पद्मसवयाः मुर्मुरेश्वरः ।
अब्जिनीदयितः कोकवयस्यो बिसिनीप्रियः ॥ ९

बिसिनीप्रणयी पद्मसखः पाथोजिनीपतिः ।
नलिनीप्रणयी चक्रसखस्तोयजबान्धवः ॥ १०

पद्मिनीशः पयोजन्मबान्धवोम्बोजिनीवरः ।
अब्जिनीशः सरोजन्मबान्धवोऽम्बुजिनीधवः ॥ ११

नलिनीशोम्बुजस्निग्धः कजस्निग्धोऽब्जिनीवरः ।
राजीवबन्धुरम्भोजसुहृज्जलजबान्धवः ॥ १२

अरविन्दसुहृत् कोकसुहृत् पुष्करिणीधवः ।
बिसिनीशोऽब्जिनीजानिः पानीयरुहिणीपतिः ॥ १३

पानीयरुहिणीप्रेयान् पद्मस्निग्धोऽब्जिनीश्वरः ।
शतपत्रसुहृत् पीथजन्मास्निग्धोब्जिनीप्रभुः ॥ १४

नालीकबन्धुरम्भोजस्वजनोऽम्बुजिनीवरः ।
शतपत्रसखस्तोयजन्मास्निग्धोऽम्बुरुट्सुहृत् ॥ १५

अरविन्दसखः पाथोजन्मास्निग्धोऽब्जिनीविभुः ।
अब्जिनीरमणः कोकसवयाः बिसिनीप्रभुः ॥ १६

सहस्रपत्रसवयास्तुहिनेतरदीधितिः ।
मृणालिनीप्राणनाथः, सरसीरुहिणीश्वरः ॥ १७

मुनि-युग-नरपतिसङ्ख्ये वर्षे श्रीहीरविजयसूरीणां ।
वचनेन हेमविजयो रविनाम्नां सङ्ग्रहं विदधे ॥ १८

॥ इति सूर्यसहस्रनामसङ्ग्रहे दशमः प्रकाशः ॥

# परिशिष्ट

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

| | | |
|---|---|---|
| अचलधृति | आर्यागीति | औपच्छन्दसिक |
| अतिधृति | आलिंगनक | |
| अतिशर्करी | | कन्या |
| अतिशायिनी | इन्द्रवंशा | कामक्रीडा |
| अतिरुचिरा | इन्द्रवज्रा | कामबाण |
| अनंगशेखर | | किसलयमाला |
| अनुष्टुप् | उज्जवल | कुटज |
| अपरनाराचक | उत्कलिका | कुटील |
| अपरललितक | उदयम् | कुसुमलता |
| अपरवक्र | उद्गता | कुसुमविचित्रा |
| अपराजिता | उद्धत | कुसुमितलता |
| अपरान्तिका | उपचित्रा | केकीरव |
| अभिमुखी | उपजाति | केसर |
| अवितथ | उपेन्द्रवज्रा | क्रीडनक |
| अशोकपुष्पमंजरी | उर्वशी | क्षिप्तक |
| अष्टि | | |
| असम्बाधा | ऋषभ | खिञ्जित |
| आख्यानकी | एकावली | |
| आपातलिका | औपच्छन्दसका- | गाहा |
| आर्या | परान्तिका | गीतपद्धति |

गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया
जयानन्द

जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित

द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पंक्ति
पंचकावली
पंचचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात

भ्रमरविलसिता

मंजुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तकीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला

मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौतिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

| | | |
|---|---|---|
| ललिता | | सुधा |
| | श्री | सुधाकळश |
| वंशपत्रप्रतितं | श्लोको | सुन्दरम् |
| वंशस्थ | शंख | सुप्रभा |
| वक्त्र | शरभललित | सुभद्रामालिनी |
| वनमंजरी | शर्करी | सुमति |
| वसंतचामर | शशिलेखा | सुमुख |
| वसंततिलका | शशिवदना | सुवदना |
| वस्तुवदन | शशीकला | सोपानक |
| वाणिनी | शार्दुलविक्रीडित | सोमराजी |
| वानवासिका | शालिनी | सौभाग्यविमल |
| विद्युत्विलसित | शिखरिणी | स्त्रग्धरा |
| विद्युन्माला | शुद्धविराट् | स्त्रग्विणी |
| विभावरी | शोभा | स्त्री |
| विभ्रमगति | श्येनी | स्वागता |
| वियोगनी | | |
| विषम | | हंसमाला |
| वेगवती | | हंसलयं |
| वेष्टक | संगतक | हंसी |
| वैतालीय | सिंहोद्धता | हक्काषट्पदी |
| वैश्वदेवी | सिद्धि | हरिगीत |
| वृन्दारक | सुदन्त | हरिणी |

# स्तोत्रसंदेशमाला

१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर–गणधराणां स्तोत्राणि
५ कल्याणक–छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि –१
१० श्रीपार्श्वनाथजिनस्तोत्राणि –२
११ श्रीपार्श्वनाथजिनस्तोत्राणि –३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि
१८ पू.आचार्यादियोग्यमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २